संस्कृत अकादमी ग्रन्थमाला 111

In Public domain. Digitization Muthulakshmi Research Academy

पद्मश्रिया विभूषितेन श्रीभाष्यं विजयसारथिमहाकविना विरचिता

भारतभारती

प्रधानसम्पादकः

आचार्य के नीलकण्ठम्

निदेशकः

संस्कृत अकादमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् -500007

2021

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

भारतभारती

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Granthamala 111

Bharatabharati

Sribhashyam Vijayasarathi

Publisher

Director, Sanskrit Academy

Copies can be had from:

Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad - 500 007

Phone & Fax :

040-27070281

Email:

sanskritacademyhyd@gmail.com

Web:

https://sanskritacademy.net/

Date Entry by

Ch. Bhagyalaxmi
and
Dr. K. Anjaneyulu

Printed at

Karshak Art Printers
Vidyanagar, Hyderabad.

Bharatabharati

ISBN: 9789380171548

Sanskrit Academy
Year : 2021
Copies : 300
Price : ₹ 300
$ 30

In Public domain. Digitization Muthulakshmi Research Academy

कृतिसमर्पणम्

श्रीमतो विश्वविसृमरकीर्तिसुभगस्य धरातलधिषणस्य लोकतन्त्र परित्राणधुरीणस्य सरस्वतीपुत्रस्य ज्योतिष्मतीमहासंविदनुगृहीतकला कलापस्य बहुभाषावैदुषीसभाजितस्य लोकप्रियनायकस्य अजातशत्रोः राजर्षिशिरोमणेः अभिनवभारतरत्नायितस्य पामुलपर्ति कुलालंकारहीरस्य भारतप्रियतम प्रधानमन्त्रिणो वेंकटनरसिंहरावु महोदयस्य जनताभाग्योदयस्य करकमलयोः भारतभारती नाम कृतिरुपहारीक्रियते

विजयस्व महाप्राज्ञ बहुभाषास्वयंवृत !
प्रधानमन्त्रिमूर्धन्य पी.वी.पण्डितपण्डित ! ।
करीम्नगरभाग्यश्रीः आन्ध्राणां गर्वकारणम्
दाक्षिणात्यप्रतिष्ठाऽस्ति भवान् पी.वी.महोदय ।

रूसीस्नेहविलासिनी ब्रिटनिकाकौटिल्यनिर्मूलिनी
चीनीभ्रेषनिशारणी अमरिकाहङ्कारधिक्कारिणी ।
पाकीधाष्टर्यविदूषिणी बहुसमस्यामूलविश्लेषिणी
विद्वल्लोकविमोहिनी जयति ते प्रज्ञा नवोन्मेषिणी ।।

श्रीमन् पामुलपर्ति वेंकटनृसिंहाभिख्य विश्वैकवि-
ख्यातप्रातिभ नैकनैकपदवीकीर्तिप्रतिष्ठास्पद ! ।
श्रेयस्विन् भरतप्रधानिपदवीनव्योपहार [1] प्रजा-
बन्धो ! भारतभारतीकृतिरियं त्वां भो वृणीते स्वयम् ।।

---

1. नव्येतिपदं नवमार्थं व्यनक्ति । वस्तुतोऽत्रभवान् संप्रति नवमः प्रधानमन्त्री विजयते ।

In Public domaim. Digitization Muthulakshmi Research Academy

अनुरूपगुणोदात्तां दारान् भारतभारतीम् ।
प्रधानमन्त्रिन् गृह्णीष्व येन धन्यायते कृतिः ॥

कवीनां प्रख्यानां नवरसपरीवाहलुलितान्
चमत्कारान् वाचां परिमलपरिस्पन्दशबलान् ।
प्रसूते, विभ्रष्टा प्रतिपदकरालम्बसदृशैः
कृती स्वादृक्साह्यैः स्तवयति जगद्गीतधिषण ॥

समन्तादातङ्कज्वलनकबलीकृतजनैः
प्रजामारीभूतैः कतिपयदलैः स्वार्थनिरतैः ।
भयभ्रान्तं राष्ट्रं विकलविकलं सम्प्रति भवान्
परित्रातुं शक्तो भरतनृतपोभाग्यफलित ! ॥

बहुव्रणपरिक्लिष्टं स्वदेशं मूलतः पुनः ।
उल्लाघयितुमिन्धाना काऽपि शक्तिरुदेतु ते ॥



In Public domain. Digitization Muthulakshmi Research Academy

P.V. Narasimha Rao

9, Motilal Nehru Marg
New Delhi - 110 011

11 January, 1998.

My dear Dr. Vijayasarathi,

I am sorry that there has been delay in my response to your requests.

I am happy to hereby send you my consent for dedicating your very impressive work, 'Bharat-Bharati' to me and thank you for your kind gesture.

With kindest regards and best wishes for the year 1998.

Thanking you,
Sincerely,
sd/-
P.V.Narasimha Rao

Dr.S.Vijayasarathi
Hyderabad

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः

श्रीशङ्करभगवत्पादा विजयन्ते

We feel very happy to publish "***Bharatabharati***" a collection of laghu kavyas composed by Mahakavi Sreebhashyam Vijayasarathi. It is indeed an outstanding and memorable work. Each and every poem in this, gives an advice to every Indian irrespective of caste and creed to bring back the cultural renaissance of this great country. In fact the main object of Sreebhashyam Vijayasarathi's poetry is nationality, National integration and patriotism. This kind of poetry is the need of the hour as the country is under crisis at the present time.

Mahakavi Sribhashyam Vijayasarathi was born on 10th March 1936 in a rural village in the Karimnagar District of Telangana State. He had his primary education in Urdu but inheriting Sanskrit at home, he took to composing poetry in Sanskrit at a tender age of seven. He learnt *Tarkashastra* along with *Nyayabodhini*.

Sri Vijayasarathi has composed a poem called *Sharadapadakinkini* at the age of eleven in the praise of Goddess Sarasvati. Followed by this he wrote a Kavyam Shabariparidevanam and a gadyakavyam Manorama in about three hundred pages. He made a mark as a poet at an early age of twenty two. His conviction to write only in Sanskrit made him experiment in modern thematic aspects in all the extent literary forms. He has translated Togore's Geetanjali in to Sanskrit in the year 1956. Andhrapradesh Legislative Assembly conferred on him the title MAHAKAVI in 1966. He has many books like Mandakini, Bharatabharati, Sangeetamadhavam, Rasakeli, Vishadalahari, Vasucharita Sameeksha, UdaharanaKavyam, ShaDdarshanani, and many other Kavyas to his credit.

In Public domain. Digitization Muthulakshmi Research Academy

Sri Vijayasarathi enriched the Sanskrit literature with many experiments. He has introduced "Seesa padya" chandas in Sanskrit; he brought Vaidika Suktaprikriya in to Classical literature.

He was honored with a gold medal by Tilak Vidyapeetham Maharashtra state, best Sanskrit scholar award by Telugu University, Hyderabad, Vachaspati Puraskaram by Birla Foundation,"**Padmasri**" by Government of India in 2020.

Coming to the publication of the present work, I offer my salutations to the legendary Poet Mahamhopadhyaya Sreebhashyam Vijayasarathi, who allowed us to publish this excellent work from the Sanskrit Academy, Osmania University and helped us in all aspects. I dearly think the help of Dr. V. Subrahmanyam, deputy director and Dr. Joshi Santosh Kumar research assistant in the academy. These two along with Dr. K. Varalakshmi deputy director and Sri K. V. Suryaprakash who were always ready to take up any work related to this book. I bless my student Dr.K.Anjaneyulu who helped me in proof-reading of the book.

My sincere thanks to Prof. P.N. Shastry sir Vice-chancellor and Prof. Subrahmanya Sharma Registrar, Central Sanskrit University, New Delhi (formerly Rashtriya Sanskrit Sansthan). It is a pleasure to acknowledge the motivation of Prof. Gopal Reddy, Registrar, Osmania University in the publications of Sanskrit Academy.

I, on behalf of Sanskrit Academy, offer my sincere thanks to Smt. Chinnam Bhagyalakshmi who has done D.T.P. work in a short time and Karshak Art Printers, Vidyanagar, Hyderabad for printing this book elegantly.

We humbly welcome the suggestions if any from the scholars for further improvement of the book.

Prof. K. Neelakantham

Director

In Public domain. Digitization Muthulakshmi Research Academy

ओम् श्रीगुरुभ्यो नमः

श्रीशङ्करभगवत्पादाः विजयन्ते

भारतश्रेयसे भूयात् वाणी विजयसारथेः

मृदुललितपदार्थं गूढशब्दार्थहीनं
बुधजनसुखयोग्यं बुद्धिमान्नृत्ययोग्यम्।
बहुरसकृतमार्गं सन्धिसन्धानयुक्तं
न भवति शुभकाव्यं नाटकप्रेक्षकाणाम्।। (नाट्यशास्त्रम् १७-१२८)

इति भगवान् भरतमुनिः स्वनाट्यशास्त्रे काव्यस्य लक्षणं प्रत्यपादयत्। यद्यपि स महानुभावः "नृत्यं नाटक"मित्यादि पदानि उपयुयुञ्जात्र अस्मिन् प्रसङ्गे, तथापि लक्षणमिदं साधारणकाव्यानां कृतेऽप्यन्वयितुं शक्यत इति विद्वत्तल्लजाः उदघोषयन् उद्घोषयन्ति च। अपि च शिवलीलार्णवस्य रचयिता सप्तदशशतकीयः "नीलकण्ठ दीक्षितः"

गायन्ति वीणा अपि वेणवोऽपि
जानन्ति बालाः पशवोऽपि चेदम् ।
काव्यानि कर्तुं परीक्षितुं च
द्वित्राः भवेयुः न तु वा भवेयुः।। (१-१४)

इत्यादिभिः सङ्गीतसाहित्ययोरुभयोरपि तारतम्यं विश्लेषयन्, योग्याः कवयः काव्यपर्यालोचकाश्च लोके अत्यन्तं विरला एव दृश्यन्ते इत्यचकथत्। तादृशेष्वत्यन्तं विरलतयोपलभ्यमानेषु महाकवि-पण्डितेष्वन्यतमाः महामहोपाध्यायाः पद्मश्रिया विभूषिताः आचार्याः श्रीभाष्यं विजयसारथिवर्याः। प्राचीनैः महर्षिभिः ऋषितुल्यैश्च व्यास-वाल्मीकि-कालिदास-भास-भवभूत्यादिभिः, आधुनिकैः भट्टमथुरानाथशास्त्री-शतावधानी कृष्णमाचार्य-श्रीधर भास्कर वर्णेकर इत्यादिभिः नैकैः महाकविभिः समर्चितां गैर्वाणीमाश्रित्य प्रायः संस्कृतलाक्षणिकैः प्रतिपादितेषु सर्वप्रकारेष्वपि काव्यानि निरमास्तायं

In Public domain. Digitization Muthulakshmi Research Academy

महाकविः। "सूरयः वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम्" इति काव्यादर्शकारेण उक्तप्रकारं सूरिरयं समाजस्य, देशस्य राष्ट्रस्य च सर्वविधसमुन्नतिं काङ्क्षमाणः शास्त्रपरिभाषया युक्तानि काव्यानि व्यरचयत्। छन्दःशास्त्रम्, व्याकरणम्, चतुष्षष्टिकलाः, लोकस्थितिः, पदपदार्थविज्ञानम्, युक्तायुक्तविवेकः, चमत्कारजनककाव्यनिर्माणानुकूल नानाविधशब्दार्थानां प्रयोगनैपुण्यम्, नवनवोन्मेषशालिनी प्रतिभा इत्यादयः सर्वे महाकवेरस्य कृतिषु अनुपदं आह्लादयन्ति सहृदयान्।

भारतभारती काव्येऽस्मिन् "त्रयोविंशति" अंशाः वर्तन्ते। एतेषु प्रायः अष्टभ्यः श्लोकेभ्यः आरभ्य २५० श्लोकात्मिकाः अंशाः अपि दृश्यन्ते। अमृत-गङ्गा-करुणा-लक्ष्मी-सुधेत्यादि पञ्चलहरीणां कर्ता काव्यशास्त्रेतिहासे सुप्रसिद्धः जगन्नाथपण्डितः स्वखण्डकाव्येषु भक्तिमेव प्रधानतया अवर्णयत्। पञ्च लहरीषु एतासु प्रबन्धगतभावध्वनिरेव विशेषेण दृश्यते। यद्यपि भक्तिं प्रकटयितुमेवैतानि काव्यानि निबबन्ध सः तथापि "भक्तेः" कृते रसत्वं न पर्यकल्पयत्। रूपगोस्वामि प्रभृतयः "उज्ज्वलनीलमण्यादि" ग्रन्थेषु भक्तेः रसत्वस्थानं ददुः। किन्तु भरतमुनेः पन्थानमनुगच्छन् जगन्नाथोऽपि प्रबन्धगतभक्तिरसत्वमेव पञ्चसु लहरीषु विशेषेणावर्णयत्। एवमेवात्रापि श्रीभाष्यं विजयसारथिमहाकविः काव्येऽस्मिन् भारते, भारतमातरि, भारतीयसम्प्रदाये अन्येषु च देवेषु स्वभक्तिमेव बहुधा अभिदधौ ।

अस्मिन् ग्रन्थे सर्वप्रथमं **"जयति हारि सारस्वतम्"** इत्यनेन स महाकविः रसभावगुणालङ्कारादिभिः युक्ता विविधविबुधनिवहाराधितपदा, भवविभवरूपाश्रितरसा, सुरीतिप्रख्याता इयं सारस्वतवाणी सदा जयतीति सविश्वासं प्रकटीकृत्य, ततः अनुपमां स्वदेशभक्तिं विविधैः छन्दोभिः सुमधुरया सुललितया भाषया सहृदयहृदयाह्लादकं "भारतभारती" काव्यं व्यरचयत् ।

In Public domain, Digitization Muthulakshmi Research Academy

"**भारतीसुप्रभातम्**" इत्याख्ये द्वितीये महाकविः "अमलाम् अतुलाम्, सुजलां, सुफलां, मलयजशीतलां, श्यामलां, सरलाम्, सुस्मितां, पण्डितमणिविभूषितां, सकललोकधरणीं, विश्वमङ्गलगाननिरतां, विविधविद्याकौमुदीं, भारतीं भारतमातरम्" अस्तवीत् । अत्र "त्वज्ञातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः। तवेमे पृथिविं पञ्चमानवाः येभ्यो ज्योतिस्मृतं मर्त्येभ्यः उद्यन् सूर्योरश्मिभिरातनोति" (अथर्ववेदे १२-१-२५) इत्याद्यथर्ववेदोक्त मातृभूमेः प्राशस्त्यं दृश्यते । तदनन्तरं महाकविरयं षष्टिश्लोकैः "भारतभारती" खण्डिकां व्यरचयत्। अत्र तु प्रत्येकस्मिन् श्लोके सः भारतदेशस्य समैक्यतां तस्य प्राधान्यं च सुललितैः पदैरवर्णयत्। "भायां सनातनधर्मोपदिष्टकान्त्यां सततं रताः प्रजाः यत्र वर्तन्ते स भारतदेशः।" तस्य भारतस्य भारत्या मातृवात्सल्ययुक्तया वाण्या सह प्रजान् सर्वान् जागरूकान् अकार्षीत् सः। जाति-कुल-मत-वैरादीन् सर्वान् विसृज्य, धनिक-निर्धनभेदं विस्मृत्य सर्वे भारतीयाः ऐकमत्येन स्वतन्त्रभारतरक्षणाय उद्यमन्त्विति सः आभ्यर्थयत्। स्वदुष्टराजकीय दुष्प्रयोजनैकसिद्धये उदात्तजातिसंस्कृतिं न शोषयन्त्विति कुटिलनायकान् प्रत्यगर्जत्। "स्वयं समृद्धिसाधने सदा समुद्यता भवन्त्विति जनान् सर्वान् प्रार्थयामास। धनाधिकारिणः, धराधिकारिणः, मताधिकारिणः, पदाधिकारिणः, सर्वेऽपि पवित्रभारताम्बिकायाः पदारविन्दसेवका एवेति तत्र तेषां मध्ये भेददृष्टिः न स्यादिति आशासत सः। पण्डितान्, वीरान्, सैनिकान्, महिलाः, शासकान्, कार्मिकान्, कृशीवलान्, सर्वानपि भारतीयान् अवन्तु स्वतन्त्रभारतश्रियम् इति बृहन्निनादेन प्रार्थयामास सः।" "सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् देवा भागं यथा पूर्वे सञ्जानाना उपासते।।" इत्यादि ऋग्वेदोक्त-ऐक्यतामन्त्रस्य भाष्यमिव प्रतिभाति भारतभारती खण्डकाव्यमिदम्। भारतस्य भारतीं लोककल्याणाय पदे पदे आश्रावयत् कविरत्र।

In Public domain. Digitization Muthulakshmi Research Academy

"मातृदेशं प्रीणयानुज" इत्यस्मिन्नपि महाकविरयं मातृदेशम्प्रति स्वां भक्तिं न्यवेदयत्। हिंसां सन्त्यज्य कारुण्यं प्रदर्शय प्रेमतत्त्वं विचारय, स्वार्थचिन्तनं पक्षपातवैखरीं, क्रोधम्, ईर्ष्यां दूरय अनुज, उच्चनीचभेददृशया मातृभूमिं मा कलङ्कय हे अनुज इति वात्सल्येन उपदिदेश सः।

"जहीहि जडतां कर्मणि दीक्षां गृहाण घोरं दूरय कृतश्रमस्त्वं मितव्ययस्त्वं कृते स्वमातुस्समर्पय तिमिरम् स्वम्, स्वदेशमवितुं सर्वस्वं ते मुदा व्ययीकुरु महामनीषिन्" इत्यादिभिः प्रायः अशीतिश्लोकैः **"शङ्खरवं"** चकार सः। "शङ्खशब्दो भवेद्यत्र तत्र लक्ष्मी च सुस्थिरा" इति शास्त्रोक्तिमनुसृत्य शङ्खरवेनानेन भारतदेशे परिव्याप्तमानं मान्द्यं विनश्यति जनाश्च सर्वे जागरूकाः भवन्तीति सः अमन्यत। साम्यवाद परिचिन्तकोऽयं विपश्चित् वर्गसङ्घर्षम् अपनीय वर्गहीनस्य समाजस्यैक्यतां संस्थापयितुम् अभिलषति। लोके मानवानां चित्तेषु स्थिता असमानता अपनेयेति काङ्क्षते। श्रमजीविवर्गस्य कृते कृषीवलानां कृतेऽपि स्वामित्व पदं देयमिति तेन भारतदेशस्य सम्पदः वृद्धिमेष्यन्ति इति चिन्ततवान्। अत एवानुपदं साम्यवादसिद्धान्तं ख्यापयति स्वकाव्येषु।

उषसूक्तेऽपि साम्यवादस्यावश्यकतां तस्य प्रयोजनं च बोधयामास महाकविरयम्। उषस्सूक्ते २१ श्लोकाः वर्तन्ते

जननि जागृहि भारतावनि
जननि जय जय पूतचरिते
सकलजनतानन्दवाहिनि
निखिलमानवशान्तिसारणि।। (श्लो-१)

इति श्लोकेनारभ्य लोके वञ्चकानां समेषां कूटनीतिं निन्दन् -

In Public domain. Digitization Muthulakshmi Research Academy

अक्रमद्रविणार्जनानिश्रामिकाधिकपीडनानि

अधिकमूल्यान्यधिकशुल्कान्यनमितायादीनि बहुधा
स्वार्थपूरितराजनैतिक दुर्दलीय कुचेष्टितानि च
लोकतन्त्रेऽप्रत्ययस्याराजकस्य च कारणानि।। (श्लोक-२०)"

इत्यादिना लोके परिव्याप्तां दुष्टनीतिम् अपनीय "प्रगतिमयजीवनविधानं समुपधातुं जननि जागृहि" इति भारतमातरं जागरयति। अत्र कवेः उपमा, उत्प्रेक्षा, अपह्नुतीत्याद्यलङ्काराः सहृदयानां चित्तम् आह्लादयन्ति।

"**भारतमहिम्नः स्तुतिः**" इत्याख्यः अपरः अंशः। तेलुगुकाव्यवाङ्मये "सीसम्" इत्याख्यं छन्दः अत्यन्तं प्रसिद्धम्। मात्राच्छन्दःसम्बन्धिना वृत्तेनानेन महाकवयः तेलुगभाषायां नैकानि काव्यानि निबबन्धुः। सीसपद्यस्य रागतालयुक्तं गायनं मधुरं चित्तरञ्जकं च भवति। तादृशं सीसच्छन्दः श्रीभाष्यं महाकविः सर्वप्रथमं संस्कृते उपायुनक्। भारतमहिम्नस्तुतौ ४४ श्लोकाः विद्यन्ते। अत्र भारतदेशस्य गौरवं वर्धयितुं येऽहर्निशं प्रायतन्त प्रयतन्ते च क्रान्तदर्शिनः, निर्भीकाः, धर्मपरायणाः, परार्थैकधियः, दीनहीनपतितजनोद्धारणमतयः, राष्ट्रियचेतनाप्रबोधकाः महानुभावाः, तेषां सर्वेषां देशभक्तिपरायणातां, परोपकारतां चाधुनिकलोकम्प्रति ज्ञापयन् पुनः --

"उत्तिष्ठ जागृहि सखे ! चिरकालतस्त्वम्
दुष्टेन दग्धविधिना परिवञ्चितोऽसि
सङ्घर्षणं कुरुत सङ्घटितात्मशक्त्या
प्रोद्धर्तुमुद्यमपराः स्वयमेव च स्वान् ।। (श्लो-३७)"

इत्यादिभिः श्लोकैः जनान् प्रचोदयामास। एतादृश सन्देशाः "उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत, उद्धरेदात्मनात्मानम्" इत्याद्युपनिषदां भगवद्गीतायाश्च वाक्यानि स्मारयन्ति। स्वामी विवेकानन्दः यथा स्वप्रवाचनैः युवकलोकं जागरयितुं प्रायतत अयं महाकविः सहस्राधिकजनान् सन्मार्गम्प्रति गमनाय प्रेरयामास।

In Public domain. Digitization Muthulakshmi Research Academy

ततः **"संस्कृतप्रशस्तिः"** इति विंशतिश्लोकात्मकेन लघुकाव्येन श्रीभाष्यं विजयसारथिवर्यः "तनुध्वं रतिं संस्कृतं भारतीयाः" इति प्रचोदयति भारतीयान्।

"यस्य प्रभावेण भारतीयप्रभा
विद्योततेऽद्यापि निखिलजगति।
यस्य प्रसादेन भारतीयसंस्कृतिः
सर्वोन्नतं स्थानमभ्युपैति ॥ (श्लो-२)"

इति संस्कृतस्य महत्त्वं ज्ञापयन् "हे भारतीयाः तादृशं संस्कृतम् अहर्निशं सेव्यताम्" इत्युपदिशति। "संस्कृतिः संस्कृताश्रया" इति बोधयति।

"उपमा कालिदासस्य" इति लोकप्रसिद्धः। तथापि स महाकविः रचनाकौशलेन, भावसौष्ठवेन भाषामाधुर्येण, सरसाभिव्यक्त्या, सालङ्कृतपदावल्या, प्रकृतिचित्रणपाटवेन, रसपरिपाकेन, अनुपमवर्णनाचातुर्येण सर्वान् अतिशेते। इदानीमत्र श्रीभाष्यं विजयसारथिमहाकविः **"दीपशिखाप्रशस्ति"** इति खण्डिके तत्सर्वं स्मरन् तस्मिन् महाकवौ स्वभक्तिम् इत्थं प्राकटयत् -

"वागर्थानां रसभावानां घटनादीनामतिमाधुर्यम् ।
मधुरभावनासुधया योऽधात् कालिदामहमविरतमीडे॥(श्लो-२०)इति।"

उपमा-रूपक-उत्प्रेक्षा-अर्थान्तरन्यासादिभिः कालिदासप्रीतैः अलङ्कारैः, सुमधुरपदविन्यासेन चायं कविः तं महाकविम् अपूपुजत्।

"यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः सा पुमान् लोके यस्यार्थास्स च पण्डितः॥"

इति खलु चाणक्यनीतिग्रन्थे धनस्य प्राभवं वर्णितमस्ति। "अधनाद्धि निवर्तन्ते ज्ञातयः सुहृदो द्विजाः" इति महाभारतेऽपि धनस्य प्रतिघातः बहुधोपवर्णितः। अत्र श्रीभाष्यं विजयसारथिकविः **"रूपसूक्तम्"** व्यरचयत्। वैदिकसाहित्ये दृष्टां सूक्तपरम्पराम् इदानीमत्र लौकिकवाङ्मये

In Public domain. Digitization Muthulakshmi Research Academy

प्रावेशयत् सः। सः त्रिंशत् श्लोकेषु "रूपस्य" (रूप्यकस्य) विभिन्नगतीन् प्रण्यगदत्।

"तव विना करुणया सामान्यमपि रूप
उद्योगमाप्नोति न च पट्टभद्रोऽपि"(श्लो-९)

इत्यादिना वित्तहीनजनस्य स्थितिम् अवलोक्य सः खिद्यति।

"इन्द्रन्ति चन्द्रन्ति धनदन्ति धर्मन्ति
पुष्पबाणन्ति ते येषां प्रसीदसि इति"(श्लो-२२)

रूपस्य कृपा येषु अस्ति ते इन्द्र इव आचरन्ति चन्द्र इवाचरन्तीति वर्णयति। सन्नन्तधातूनां क्रियापदप्रयोगे तु श्रीभाष्यं महाकविः अतुल्य इति विद्वांसः प्रशंसन्ति। एवमेव विग्रहाराधनद्वेषिणः, चार्वाकभावुकाः नास्तिकाः अपि सर्वथा मनसा त्वमेव समर्चन्ति इति नर्मगर्भैः वचोभिः नास्तिकान् जनान् पर्यहसत् ।

श्रीभाष्यं विजयसारथिमहाकविः वात्सल्ये अनुपमानः। अतिथिपूजने अतुल्यः । करिण्णगरप्रान्ते जुव्वाडि वंशीयजनाः परिपालने, लोकोपकारकरणे सारस्वतसेवायां प्रथितयशसः। तद्वंशकुलोद्भवम् उदारगुणसम्पन्नं परोपकारनिरतं कविपण्डितप्रेमिणं श्रीमन्तं "वरदराय"म्प्रति **"आप्तलेखः"** नाम्ना लघुकाव्यं प्रणिनाय श्रीभाष्यं कविः। काव्यसाहित्ये "लेख"काव्यमपि भवितुम् अर्हतीति सः न्यरूपयत्। अस्मिन् प्रायः १७० श्लोकैः लोके प्रवर्तमानां गभीरां स्थितिं विवृण्वन् लेखां लिलेख सः। अत्र प्रारम्भे जुव्वाडिवंशस्यौन्नत्यं वर्णयित्वा, ततश्च वर्तमानकालदुःस्थितिं श्लोकरूपेण अवर्णयत्।

"यथा श्रुतं यथा दृष्टं वर्णयामि यथामति
लोकवृत्तं विचित्रं ते सश्रद्धमवधारय (श्ला-२१)"

इति लेखस्यास्य रचनायां तस्योद्देश्यं स्पष्टमकरोत्। समाजे साधारणतया मानवानां प्रवृत्तिः द्विविधा भवति साधुत्वमूला, असाधुत्वमूला चेति।

In Public domain. Digitization Muthulakshmi Research Academy

तत्र प्रथमस्तावत् लोके सद्भावान् सञ्चारयति, सद्गुणान् प्रबोधयति, सत्कर्मार्थं प्रचोदयति। द्वितीयस्तु असाधुमूला प्रवृत्तिः लोकान् असाध्वाचरणे, परार्थघाते, स्वार्थसाधने, स्तेयादिना उत्कोचादिना धनसङ्ग्रहणे, नानाविधक्रूरकर्माचरणे प्रेरयति। असाधुशीलाः जनाः स्वस्य देशस्य च घोरम् अहितं विदधति। ते देशस्य, समाजस्य, राष्ट्रस्य चावनतेः हेतवः भवन्ति। एतादृशाः दुष्टजनाः लोकं वञ्चयन्ति सर्वत्रेति अयं महाकविः ''आप्तलेख'' द्वारा स्वाप्तम्प्रति चिन्तां प्राकटयत्। केवलम् आप्त एव खलु श्रुणोति सावधानम् आप्तस्य मनोव्यथाम्, ततश्च तदुपशमयितुं प्रयतते। अस्मिन्नपि महाकवेः देशभक्तिपरायणता पदे पदे अवलोक्यते सहृदयैः। कवेरयम् आप्तलेखः क्षेमेन्द्रमहाकवेः ''देशोपदेश'' काव्यं स्मारयति। श्रीमद्रामायणे कच्चित्सर्गे श्रीरामचन्द्रः एतादृशानां दुष्टजनानां विषये जागरूकता आवश्यकीति भरतम्प्रत्यवबोधयत्। कविरत्र स्वलेखायाम् असाधुत्वप्रवृत्तिं वर्णयित्वा अन्त्ये -

श्रेयो राज्यं समाविर्भवतु जननुतं यातु दुर्भिक्षमस्तम्
राष्ट्रं विज्ञानशक्त्याऽभ्युदयमुदितं प्राप्नुयात् सर्वतोऽपि।।(श्लो-११२)

इति देशस्याभ्युदयमभिकाङ्क्षन् लेखं प्रैषयत् वरदायम्प्रति।

तदनन्तरं **''भ्रातृलेखः''** नाम खण्डकाव्यमस्ति ''भारतभारती'' ग्रन्थे । यद्यपि भावप्रकटने आप्तलेखमेवान्वसरत् कविरत्र तथापि स्वजीवने प्रतिदिवसम् अनुभूतान् प्रत्यक्षीकृतान् नैकान् अंशान् स्वभ्रातरं गोपालं प्रति लेखया अब्रवीत् सः। अत्र लेखे बहुत्र संस्कृतभाषायाः प्राशस्त्यमभ्यवर्णयत् सः -

संस्कृता भारती यस्य नो भाति रसनाङ्गणे।
वाचालोऽपि सा चार्योऽपि मूक एव स्वसंस्कृतौ।। (श्लो-१००)

इति अन्त्ये पुनः -

In Public Domain. Digitization Muthulakshmi Research Academy

नवां शक्तिं नवां प्रीतिं नवमालोकमपि।
श्रेयस्करं नवं सर्वं भगवान् विदधातु नः।। (श्लो-१५४)

इति भगवन्तं देशस्य योगक्षेमाय सम्प्रार्थ्य विरराम सः।

अन्यदस्ति "**राष्ट्रसूक्तम्** ।" अस्मिन् महाकविः स्वार्थचिन्तकाः, कुटिल-स्वभावाः केचन जाति-मत-कुलादीनां वैराणि कल्पयित्वा केवलं निर्वाचनेषु जेतुमिच्छन्ति। किन्तु पुनः भारतस्यैक्यतां ध्वंसयितुं प्रयतन्ते। अतः

"राष्ट्रभङ्गं कर्तुमुद्यतमुग्रवादकबन्धहस्तम्
खण्डयित्वाऽखिल समाजं रक्षितुं प्रोद्युंक्ष्व दुर्गे ।। (श्लो-१०१)"

इति भारतमातरं स्तौति। तदेवेदानीन्तनकाले वयं पश्यामः। तन्निराकर्तुं स्वयंसेवकाः पालकाः अहर्निशं क्षुत्पिपासान् निद्रां स्वास्थ्यं च अविगणय्य प्रयतन्ते। अत्रापि

"कुलविवादो वर्गवादः प्रान्तवादोऽप्यस्तमेतु।
अखण्डभारतराष्ट्रं बहुसमृद्धिभिः प्रवर्धतां भुवि।। (श्लो-९३)"

इत्यादिभिः श्लोकैः भारतस्य वैभवं पुनः प्रवर्धयितुं अभिकाङ्क्षते।

महाकवेः कालिदासस्य कुमारसम्भवकाव्ये आद्यचतुर्षु सर्गेषूपनिबद्धां कथामाधारीकृत्य श्रीभाष्यं महाकविः "**कल्याणकामः**" इति लघुकाव्यं अलिखत्। कालिदासकवितावैभवन्तु असामान्यम्। श्री विजयसारथिः तं कवितावैभवं सरसैः सुललितैः पदैः पुनरुज्जीवयितुं प्रायतत। परमशिवः स्वतपोभङ्गस्य कारणं मन्मथ एवेति विदित्वा तम् अग्निज्वालाभिः भस्मावशेषं चकार। तदा निर्जराः सर्वे सदाशिवं "विश्वकल्याणाय ते तपोभङ्गः सः कर्तुं शिवागम्य दग्धोऽभवत् त्वया , कल्याणः दृष्ट्वैव तेनेदमुत्कृतम्" इति सः भवता क्षन्तव्यः इति च प्रार्थयामासुः। अत एव महाकविः अस्य "कल्याणकामः" इति नामाकरोदिति ज्ञायते।

In Public domain. Digitization Muthulakshmi Research Academy

ततः - एकतः साम्यवादाटोप कवितया
लोकं प्रलोभयन् जीवितं गमयसि।
अन्यतः साम्राज्यवादोपबृंहितैः
सूक्तैः प्रतारयसि शालीनमासान्।। (पु-१४४)

इत्यादिना आधुनिककालीनकवितल्लजान् उपहसति कविरयं **"कविसूक्तम्"** नाम्नि लघुप्रबन्धे। राजशेखरः काव्यमीमांसायां बहुविधान् कवीन् लक्षयति। ततोऽपि कविरयं किञ्चिदग्रे गत्वा

एकतो राजकविरन्यतोऽसि प्रजा
कवि राजिककविरसि प्रायोजककविरसि।
क्रान्तिकवि शान्तिकवि भावकवि हावकवि
भक्तिकवि मुक्तिकव्यादिमैर्नामभिः।। (पु-१४४)

इति विभिन्नैः विचित्रैश्च नामभिः आधुनिकयुगीन कविषु केचन लोकं कथं वञ्चयन्तीति अधिक्षेपं कुर्वन् कविम्मन्यमानाः समाजं यूनश्च कुपथं नयन्तीति स्वचिन्तां प्रकटयति सः।

केवलानर्थकैः कामवादैरेव
मोहयन् वञ्चयसि युवसमाजं कवे।
कतिपयै शबदमयराक्षसैः प्रेरितैः
शालीन चेतांसि बाधयन् गल्भसे।। (पु-१४५)

इत्यादिभिः नैकैः श्लोकैः सः आधुनिककवीन् प्रतिभाव्युत्पत्यभासादि रहितान् शब्दस्मृत्यभिधानकोशछन्दोविछितिहीनान् विलोक्य व्यथितचित्तो भवति सः।

श्रीमद्वाल्मीकि रामायणे उत्तरकाण्डे सारमेयस्य कथा प्रसिद्धा। तत्र श्वानम्प्रति श्रीरामेण कृतः न्यायः, तस्येच्छया तं ताडितस्य विप्रस्य मठाधीशपदे प्रतिष्टापनम् इत्यादि कथाम् आधारीकृत्यायं महाकविरत्र सरसैः सरलैः सालङ्कारैः प्रसादगुणसहितैः पदैः **"कौलेयसूक्तम्"**

In Public domain. Digitization Muthulakshmi Research Academy

रचितायाम्। "कौलेयकः सारमेयः। कुक्कुरो मृगदंशकः। शुनको भषकः श्वा स्यात्" इत्यमरकोषः।

"अनुशीलनम्" इत्यन्यः अंशः यत्र श्रीविजयसारथिपण्डितः लोके चलन्तं जनतन्त्रवादस्य दुःस्थितिं विलोक्य चकितो भूत्वा झटिति समाजात् तदपगच्छेत् इति वाञ्छति। अमितेन क्लेशेन सम्पादिते स्वतन्त्रभारते

"प्रजाराज्यं नूनं विफलमभितो जातमधुना।। (श्लो-५)"

इति सः व्यथिचेतो भवति। उत्कोचं (Bribe) विना न किमपि कार्यं फलति सर्वकारीय कार्यालये, प्रभुता अविनीतिं द्रढयति। उपाध्यायाः, न्यायाधीशाः, वाक्कीलाः, आरक्षकाः, सर्वेऽपि स्वधर्मं विस्मृत्य कुपथगामिनो भवन्ति। स्वार्थचिन्तकाः नेतारः मतदानं धनेन क्रीणन्ति, असत्यभाषणैः जनान् मोहयन्तीत्यादि नैकान् लोके प्रवर्तमानान् अनुशीलयति सोऽत्र। अन्त्ये "अनन्तचैतन्य समुज्ज्वलस्य महासमाजस्य समग्रशक्तेः आविर्भवार्थं कवयः विधिताः मेधाविनः शास्त्रविदो यतन्ताम्" (श्लो-२१) इति सज्जनान् प्रति निवेदयति।

तदनन्तरं भारतभारत्याम् **"परिवादिनी"** इति सुमनोहरं लघुकाव्यमस्ति। अस्मिन् श्रीभाष्यं महाकविः वाराणसीपुरपतिं श्रीविश्वनाथदेवं लोकममुम् उद्धर्तुं प्रार्थयति। २३० श्लोकेषु लोकरीतिं महेश्वरं प्रति सूचयन् विविधरीत्या स्तौति -

य एव विज्ञानसभ्यतादेः महोन्नतं पदमवाप देशः।

स एव देशः क्रमेण नितरामधोगतिं भात्यहो महेश्वर....।।(श्लो-१२४)

इति देशस्य स्थितिं विचिन्त्य तप्तचित्तो भवति सः।

"प्रशान्तजीवन विनिर्मलानि प्रविश्य पल्लीसरोवराणि।

अतीव दूराजकीयमहिषाः प्रभो यथेच्छं विलोडयन्ति।"(श्लो-१३१)

इति पल्लीयवातावरणं कलुषीकुर्वन्ति, तेभ्यः रक्षतु तदिति सविनयं विनिवेदयति अन्नपूर्णाम्। अपायरहितं भयादि रहितं व्यथादिरहितं कर्तुं त्वमेव समर्थ इति स्तौति तम्।

In Public domain. Digitization Muthulakshmi Research Academy

ततश्च **"नमोवाकः"** इति नाम्ना कविः करिण्णगरप्रान्ते सुप्रसिद्धम् इल्लन्तकुण्टक्षेत्रे विलसितं रघुरामं सुप्रभातस्तोत्रेण अस्तवीत्। संस्कृतकवितारसिकानां कृते सुप्रभातकाव्यमिदं मधुरोपहारसदृशम्। बहुग्रन्थकर्तुः उत्तमसंस्कृतकवेः श्रीभाष्यं विजयसारथेः कविताप्रसूनेषु विकसितं नूतनं पुष्पमिदम्। सुप्रभातस्तोत्राणि इदानीन्तनकाले असंख्याकान्युद्भवन्ति। एतेषां सर्वेषां मूलन्तु भगवतः श्रीवेङ्कटेश्वरसुप्रभातस्तोत्रमेवेत्यत्र न सन्देहः। तथापि उत्तमकविना रचितं सुप्रभातस्तोत्रं नूत्नमपि सहृदयानाकर्षति। तत्र केवलं कवेः प्रतिभैव कारणम्। भावसौन्दर्यवैशिष्ट्येन भक्तिपारवश्येन युक्तं रघुरामसुप्रभातं श्रीभाष्यं विजयसारथेः अन्यतममस्ति सुप्रभातमवाङ्मये इति उभयवेदान्तप्रवर्तकाः श्रीमन्तः नल्लां चक्रवर्तुल रघुनाथार्यवर्याः अवोचन्। अनेन ज्ञायते "नमोवाक" काव्यस्य वैशिष्ट्यम्।

तदनन्तरं **"तारावली"** स्तोत्रे सप्तविंशतिश्लोकैः भगवन्तं सप्तगिरिवासिनं पद्मावतीवल्लभं श्रीवेङ्कटेश्वरप्रभुम् अस्तुवत्। अत्र श्रीभाष्यं कवेः यङ्लुङ्गन्तक्रियाः सहृदयान् प्रीणन्ति। यथा -

भारं भो बिभरीभरीति सकलं सम्यक् प्रपन्नात्मनां
भक्तेभ्यो वितदीतदीति विविधान् भोगीन्द्रभीक्षान् सदा
आसक्तोऽपजरीहरीति सुधियां कष्टान्यरिष्टानि तं
सेवे निर्भरभक्तियोगसुलभं श्रीवेङ्कटेशं प्रभुम्।। (श्लो-४)

ततः अयं महाकविः **"पुराणप्रशस्तिः"** इत्याख्ये अष्टादशपुराणानां प्रासङ्गिकतां प्रास्तौत्। वेदव्यासमहर्षिः उग्रतपसा तत्त्वं बोधयितुम् अष्टादशपुराणनिगमान् व्यरचयत्। "विविधैः आख्यानैः विभिन्नविषयैः, बहुभिः गाथाभिः, बहुमुखैः संवादसूक्तैः लोकाय नीतिं शिक्षितुं रचितानि पुराणानि। जन्मनः भव्यं फलं साधयितुं पुराणमपहाय नृणां कृते अन्यत् किमस्ति लोके" इति वदन् सः पुराणानां महत्त्वमवर्णयत्। पुराणेषु

In Public domain. Digitization Muthulakshmi Research Academy
भगवता वेदव्यासेनैव ग्रथितानि सर्वाण्यपि शास्त्राणि किन्तु आधुनिके वेदव्यासं विस्मृत्य पण्डितम्मन्याः तैरेव सृष्टानि सर्वविधशास्त्राणीति उद्घोषयन्ति। तादृशम् अपाकर्तुं कविः पुराणप्रशस्तिं लिखितवान्। तत्रैकमुदाहरणम् -

नूत्नं यत्तु पुरा पुरापि, पुरति पाग्रे प्रयातीति वा
पूर्वं प्राणिति वा, पुराभवमिति, प्रत्नं व्यनक्तीति वा।
पूर्वं प्रापयतीति वा कथयति प्रत्नान् तथाऽर्थानिति
व्युत्पत्तिर्भवतीति शब्दनिपुणा प्राहुः पुराणस्य च।। (श्लो-१२)

ततः **"द्रुतं प्रादुरेधि"** रित्यनेन श्रीमतां अरविन्दमहाशयानां कवितायाः अनुवादं व्यलिखत् महाकविरयम्। विभेदं विवादं प्रचण्डां वितण्डां पुरे अस्मासु कृत्वा राष्ट्रभङ्गं प्रकर्तुं यतन्ते दुष्टाः, तेभ्यः लोकमवतु हे महेश्वरि दुर्गे इति प्रार्थयामास अरविन्दवचोभिः संस्कृतेन।

अन्त्ये **"देहि मे देशाय"** इति गीतेन कारुण्यसिन्धुं दीनजनबन्धुं सकललोकरक्षकं परमात्मानं अखिलप्रजावली आनन्दमयजीवितं यापयति यथा तद्वरं देहीति सम्प्राप्य विरमति। अत्र श्री रवीन्द्रनाथठागुरस्य गीताञ्जलिकाव्यस्य "Where the mind" इत्यादि गेयं स्मारयति।

"लोको विद्या प्रकीर्णञ्च काव्याङ्गानि। लोकवृत्तं लोकः" इति अवदत् वामनः। प्रवर्तमानलोकवृत्तस्य ज्ञानं कवेः कृते अत्यन्तावश्यकम्। तत् सम्यगवगत्य सहृदयमनोमोदाय काव्यं रचयति कविः। तत्रापि केचन महाकवयः काव्यगतविविधप्रक्रियासु काव्यानि संरच्य सार्थकताम् आप्नुवन्ति। गुरुतुल्यानांश्रीभाष्यं विजयसारथिचरणानां काव्यरचनाप्रवृत्तिः एतादृशी एव। तेषां काव्येषु शब्दचमत्कृतिः, अर्थचमत्कृतिः, उपमाद्यलङ्कारवैचित्रिः, भावपुष्टिः, रसस्फूर्तिः, कथाकथनकौशलम्, ताललयुक्तशब्दपाटवम्, व्याकरणशास्त्रवैदुष्यम्, साख्ययोगादि षड्दर्शनानां तत्त्वम्, वेदवाङ्मयानुभूतिः इत्याद्यनेकांशाः सहृदयान्

In Public domain. Digitization Muthulakshmi Research Academy

तोषयन्ति। काव्यशास्त्रकारेषु एकैकः अलङ्कारम्, रीतिम्, रसम्, ध्वनिम्, वक्रोक्तिम्, औचित्यम् लक्षयन्तः तेषामुदाहरणानि विभन्निकवीनां विविधानां ग्रन्थान् आश्रयन्ति, किन्तु तेषां सर्वेषां कृते महाकवेः श्रीभाष्यं विजयसारथेः काव्यानि आश्रयभूतानि'' इति विद्वज्जनैः उद्घोषितम्। तदेवावोचत् राजशेखरः काव्यमीमांसायां ''सर्वगुणोपयोगी महाकविः'' इति।

एवं महाकविना पद्मश्रिया विभूषितेन महामहोपाध्यय बिरुदाञ्यितेन श्रीभाष्यं विजयसारथिवर्येण रचितं ''भारतभारती'' ग्रन्थम् अस्माकं संस्कृतपरिषदा मुद्रापयितुं पूर्वजन्मसुकृतवशात् लब्धम् । तत्रापि केवलं श्रीमतां गुरुचरणानां विश्वास एव कारणम् । वयम् अत्यन्तजागरूकतया सर्वं सम्यक् परिशील्य मुद्रापयितुम् अयतामहि ।

''यदत्र सौष्ठवं किञ्चित् तद्गुरोरेव मे नहि ।
यदत्रासौष्ठवं किञ्चित् तन्मयैव गुरोर्नहि ॥

॥ स्वस्ति ॥

***

In Public domain. Digitization Muthulakshmi Research Academy

Prof.P.VARAPRASADA MURTHY
M.A., Sahitya Acharya, Visarada (Hindi), Vidya Varidhi (Ph.D.)
Professor of Sanskrit
Department of Telugu & Oriental Languages
Dean, Faculty of Humanities & Rector
Acharya Nagarjuna Univerisity, Guntur

"अमृतं मधुरं सम्यक्
संस्कृतं हि ततोऽधिकम्"

इति मुक्तकण्ठं श्लाघ्यमानायां सुरभारत्याम् आधुनिकभारते आधुनिकयुगे अर्थात् विंशे, एकविंशे च शताब्दे महाकाव्यरचनापरम्परा समनुवर्तते इति समेषां सहृदयप्रवराणां भूयान् सन्तोषावसरः ।

अथ कालिदासादिमहाकविभिः समारब्धां महोन्नतमहाकाव्य-प्रणयनपरम्पराम् अनुसरद्भिः कविपुङ्गवैः महाकाव्यानि समालिख्यन्ते इति सर्वेषां भारतीयपौराणां प्रमोदस्य स्थानमास्ते । किञ्च -

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं लोके शक्तिस्तत्र सुदुर्लभा ।।"

इति लक्षिता कवित्वबीजरूपा शकत्यपरपर्याया प्रतिभा तावत् द्विधा संप्रवर्तते - भावयित्री प्रतिभा, कारयित्री प्रतिभा चेति । एतदुभयविधोत्कृष्टप्रतिभावत्सु, अपारयशःसम्पन्नेषु कविवरेषु अग्रगण्याः समुल्लसन्ति तत्रभवन्तः श्रीमन्तः श्रीभाष्यं विजयसारथि-महाशयाः । दक्षिणभारते वर्तमानतेलङ्गाणराज्ये करीम्नगर-मण्डलान्तर्गते चेगुर्तिग्रामे तत्रभवत्योः गोपमाम्बा-नरसिंहचार्याख्ययोः पुण्यदम्मत्योः १९३६ तमे वर्षे मार्चमासस्य दशमदिनाङ्के लब्धजन्मानः

In Public domain. Digitization Muthulakshmi Research Academy

श्री श्रीभाष्यं विजयसारथिमहाभागाः । आबाल्यं प्रथमगुरोः स्वमातुः श्रीमत्याः गोपमाम्बायाः निरतिशयप्रभावपात्राण्यभूवन् श्रीसारथिवर्याः। बाल्यकालादारभ्य सुमधुरसुरभारतीकविताप्रणयनं प्रारभन्त । एकादशवर्षे 'शारदापदकिङ्किणीं', षोडशवर्षे 'शबरीपरिदेवनम्', सप्तदशवर्षे 'मनोरमाभिधां नवलां, संप्राप्ते द्वाविंशे वर्षे नैकविधकाव्यानि व्यरचयन् श्रीसारथिमहोदयाः ।

अपि च वरङ्गल्नगरे विद्यमानायां श्रीविश्वेश्वरसंस्कृतान्ध्र-कलाशालायाम् आदर्शविद्यार्थिजीवनं यापयित्वा विविधशास्त्राण्यधीत्य तत्रैवोपान्यासकपदं व्यभूषयन् इति उल्लेखनीयः विशेषः ।

भारतदेशस्य नानाप्रान्तेषु समायोजितेषु अखिलभारतसंस्कृत-कविसम्मेलनेषु बहुधा भागं गृहीत्वा हृद्यम् अनवद्यञ्च स्वकवितागानमकार्षुः । २०२० तमे वर्षे भारतसर्वकारीयैः **'पद्मश्री'** रिति पुरस्कारेण पुरस्कृताः इति समेषां सचेचसां प्रमोदावहः विषयः।

श्रीमन्तः विजयसारथिवर्याः न केवलं कवितारचनाधुरन्धराः अपि तु सुविमर्शकाश्च विभान्ति । ''संस्कृतरूपकेषु नान्दीप्रस्तावनाः'' इत्यनेन कृतिविशेषेण सुविमर्शकरूपेण सुस्थिरं स्थानं समधिगतवन्तः। तदुक्तम् --

''विमर्शः, कविता चेति द्वन्द्वं यदि सुसङ्गतम् ।
प्रसुवीत रसं हृद्यं संमोदाय सचेतसाम् ।।'' इति ।

साम्प्रतं पुनः मुद्राप्यमानस्य ''भारत-भारती'' कृतिविशेषस्य कृते स्वर्णपदकं विजित्य विद्वज्जनप्रशंसाभाजनम् अभूवन् श्रीसारथि-

In Public domain. Digitization Muthulakshmi Research Academy

महाशयाः । 'भारत-भारत्यां' रचनायाम् अपूर्वः प्रयोगः विहितः सन्दृश्यते । तेलुगुसाहित्ये 'कविसार्वभौम' उपाधिना बहुधा प्रकीर्तितस्य श्रीनाथमहाकवेः प्रियं सीसपद्यं संस्कृतसाहित्यरसिकेभ्यः उपायनीकृतवन्तः श्रीमन्तः विजयसारथिकविपुङ्गवाः । 'भारत-भारती' संज्ञके कृतिरत्नेऽस्मिन् त्रयोविंशतिसंख्याकाः खण्डकाव्यकविताकदम्ब-विशेषाः विलसन्ति । एतेषां कविवराणां शैली तु प्रसन्नगम्भीरा, माधुर्यौजः प्रसादगुणगुम्फिता, सालङ्कृता च समुल्लसति ।

"भारत-भारतीन" कृतिविशेषस्य पुनः प्रकाशनय महान्तं प्रयासं कृतवद्भ्यः भाग्यनगरस्थसंस्कृतपरिषदः निदेशकवर्येभ्यः सुहृन्मणिभ्यः आचार्येभ्यः श्रीमद्भ्यः के.नीलकण्ठम् महोदयेभ्यः भूयांसि अभिनन्दनानि समुल्लसन्तु ।

इत्यं

बुधवरविधेयः

पि.वरप्रसादमूर्तिः

गर्तपुरी,

दिः २६-०२-२०२१.

In Public domain. Digitization Muthulakshmi Research Academy

INTRODUCTION

Prof.P.Sri Ramachandrudu

"A good poem comes; occasionally out of the fertile brain of a poet of institution (but is not produced)", declares Bhamaha.

"काव्यन्तु जायते जातु कस्यचित् प्रतिभावतः"(Kavyalankara 1.5)

Sri Vijaya Sarathi is one of such very few gifted poets and his works bear ample testimony to his Pratibha. Pratibha works in different ways in different spheres and in the case of a poet it is defined by Panditaraja as "the quick presence of words and meanings useful for the composition of a Kavya."

"सा च काव्यघटनानुकूल शब्दार्थोपस्थितिः"(Rasagangadhara P.9)

The careful selection of words, the easy flow of the language, the deft handlings of different metres in both Matra Chandas and the Ganachandas and the Prasadaguna (Prespecuity of the meaning) that are found in every poem of Sri Vijaya Sarathi give a feeling to the reader that he is reading in the art of writing poetry with a though knowledge of the idiom of the language, unlike many of the modern Sanskrit poets who are unable to catch the idiom of this great ancient language and are often influenced by the regional language which they speak.

The present work "Bharata Bharati" is a collection of 23 khandakavyas composed by Sri Vijaya Sarathi with their length varying from 8 verses to 170 verses, some of which were already published as small poems.

The five Laharies of Panditaraja Jagannatha are too wellknown to need an elaborate description about their

In Public domain. Digitization Muthulakshmi Research Academy

contenents and their nature. As all of them are composed in priase of one God or the other suggesting the Rati (Bhakti) of the poet, he declares that all his five Laharies can be taken as examples for *Prabhandhagata Bhavadhvani*.

''मन्निर्मिताश्च पञ्चलहर्यो भावस्य'' (R.G.,P.314)

Committed as he is to the Navarasa-theory without giving the status of rasa to Bhakti he had to be content with citing his five Laharies as examples for Prabandhagata Bhavadhvani only. After putting up very strong arguements in favour of Rasatva of Bhakti, Panditaraja rejects them on a slender reason that Bharata is not in favour of accepting more than nine Rasas. In his heart of hearts he must be in favour of Rasatva of Bhakti and therefore we can accept his five Laharies as examples for Prabandhagata Bhakti Rasa, coming back to the point on hand all these Khanda Kavyas and the Suprabhata-stories etc., addressed to the different deities include in this work can be declared as fine examples for Prabhandhagata Bhakti Rasa, because the great devotion (Bhakti) for the Mother India (Bharatamata) is flowing as an under current throughout every verse of these poems, and Bhakti to the Gods in the stotras.

In the *BHARATISUPRABHATAM* of 44 verses the poet describes the beauty, greatness and spiritual supremacy of India and at the end declares with confidence that his poetry is as sweet as the pleasant notes of the cuckoo..........

रसालपल्लवग्रास-विकस्वरपिकस्वरा

भारतश्रेयसे भूयात् - वाणी विजयसारथेः (पु. ८)

In the *BHARATA BHARATHI* of 60 verses, the poet expresses his strong desire that every Indian, irrespective of his religion, caste, creed and status should strive hard to restore this great country to her earlier glory. Let every one

In Public domain. Digitization Muthulakshmi Research Academy

feel that he is the son and servant of Bharatamata, wants the poet ....

कुलान्तरावलम्बिनो मतान्तरावलम्बिनो
वसन्ति येऽधिभारतं सभाजयन्तु ते सदा
स्वभारतीयभावनां स्वभारतीयसंविधां
स्वभारतीयशासनं स्वभारतीयसंस्कृतिम्
धनाधिकारिणोऽपि वा धराधिकारिणोऽपि वा
मताधिकारिणोऽपि वा पदाधिकारिणोऽपि वा
वयं समेऽपि सर्वदा पवित्रभारताम्बिका
पदारविन्दसेवका इति स्म शासतु स्वयम् ।।

Every citizen who discharges his duties carefully, has equal right to enjoy the wealth of this country..........

स्वयंसमृद्धिसाधने समे समाधिकरिण
स्स्वयंश्रमार्जिते धने समे समानभागिनः
स्वजातिसम्पदुन्नतौ समे समानुरागिण
स्समुन्नता जगन्नुता भवन्तु भारतास्सदा ।।

In the small poem *MATRUDESAM PRINAYANUJA* the poet feels strongly that all distinctions based on class, caste, creed and profession etc., are the creation of the selfishness..........

धनिकनिर्धनभेदवैरं वर्गकलहं द्रोहचिन्ताम्
स्वार्थबुद्दिं पक्षपातं क्रोधमीर्ष्यां मनुज दूरय
कृषककार्मिककष्टजीविस्वच्छहृदयं मा निपीडय,
कृषककार्मिक हृदयदुःखे खिद्यति ध्रुवमेष लोकः ।।

In Public domain. Digitization Muthulakshmi Research Academy

उच्चनीचविभेदबुद्धिः स्वार्थनिरतैः कल्पिताऽनुज

उच्चनीचविभेददृशया मातृभूमिं मा कलङ्कय (पु.१९)

In the SANKHARAVA of 80 verses, the poet advocates, socialism in preference to capitalism.........

सदा पुरस्कुरू समत्ववादं हृदा तिरस्कुरू नीवीवादम्

स्वयं प्रशासनकृतकृत्यस्त्वं वयस्य शिष्टिं ब्रूहि परस्य ॥प्र॥

He also feels that no policy of appeasement of an enemy would bring the desired result...............

अरण्यरुदितं भस्मनि निहुतं परासुपूजन मम्बरहर्म्यम्

अथ द्विषं प्रति प्रशान्तिपाठो मुधा प्रयासं जनयति नूनम् ॥ प्र ॥

It is a fine example for Nidarsana.

In the *USHASSUKTAM* of 21 verses the poet gives a graphic pen picture of the corrupt present day society through the use of figures like Upama, Utpreksa and Apahnuti etc.

"The parrots are making loud noise like the leaders on platforms. The crows are crying like the people agitating with demands. The bees are deserting the lilies and never around the lotus like the people of selfish attitude who leave the man, out of power and go to the man in power."

वेदिकास्विव नायकास्तरुशाखिकासु रूवन्ति कीराः

चलति चान्दोलनरतामितकामरुतमिव काकविरुतम्

स्वार्थनिरताः पदविरहितान् नायकानिव पदविलसितान्

कैरवाणि विहाय मधुपा विकचकमलान्याश्रयन्ते ॥ (पु.३०)

In his *BHARATAMAHIMNASTUTI* of 44 verses the poet praises some of the great sons and daughters of India beginning with Bharata and including the great personalities

In Public domain. Digitization Muthulakshmi Research Academy

like Jhansi Laxmi, Lajapat Roy, Gandhi and others. The first four verses are written in a metre called "Sisam" which is one of the metres used only in Telugu. This long metre comes under Matrachandas and it consists of two verses-one long which is called "Sisam" followed by a small metre, either Ataveladi or Tetagiti. Its graceful movement can be enjoyed only when it is recited with correct pauses at proper places. The following verse may be cited as an example.......

यत्राभ्रतलचुम्बितुङ्ग शृङ्गावलि-श्शीताचलस्सालवद्विभाति

यत्र मन्दाकिनी धुंधुंमस्वनदूर्मि-रापुनाना हृदयानि वहति

यत्रार्षभारती चिदचिदीश्वरतत्व-सन्दर्शनी विजरीहरीति

यत्र संस्कृतभारतीज्ञान-तेजोऽन्यखण्डेषु तन्तनीति

विश्वमङ्गलपावनोदारचरित-मगणितानन्तधनधान्यभाग्यराशि

मिहपरानन्दसन्दोहसंविधायि-पूर्णभारतमानतोऽस्मि

Telugu has adopted many Sanskrit metres like Utapalamala, Champakamala, Sardulavikriditam etc., Introducing some of the Telugu metres into Sanskrit would be welcomed by Sanskritists as a special contribution by this poet.

In the last nine verses of this poem the poet strongly attacks the untouchability and says that those who call some people who are the most useful members of the society as untouchables should be given very severe punishment.

SAMSKRITA PRASASTI in 20 verses with two Sisa Padyas, bring out the greatness of Sanskrit. The poet says no language would die unless the race to which it belongs dies....

स्वजातेर्जीवनेनैव स्वभाषा जीवति ध्रुवम्

मृता यदि भवेत् जातिस्सैषाऽपि मृतिमाप्नुयात् ।।

In Public domain, Digitization Muthulakshmi Research Academy

In the *DIPASIKHA PRASASTI* of 24 verses the poet pays his tributes to the poesy of the great poet Kalidasa.

RUPASUKTAM in 30 verses is a fine satire on the contemporary society which has no God excepting the Rupa (Rupees).

"Depending upon the changing mood of the Rupee towards persons if one becomes king, another becomes servant. If one is praised as brave another is condemned as timid."

भूपायते कोऽपि भृत्यायते कोऽपि
धीरायते कोऽपि भीरूयते कोऽपि
तव दृङ्निपातस्य तारतम्येनैव
उच्चावचं भवति जगदिदम्

"Even the iconoclasts worship your form in their minds and the atheists talk of luck while aspiring for you."

विग्रहाराधनद्वेषिणो ये केऽपि
तव विग्रहं रूप ! मनसा समर्चन्ति
चार्वाकभावुका अपि रूप ! नास्तिका
अस्त्यदृष्टं चेति विश्वसन्ति ध्रुवम् (पु. ५१)

APTALEKHA of about 170 verses of different metres is a letter addressed to a friend. The first 37 verses are devoted to eulogising the friend addressed. In 100 verses the poet tells his friend about the bad conditions prevailing in the Society of today and this description reminds one of the *DESOPADESA OF* Ksemendra. The sufferings of the poor the plight of the middle class people, the atrocities committed by the landlords and the capitalists on the labour class and the workers, the misdeeds of the unprincipled self-seeking

In Public domain. Digitization Muthulakshmi Research Academy

politicians, the unlawful practices of the lawyers, extraction of money by the doctors, neglect of their duties both on the part of teachers and students, corruption prevailing at all levels administration all these are described in a very effective manner. The poet predicts that the volcane in the hearts of the suppressed is going to erupt shortly...

वर्गवैरं समुत्पाद्य दरिद्रेषु मुहुर्मुहः
साधयन्ति निजेष्टानि मृषामित्रणि नायकाः
दारिद्र्यदाहसन्तप्ते हृदये श्रमजीविनाम्
सन्धुक्षिता विभिद्यन्ते नित्यं कोट्यग्निपर्वताः
दरिद्राणामतिम्लानदृक्कोणाश्रुबिन्दुतः
एकैका ज्वलनज्वाला दग्धुमायाति वञ्चकान् (पु. ५९)

The poet devotes in this poem about 25 verses to express his idea of a Kavya. Whatever may be the type of language, (Granthika or Vyavaharika as distinguished by the writers in Telugu) and the branch of literature that which moves the reader is a good kavya. If factual statements alone are to be taken constituting Kavyas, why, every newspapers can claim that it is a Kavya, states the poet......

गेयं वा यदि वा पद्यं ग्रान्थिकं व्यावहारिकम्
स्पन्दस्य न विना शक्तिं साहित्यपदभाक् भवेत्
यथावच्चित्रणं कैश्चित् कवित्वमिति गीयते
तदेव परमार्थश्चेत् पत्रैः किमपराध्यते ।। (पु. ६४)

BHRATRILEKHA in 158 verses is almost on the same lines as Aptalekha with only the difference that is addressed by the poet to his brother and about 50 verses from beginning are devoted to give a brief history of the poet's parentage and

In Public domain. Digitization Muthulakshmi Research Academy
family etc. Rest of the poem describes the ways of the world. The poet expresses his dismay and distress over the deteriorating moral standards in the society and the neglect of the great culture built up over a period of many Millenniums in this country. Once a very strong nation, this country has to face all the humiliations because it has lost vitality and the senses of selfsacrifice and the poet feels that Buddhism is largely responsible for weakening the country.

यदैव बौद्धैन मतेन देशे पदं समाक्रान्तमिह प्रजासु
तैजस्सहोवीर्ययशोबलानां ह्रासाय नान्दी घटिता तदैव

NAMOVAKA in 149 verses is written in praise of Sri Rama, the presiding deity of a temple in a place called Illandakunta.

In the राष्ट्रसूक्त of 133 verses the poet describes the greatness of Mother India who had produced great sages, scientists, administrators and warriors. The poet wishes long life and prosperity to the women working in the fields along with their husbands and to the men engaged in performing sacrifices and thus purifying the atmosphere, in the following verses :-

फालतलसिन्दूरतिलका वेष्टनाञ्चितकर्णनासाः ।
अंशुकेनाबद्धमध्याः काचकङ्कणकालितहस्ताः ।।
पाणिनिहित सवीजपिठरा जानुलम्बितफालवसनाः ।
श्रान्ति शक्ति सजीवमूर्तय इव कृषीवलदेवता इव ।।
भर्तृभिः सीतासुबीजावापकर्मणि मूद्धहस्ताः ।
कृषिकमहिला घर्मजललवलालिताङ्गस्ता जयन्तु ।। (पु. ९४)

Who can say after reading these poems that the taking workers have no place in sanskrit literature ? No

In Public domain. Digitization Muthulakshmi Research Academy

member of the society is ignored even by ancient poets like कालिदास and who refer to the शालिगोप्री gamblers and everen thieves.

How the Homadhuma purifies the atmosphere has been proved during the great disaster caused by the gas-leakage in Bhopal which is reminded by the poet in the following verse.

विविधहेमस्तोम धूमविधूतवातावरणकलुषाः
ज्ञानयज्ञव्रतधुरीणाः श्रैतिनो विप्रा जयन्तु

In the poem कल्याम काम of about 1200 lines the poet narrates the story of the first four sargas of Kumarasambhava of Kalidasa with a slight change. After reducing Manmatha into ashes siva does not disappear. At the compassionate indirect intervention of Parvati he brings back manmatha to life.

इति विरुदतीमिमां मपणोद्यतां रतिं
पार्वती करुणार्द्र मानसा बाष्पाम्बु
मोचमाना प्रियं स्वविलग्नचेतसं
तरूणेन्दुशेखरं व्यालोकयामास
पार्वतीदुःखेन चकितचकिताकुल
स्वान्तो नुतप्तइव शंकरो रति माह
मदनसुन्दरि साध्वि दृङ्मात्रगोचर
स्स्यात् यथा तव पतिस्सच तथा दीयते

The pleasant style of the poem makes even the well-known story as though it is being narrated for the first time.

In Public Domain. Digitization Muthulakshmi Research Academy

कविगुरुतम् in 33 couplets is a fine picture of the split-personality of the present day poet who does not have any firm-conviction, his only aim being to get the applause and honours. In one place he claims to be साम्यवदिन् and in other place to be साम्राज्यवादिन् He is प्रजाकवि in some place and राजकवि in different gromps.

अयि कवे जानाति को नाम नामानि
प्रतिकलं भिन्नानि तव रूपधेयानि
एकत स्साम्यवादाटोपकवितया
लोकं प्रलोभयन् जीवितं गमयसि
अन्यतस्साम्राज्यवादोपबृंहितै
स्सूक्तैः प्रतारयसि शालीनमानसान्
एकतो राजकविरन्यतोऽसि प्रजा-
कवि राजिकवि रसि प्रायोजकविरसि
क्रान्तिकवि शान्तिकवि भावकवि हावकवि
भुक्तिकवि मुक्तिकव्यादिमैर्नामभिः ।।

While singing the important of the individual in one place he praises the community saying that it is the most important while condemning the divisions based on caste, creed and religion he creates new classes like the workers and the intellectuals.

व्यक्तिरेवाग्रणीरित्येकतो वदसि
सत्यं समाज इति व्यक्तिं विदूषयसि
कुलवर्गभेदादिमेकतो निन्दंश्च
श्रमजीविमतिजीविकुलगणान् कल्पयसि ।।

In Public domain. Digitization Muthulakshmi Research Academy

While claiming himself as the poet of the masses he never stores out of the air conditioned rooms.

प्राज्यकविमात्मान मेकत: प्रकटयन्
अविदितातपतापलेशस्सुखान्येपि ।।

This poem reminds one of the works like नर्ममाला of क्षेमेन्द्र of the 12th century.

In the कौलेयसुक्त of about 100 lines the poet narrates the story of a dog as found in the 7th kanda of Ramayana. Who was beaten by an arcetic and goes to the court of Sri Rama with a complaint against the arcetic and ultimately requests Sri Rama to appoint him the arcetic as the manager of a temple or Matha by way of punishment.

In the poem अनुशीलनम् of 18 verses the poet laments over the corruption rampant in every walk of life especially in the governance of the country. "No work is done without taking bribe. The government is second to none in this respect. There is no relation between words and deeds" says the poet.

विनोत्कोचं कार्यं न फलति किमप्यल्पमलघु
प्रभुत्वं सर्वत्र प्रसभमविनीतिं द्रढयति
क्रियावाचोर्नूनं न किमपि च बान्धव्यमधुना
व्यवस्था दुष्टैषा कथमपि समैक्यं द्यति नृणाम् ।।पु.१३६)

In the poem परिवादिनी of 230 verses the poet praises maheswara and seeks his protection. He tells him how Sanskrit poetry and Indian Culture are being denigraded how this great country of ours which had once reached the great heights in every field is sinking into low level and how

In Public domain. Digitization Muthulakshmi Research Academy

neither the teacher nor the taught are sincere in their respective duties and functions-

उदात्तसंस्कृतकवीन्द्र कवितासुधाधुना शिव विषायते भुवि
स्वभारतीयप्रशस्तधर्मप्रशस्तिरधुना तृणायते भो । (पु. १२२)

य एव विज्ञानसभ्यतादेर्महोन्नतं पदमवाप देशः
स एव देशः क्रमेण नितरामधोगतिं यात्यहो महेश्वर ॥ (पु.१२५)
गुरुर्न शिष्यं प्रबोधयति सौमनस्यरीत्या गुरुरं न शिष्यः ।
विधेयवृत्या प्रवर्तमानो निषेवतेऽस्मिन् युगे नवीने ॥ (पु.१२९)

तारावली is a poem of 27 verses composed in praise of the lord Venkateshwara. Here is a beautiful verse with यङ्लुगन्त

भारं यो बिभरीभरीति सकलं सम्यक् प्रपन्नात्मनां
भक्तेभ्यो वितदीतदीति विविधान् भोगीन्द्रभीक्षान् सदा ।
आसक्तोऽपजरीहरीति सुधियां कष्टान्यरिष्टानि तं
सेवे निर्भर भक्तियोगसुलभं श्रीवेङ्कटेशं प्रभुम् ॥

द्रुतं प्रादुरेधि in 26 verses, is a free rendering of Sri Arabindo's poem in which the goddess Durga is invoked to destroy all the bad elements troubling this country and save it.

The last poem (Gita) 'DEHI ME DESAYA' in 11 liens reminds one of the famous Gita - "Where the mind" etc., of Rabindranath Tagore.

There are many theories in literary criticism (Alankara Sastra) claiming important to one of the different constituent elements of Kavya like the Alankara, Riti, Rasa, Dhvani, Vakrokti etc., while trying to maintain the important of one

In Public domain. Digitization Muthulakshmi Research Academy

element is a kavya, the critics are aware of the fact, that other elements also are required for the perfection of a Kavya; that is how we find every critic citing the works of the same poets like Kalidasa, Bhavabhuti and others to establish his theory. Thus all these items should be seen as complementary but not opposed to each other. In every poetical piece of Sri Vijaya Sarathi, one can see beautiful Alankaras, Rasa and Dhvani etc., and the poet appears to justify the statement of Vamana "Ritiratma Kavyasya" in maintaining which is a past master.

While being sure that this work will be highly appreciated by the sahridayas. I would like to suggest to Sri Vijaya Sarathi to present a Mahakavya also to the Sanskrit world.

Dr.P.Sri Ramachandrudu
Professor of Sanskrit (Rtd)
Osmania University,
HYDERABAD

In Public domain. Digitization Muthulakshmi Research Academy

अभिनन्दनं

अयिभोः प्रियसुहृदस्सहृदयाः । समयेऽस्मिन् समेऽपि केन्द्रशासकाः प्राक्तनम् अस्माकं भारतभूम्याः भगवत्याः गौरवम् अमरभारतीप्रभावमूलकमेवेति सम्यग् विज्ञाय तत्परित्राणाय नक्तंदिवं व्याप्रियन्त इति हर्षप्रकर्षाविष्कारकोऽयं विषयः । एते हि बहुलक्षसंख्याकानि व्ययीकृत्य द्रविणानि श्रमभरं निर्वहणजन्यम् अविगणय्य प्राचीनकलाचारसंस्कृतीरभिवर्धयितुम् अधिकतरम् आवेदयमाना वयं शासकानां भगवदनुग्रहात् निरवग्रहाम् अभिमतार्थसिद्धिं कामयमाना वर्तामहे ।

''एति जीवन्तमानन्दो नरं वर्षशतादपि-जीवन् भद्राणि पश्यति'', इत्यादिर्नयसुरद्रुमः नियतमभूत् अस्मद् विषये सम्यक्फलितः। डिल्ली नगरात् आवश्यकं निर्वर्त्य कृत्यं प्रत्यावर्तमानाः स्वपुरं वयं मध्येमार्गं हनुमकोण्डपुरे अद्राक्ष्म सुहृदः सहृदयान् कतिचित् अतिथिसत्कारपरमान् । एष्वन्यतमः नाम्ना विजयसारथिः अदूष्य वैदुष्यपरिष्कृतः कवितल्लजः देशभक्तिसंपत्तिसमृद्धः स्वकीयमचिरात् अपेक्ष्य वृत्तपद्यानि सुलभम् उत्साहजनकं च गीतात्मना परिणत मित्यभिसंदधानः अहो । वैशद्यं धीमतोऽस्य प्रशंसार्हम् । आपादचूडं तदिदमवालोकि । दर्शनसमसमयमेव गुणगणरिम्णा तदिदम् अजनयन् मे मतिम्, संस्कृतप्रचाराय बद्धश्रद्धैः भारतशासकैः ग्रन्थरत्नम् अवश्योपादेयतया प्रकाश्यं समग्रादरभारार्हं चेति । तदेतत् सत्यापयितुं कतिचन गीतात्मकानि पद्यानि स्थालीपुलाकन्यायादुदाजिहीर्षामः रसिकजनमनोविनोदाय । एतदीयं वर्णनसरणिरामणीयक मतिवर्ततेतरां प्रकृतेरपि कामनीयकम् इति निश्चप्रचम् आचक्ष्महे ।

In Public domain. Digitization Muthulakshmi Research Academy

गगनवनमनुविश्य तारा सेनया सह तदनुराजा

अरूणभिन्ने तिमिरकरिटिनि तद्विशीर्णा इव गलंति

जलतरङ्गमृदङ्गवंशीमधुररसितैः प्रकृतिकान्ता

अखिलास्वपि कलाशालासु अध्यापनारम्भसमये बालकैः बालिकाभिश्च सम्भूय इमानि स्तोत्ररत्नानि यदि स्युरवश्यं गेयानि तर्हि नियतं श्रीमत्याः भारतमातुरनुग्रहात् अकलुषा शेमुषी सति पथि मतिः रतिरमरभारत्यां, सदाचारसंपत्तिः समुदितमेतत् संपद्येतेति विश्वसिमस्तमाम् । कुसुमसुकुमारपदविन्यासपेशला भावगभीरा सर्वालंकारपरिकर्मिता सुवृत्तदन्तुरेतरा उदाररीतिमेदुरा समिद्धपदवन्ध-बन्धुरा अनल्पकल्पनापरा रसोर्मिभिर्विकस्वरा कविता नृत्यन्तीव मानसोल्लासमाकलयमाना कस्य वा सचेतसः प्रीतये न प्रभवति शुभतमगीतात्मिकेति विदांकुर्वन्तु सुधियः । दिविषद्भाषापरिपोषणाय मन्यामहे वयमीदृंशि सहस्त्रं गीतकाव्यरत्नानि कामम् आविर्भाव्यानि शासकमहाशयैः प्रोत्साहनोत्पादनद्वारेति ।

अस्मै सचेतसे विदुषे च शास्त्राणि संस्कृतसाहितीवल्लभाय कृषीष्टविष्टरश्रवाः भगवान् आयुरारोग्यमैश्वर्यं औत्सुक्यं च सद्ग्रन्थनिर्मितावनवरतमित्याशास्महै ।

इति

पंडितराज-शास्त्र रत्नाकर-

महामहोपाध्याय

के । एस् । कृष्णमूर्तिशास्त्री

प्राक्तन संस्कृतास्थान कविः, मद्रास्

In Public domain. Digitization Muthulakshmi Research Academy

अभिनन्दनम्

सुहृद्वरः श्रीमान् अयं विजयसारथिः स्वयंवृतस्सरसकविता मत्तकाशिन्या चकास्ति सुतरां कविराज बुधमित्र गुरुभाव सम्भावितः नवनवोन्मेषशालिनी च अदसीया प्रज्ञा बहुविधरमणीयभावप्रसूतिं प्रति दिवसमाकलयन्ती अपि स्वीय स्वाभाविक नित्यनूतन मुग्धाकृति वैदग्ध्य भङ्गप्रसङ्गमीषदपि न क्षमत इति महदिदमाश्चर्यमावहति। अतिपुरातनीं पैतामहीमपि गैर्वाणीम् अत्याधुनिक भव्यसामाजिक भावनाभामिनीभी स्समं साहितीशोभनाङ्गणे साधु नर्तयन्नयं कविराजः साम्प्रतं संस्कृतसरस्वत्याः प्राणदेषु सर्वथा प्रथम परिगणनीयतां खल्वात्मनः प्रकाशयति। बहोः कालाद् भारतेऽस्मिन प्रविमलसुरभारती पदविनिर्गलन्माधुरीसारमहिमानं प्रणयेन महता प्रचारायन्नयं बुधशेखरः अमरभारतीसमाराधनतत्पराणामर्हत्यभिनन्दनपरम्पराम्।

मित्रमणेः अस्यैव विजयसारथेः पद-संसर्ग-सुमुद्भूता-मन्द-सुन्दराकृतिर्मन्दाकिनी कृतिः इतः पूर्वमेव लसदलङ्कृतिवस्तु रसोज्वलत् त्रिपथगा सती गीर्वाणवाणी विलासापरिचयाभाग्यभाजां भावुकचक्रवर्तिनां काव्यरसपिपासां रामयन्ती मुहुर्मुहु र्जनयन्ती च सुतरां स्वैरिणीव सर्वत्र समुदञ्चित सञ्चारा विराजते स्म। इयञ्च अधुना प्रकाश्यमाना भारतभारती बहूनां सौन्दर्यभारभङ्गुराणां सहृदयहृदयपश्यतोहराणां भावदृश्यानां प्रसारणमातन्वाना विविधरमणीयनूतनवस्तुप्रदर्शनशालेव वैदुषीलोचनवैभवशालिनां चित्तमावर्जयति।

प्रथममेव तावत् पाठकप्रवराणामक्षिपथे अवतरन्ती भारती सुप्रभातकविताखण्डिका भारतस्य दिव्य क्षेत्र-मन्त्र-तन्त्रादि महिम प्रदर्शनमाचरन्ती क्रूरतिमिरासुरवरालिहननोऽद्यत कालहरि प्रहित मिहिरबिम्बसुदर्शनास्त्रप्रभृति प्रतिभापाटवसम्पादित बहुविधभव्य

In Public domain. Digitization Muthulakshmi Research Academy

दृश्यानि भावनाचक्षुष्मतां पुरस्तादुपस्थापयति । अथ च भारतभारती लोकोत्तरभङ्गी सङ्गता सह सचेतसां श्रवणाञ्जलिपुटपेयं सन्देशामृतं ''स्वादुस्वादु पदेपदे'' इति साधुवादार्हसमन्तात् समभिवर्षति - यथा

नटेशताण्डवोन्नटन्निठाललोचनाज्चलत्
करालकीलमालिकाविलोललोचनाश्रिया ।
प्रसह्यदग्धविद्विषच्चमूचयानिरामयाः
अवन्तु भातप्रजाः स्वतन्त्रभारतप्रभाम् ॥

नैकाश्च इल्लन्दकुन्ट जम्मिकुन्ट प्रभुसुप्रभातादिकाः कविता खण्डिकाः कवेरस्य अन्तरान्तरप्रच्छन्नपरमपुरुषभक्तिभावना पारवश्य-मभिव्यञ्जयन्त्यः प्रेमार्द्रान्तःकरणानां पाठकानां उपमानपदमध्यारोपिता आधुनिकजनता जीवनभङ्गी समनसां सुमनसां सम्मोदातिशयं सृजन्ती परांकोटिमाटीकमानां कवेरस्य कमनीयवर्णनानैपुणी नितरां ननु निरूपयति । अथ च डमरुक शिवताण्डवादि रचना गलन्माधुरीपूरसारः स्वयमेव साहितीमित्रैस्समनुभाव्यः इति नात्र प्रस्तूयते । सर्वथा सर्वविद्वत्कविसमभिनन्दनमर्हतीयं भारतभारतीति आवेदयति ।

मरिंगटि श्रीरंगाचार्यः
आचार्यः
श्रीवेंकटेश्वर वेदान्तवर्धनी संस्कृत महाविद्यालयम्,
हैदराबाद

In Public domain. Digitization Muthulakshmi Research Academy

सौहार्दसम्भावना

दुर्घटयोः यदि भवति सामानाधिकरण्यमेकत्र, तर्हि कस्य न विस्मयः स्यात् सचेतसः ??

तदिदं ईक्षमाणाः श्रीमति विजयसारथिमहोदये प्रियसुहृदि शास्त्रवैदुष्यनिर्मल काव्यकलाविलासयोः ऐकाधिकरण्यं परं प्रीयामहे।।

आजानसिद्धं प्रतिभाविकासं, सौजन्यं च मात्सर्यदोषोज्झितं बिभ्राणस्य अस्य विद्वत्कवेः चिरपरिचयेन सौहार्दसम्पृक्तेन सम्भाविताः पर्यशीलयाम कवितासौभाग्यं बहुवारं औत्कण्ठ्येन ।। नवनवोन्मेषां भावपरम्परां, भावानुगुणं च पुरःप्रसरन्तीं शब्दधारां निरर्गलं निस्सृताना मपि पदानामकृत्रिमां मैत्रीं च क्रियासमभिहारेण रचनासु पर्यैक्षिष्मा हि।

पापपङ्किलां ईर्ष्यासङ्कुलां दुराग्रहग्रहिलां च लोकवृत्ति मवेक्षमाणस्य तेन च क्षुभितान्तरङ्गस्य तित्यक्षतश्च क्षुरप्रमिव तेषु निशितवाग्जालं, अत्युद्धतां चित्तवृत्तिं कविवरस्यास्य अग्रहीष्म दर्पणे इव कृतावत्र स्फुटम् ।।

क्षेमेन्द्रस्य महाकवेः भावानुबन्धोज्ज्वलां दुर्वृत्तेषु निस्संकुचित-प्रसरणां स्वातन्त्र्यसंधुक्षितां वाग्वृत्तिं अनुकुर्वती कृतिरियं धूर्तशिक्षामिव सदुपदेशमपि जिज्ञासुजने दिशन्ती, स्वदेशाभिमानं धर्माभिरतिं च पाठकस्वान्तेषु समुद्दीपयति ।। परीक्षकेषु केचित् शब्दसौष्ठवं इतरे चार्थौचित्यीं, अपरे तु अलंकारपरिष्कृतिं अन्येऽपि ध्वनिगम्भीरतां अभिमन्यन्ते प्रायः । सर्वानपि तानिह धिनोति कृतिरेषा।।

पुरोभागिजनोत्कण्ठां - दोषान्वेषणकर्मणि ।
वन्ध्ययन्ती कृति र्जीयात् - शुद्धा विजयसारथेः ।।

इति निवेदयति
विद्वद्वशंवदः - कविशाब्दिक केसरी
न.च.रघुनाथाचार्यः
एकशिलानगरी

In Public domain. Digitization Muthulakshmi Research Academy

आभारः

अभिजानन्त्येव समे सुमनसः व्यक्तेः हृदयान्तस्तलवर्तिनां क्वापि कोणे विलीनानामुद्बोधकसामग्री विरहात् प्रसुप्तानाम् उत्तेजनाहेतोस्सपद्येव समुद्बुद्धानां प्रतिक्रियाप्रभावात् प्रकुपितानां विक्षेपकराणां क्लेशावहानां चित्तवृत्तिनाम्ना व्यपदिश्यमानानां विकृतानां भावप्रत्ययानां संस्करणाय समुन्नयनाय विधेयस्य सदुपदेशरूपस्य बोधमयस्य विधेरुपस्करणाय च वर्णनामयी वाग् अवतरिष्यति ।

मननशालिनः अन्वेषणशीलिनः मानवस्य हृदयान्तराले प्रवहतां भावप्रत्ययानाम् अभिव्यक्तिस्त्रोतो भवति भाषा । या हि जातिरीति-च्छायामुद्रा भणिति युक्युक्ति प्रभृतीनां सामग्रीभूम्ना परिपुष्टा जीवति। साधारणेन जनेन व्यवह्रियमाणायाः भाषाया स्सुतरां भिद्यते सर्वथा भावनामये जगति विहरमाणेन भावोद्रेकसमुन्मिषिते अर्थ-गम्भीरिमकिर्मीरिते उज्ज्वलपदबन्धे प्रतिभानपरिस्पन्द बंहिम्ना सञ्चरण-शालिना कविना कल्पिता भाषा ।

विविधानां भावानां घटनानां च अभिव्यञ्जनाय चित्रणाय वा नियतां साङ्केतिकीं भाषाम् उपयुञ्जानः कविः कृतिं नवरसाकृतिं निर्मिमीतइति साहितीसमालोचका आशेरते । यत्र सार्वजनीना विश्वजनीनाश्च आलोचनाधारा अकुण्ठितप्रसराः प्रवहन्ति, समञ्चिता भवन्ति मूलवृत्तयः आदर्श इव प्रतिफलति जनताजीवनम्, उपनयति जनतामभ्युदयनिश्रेयसपथम् उपदेशऋजुवक्रोक्तिमयः, भवन्ति प्रतिष्ठिता स्सङ्गमरूपेण नैकविधा अनुभूतिविशेषा भिन्नभिन्न स्तरीयाणामपि व्यक्तीनाम्, उक्तिचमत्कारो वक्रोक्तिवैभवञ्च सर्वाङ्गीणतया भासते, तदेव काव्यपदवाच्यतामधिगन्तुमर्हति ।

In Public domain. Digitization Muthulakshmi Research Academy

हृद्गतस्यापि ज्ञानेच्छाकृतिसंवलितस्य अभ्युदयानन्द प्रतीक प्रतिष्ठितस्य आवेशस्य संप्रज्ञान तिरोधानात् क्वापि कोणे प्रसुप्तस्य मसृणदीप्तमध्यमरूपस्य विषयस्य वैचित्रीवशात् प्रबुद्धस्य निबिरीसपरिवेषप्रभावकरंभितस्य सत्त्वादि प्रादुर्भाव तिरोभावाभ्यां दृतिदीप्तिविकासोपहितात्मना प्रसृमरस्य सङ्कुचितस्वपरप्रत्यय-विशेषप्रवाहान् अतिक्रान्तस्य विभावादिमहिम्ना तन्मयींभाव संपनीपाद-नयोग्यतानुगुणं समुद्रिक्तस्य सौवावमर्शधारया नैर्मल्यं नीतस्य कल्पनाशक्त्या वर्णनीयतां प्रापितस्य परमोपदेशामृतपूरेण मधुरिमाणम् अधिगमितस्य उक्तिचमत्कारेण चारिमाणम् उपलम्भितस्य प्रतिभा बंहिम्ना प्रथिमानम् आसादितस्य महामोहान्धकारसंकुले विविध-श्लेशविक्षेपसंक्षुब्धे विनष्टप्राये जनताहृदये प्रबोधमयं प्रकाशं स्थवयितुं लम्भितावसरस्य वाङ्मयीम् आकृतिम् आधातुं कविपदम् आरूढःसुकृती कृती बहुधा यतते ।

एवम्भूतां कृतिं निर्मिमाणः कवी राष्ट्रस्य समाजस्य वा विभिन्नजीवन व्यापारेषु सामाजिकसम्बन्धेषु वा मानवतादृष्ट्या प्रेरणास्पदानां तत्तदादर्शानां समष्टिरूपां संस्कृतिं यवयति । या हि सर्वेषां धर्माणां सम्प्रदायानाम् आचाराणां च समन्वयस्थानं भवति । एतादृग्गुणविशिष्टां चिरन्तनीमपि नवनवोन्मेषविशेषभासुरां संस्कृतिम् उब्दोधयितुं लोकवृत्तं चित्रयितुं दूराजनीतिक कर्दमकलुषितां सामाजिकीं प्रवृत्तिं प्रतिफलयितुं च बहुतिथादेवकालाद् समुद्यतस्य जनस्यास्य गुम्फितरचनाप्रक्रियाप्रयासा एव इमा लघुकृतयः सहृदयभावुकानाम् आलोकम् उपैतुं तदादरं च अवाप्तुं सर्ववैदिक संस्थानपक्षे भारतभारती नाम्ना प्रकाश्यन्ते ।

सौवावमर्शधारया भारतभारतीमिमां कटाक्षयताम् आमुखै स्सनाथयतां गौरवितानाम् श्रीमतां सकलशास्त्रागमपारदृश्वनां

In Public domain. Digitization Muthulakshmi Research Academy

महामहोपाध्याय के. एस. कृष्णमूर्तिशास्त्रिवर्याणां, न.च.रघुनाथाचार्य महोदयानां, मरिंगंटि श्रीरङ्गाचार्य महाभागानां, पुल्लेल श्रीरामचन्द्र महाशयानां, च कृते भूयो भूयो नम उक्तयः प्रशास्यन्ते पुस्तकस्य । प्रकाशनाय प्रथमवारं समुचितधनप्रदानेन उपकृतवतोः सुरभि जयश्रीभूम् रावु नाचुपल्लि दम्पत्योः रजिता-अच्युतरेड्डि दम्पत्योः (अमरिका) के, नरसिंहारेड्डि महाभागस्य (अमरिका) श्रीबोन्त स्व राज्यलक्ष्मी-हनुमन्तरावु दम्पत्योश्च कृते विधीयन्ते बहवो मङ्गलवादाः ।

कवीनां प्रख्यानं नवरसपरीवाह लुलितान्
चमत्कारान् वाचां परिमलपरिस्पन्दशबलान्
प्रसूते, विम्रष्टा प्रतिपद मुपस्काररसिको
गवेषैः काव्यानि स्थवयति तलस्पर्शकुशलैः ।

इति
सुमनसा मनुचरः
रचयिता

In Public domain. Digitization Muthulakshmi Research Academy

विषयसूचि

१.	आपूरयन्तु सुहृदां हृदये मधुवाहिनीम्	१
२.	जयति हारि सारस्वतम्	२
३.	भारतीसुप्रभातम्	४
४.	भारतभारती	१४
५.	मातृदेशं प्रीणयानुज	२६
६.	शङ्खारवः	२७
७.	उषस्सूक्तम्	३६
८.	भारतमहिम्नःस्तुति	४१
९.	संस्कृतप्रशस्तिः	४९
१०.	दीपशिखाप्रशस्तिः	५३
११.	रूपसूक्तम्	५६
१२.	आप्तलेखः	६३

In Public domain. Digitization Muthulakshmi Research Academy

१३.	भ्रातृलेखः	८२
१४.	राष्ट्रसूक्तम्	१०२
१५.	कल्याणकामः	११७
१६.	कविसूक्तम्	१४४
१७.	कौलेयसूक्तम्	१४८
१८.	अनुशीलनम्	१५८
१९.	परिवादिनी	१६२
२०.	नमोवाकः	१८६
२१.	तारावली	२१४
२२.	पुराणप्रशस्तिः	२२०
२३.	द्रुतं प्रादुरेधि	२३३
२४.	देहि मे देशाय	२३९

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

आपूरयन्तु सुहृदां हृदये मधुवाहिनीम्

आचाष्टमाद् वयस्यब्दा दात्रयस्सप्ततान्मया ।
कृतानि लघुकाव्यानि प्रकाश्यन्ते यथातथम् ॥

दशासु वयसो भिन्ना स्वाबाल्यात् खण्डिकाः कृताः ।
रोचिष्मत्यां समाहृत्य मुद्राप्यन्ते सुधीमुदे ॥

कविताप्रक्रियाः प्रायो भावनोर्मिभ्रमायिताः ।
आपूरयन्तु सुहृदां हृदये मधुवाहिनीम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

जयति हारि सारस्वतम्

१. अर्थं वागनुवर्तते, प्रकटयत्यर्थोऽपि भावं स्फुटं
भावो धावति भावनां प्रति तथा संवेदनां भावना
वल्गुयत्यपि, वेदना पुनरभिव्यक्तिं कुविल्लिप्सते,
साऽभिव्यक्तिरुपस्करोति सकलं विश्वं कवेस्संविदि ॥

२. समाजबहुरुग्मता प्रतिविधान वैतालिकं
समाजमणिदर्पणं विषमवृत्तिनिर्णेजकम्
समाजपथदर्शनं हितस्तोक्तिभङ्गीभृतं
सभाजनसभाजितं जयति हारि सारस्वतम् ॥

३. विभिन्नजनचितदुर्विषयवृत्तिमालिन्यतः
प्रवृत्तकलहज्वरप्रशमनैकदिव्यौषधम्
निरन्तरकटुश्रमव्यथितशान्ति सन्तुष्टिदं
जगद्धितमनाविलं जयति हारि सारस्वतम् ॥

४. विभिन्नमतिमानुषप्रकृतिचित्रणोर्जस्वलं
मनस्तलमिथोद्विषद्विषमवृत्तिसाम्यावहम्
सदुक्तिमधुरं शिवं जगति सुन्दरं सूनृतं
त्रिकालहितमौलिं जयति हारि सारस्वतम् ॥

५. अनेक कुलवर्गवाङ्तविरोध संक्षुब्धव
त्समाजजनजीवनामृततरङ्ग धारावहम्
मनोमतिवचोलगन्मलकलङ्क पङ्कापहं
निरन्तरहितावहं जयति हारि सारस्वतम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

६. अशेषविषयावली विशदवर्णनोपस्कृतं
समस्तजनजीवनस्थितिगति प्रतीकास्पदम्
मनोज्ञकविभावना स्फुटितभावभंगीस्फुर
च्चमत्कृतिपुरस्कृतं जयति हारि सारस्वतम् ॥

७. रसो भावो वृत्तिर्भणिति बहुला व्यंग्यसुषमा
गुणोऽलंकारो वस्त्वखिलमपि काव्यस्वमितरत्
स्फुरत्योतप्रोतं स्वयमिव यदुन्मेषकलया
प्रतीक्ष्या प्रज्ञा सा जयति कविताप्राणधमनी ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

भारतीसुप्रभातम्

जननि! जागृहि भारतावनि! जननि जय जय पूतचरिते!
सकलजनतानन्दवाहिनि! निखिलमानवशान्तिसारणि!

१) विविधविद्याकुमुदकौमुदि ! विविधविषयोद्यानसुरभे !
विविधमतसरिदम्बुराशे ! विविधविवुधामृततरङ्गिणि !
विविधविज्ञानाब्जतरणे ! विविधविभवारामभूमे !
विविधकुलमतकामधेनो ! विविधगुणमणिमञ्जुमञ्जरि !

२) सकलशात्रवकालरात्रे ! विमतविषतरूपरशुधारे !
दुरिततिमिरमरीचिमाला ! कुटिलगिरिकुलकुलिशधारे !
निगममञ्जुमरीचिवीचीनिचुलिताखिलभुवनभवने !
नयननिज्वलदुच्चलज्ज्वलनार्चिराप्लुषितारिहृदये !

३) तलतलायितवपुरिरम्मदकान्तिपूराम्भोदिताशे !
धगधगत्ताटङ्क विद्युद्दीप्तिदीपितनिखिलभुवने !
चन्द्रमश्शतकोटिसुन्दरवदनसुषमानन्दिताशे !
त्मदहस्करकोटिजित्वरदिव्यतेजोराजिरूपे !

४) विश्वमङ्गलगाननिरते ! सर्वमङ्गलभरितचरिते
हिन्दुवृन्दारकपुरन्दरशक्तिरूपे ! जननि ! जागृहि
दरसुदर्शनचन्द्रहासगदादिभासुरकरसरोजे !
विश्वमानवगीयमनोदात्तचरितप्रियतनूजे !

In Public domain. Digitization Muthulakshmi Research Academy

५) वीर्यशौर्यस्थैर्यधैर्यत्यागभोगगुणाम्बुराशे !
सत्त्रिविष्टपमञ्जुमण्डपभासमानात्मस्वरूपे
महितरत्नााकरनिवेष्टितविपुलभारतचक्रवर्तिनि !
ब्रह्मविषयविराजमानविशिष्टभूते जननि ! जय जय ॥

६) शस्यसस्यश्यामले हिमधाममकुटि वसुन्धरे
सकलसम्पन्निकरलालितविनुतदिव्यप्राभवे !
हरति जगतीललितवनिताहृदयजडिमरुजाविकारम्
अमृतभरिताऽऽमोदकलिता कापि मारूतशिशिरलहरी ॥

७) निद्रया सह याति रजनी संविदा सममुष उपैति
जाड्यमपयातीह तमसा दार्ढ्यमुपयातीह महसा
हृदयमिव यमिनः प्रसन्नं मातराशावलयमधुना
गलति कुवलं हृदिव कुमते र्लसति सुमते र्हृदिव नलिनम् ॥

८) गगनवनमनुविश्य तारासेनया सह तदनु राजा
स्वकरलग्नं तिमिरमृगकुल मम्बरादधुना-पयाति
तिमिरचिकुरं सङ्कलय्य च विधुमयं निजकर्णपूरं
केलिगलितं श्रवसि कृत्वा गगनकेलिं त्यजति रजनी ॥

९) प्रातरभिसार्येन्दुकातं श्वसितसुरभी रात्रिरधुना
तस्य रुचिरागाञ्चितं पुनरम्बरान्तं व्रजति दधती
अरूणजलधरमसृणचरणाविकिररावै र्व्याहरन्ती
रजनिमनुपततीह तनुभूरचिरसूता पूर्वसन्ध्या ॥

In Public domain. Digitization Muthulakshmi Research Academy

१०) [illegible] तिमिरकरटिनि [illegible]शीर्णा इव गलन्ति
वियति ताराः, पूर्वसन्ध्या रूधिरधारेवानुपतति
क्रूरतिमिरासुरवरालिं हन्तुमेति प्रहितमधुना
कालहरिणोदयगिरीन्द्रान्मिहिरबिम्बसुदर्शनास्त्रम् ॥

११) जननि निर्माल्यायितं ते तारजालं गगनमधुना
धूपधूमायितमिदं नीराजनायितमरूणबिम्बम्
आयतैरयमर्यमा परिमार्जयितुमुपयाति नूनं
विष्णुपदसमुपात्तमुडुसुमनिकरमात्मकरै र्विभाते ॥

१२) गमितनिशमन्यत्र पूषणमुष्णरश्मिं लोहताङ्गम्
आगतं नलिनी विलोक्य तु भवति कल्हारारूणाक्षी
अरूणबिम्बारात्रिकेण नितान्तमैन्द्री दिक्पुरन्ध्री
जननि नीरजयति भक्त्या त्वामुदारोदारचरिताम् ॥

१३) लवणजलनिधिविरसहृदयो लीनताराबुद्बुदालिम्
व्योमजलधिं पातुमागतमौर्वमुदितमिनं मिनोमि
सप्तऋषिमण्डलमहो मानससरोवरदिव्यतीरम्
तावकार्चनसमुचितान्यवतरति नलिनानि ग्रहीतुम् ॥

१४) जनकजागिरिजादयो बहुमाननीया दुहितरस्ते
विविधमङ्गलवस्तुहस्ता आगतास्त्वां सेवितुम्
परमहंसा स्सरसि विहितस्नानसन्ध्योपासना स्ते
स्तुतिपरं तव सुप्रभातं वन्दिवद् गायन्ति नितराम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१५) कोटिजन्मतपोविशेषेणापि दुर्लभमम्ब दिव्यम्
भक्तुममलं तव पदं समुपागता इन्द्रादयोऽपि
श्रुतिमनोहरगानमधुना शुकमुखा द्विजराजराजी
विततशाखा गतवती सा मधुरकण्ठैरूषसि कुरूते ॥

१६) जलतरङ्गमृदङ्गवंशीमधुररसितैः प्रकृतिकान्ता
वनमयूरविलासलास्यै र्लसति कोकिलकम्ररण्ठा
तुहिनजलजडकेसरं सुमनिचयमुद्दिश्येव मिहिरम्
पल्लवाञ्जलिभिर्विमुञ्चति तरूलतावलिरेनमुदितम् ॥

१७) युवतिगाढालिङ्गितान् सुखनिद्रितानलसा निमे
प्रातरभवज्ञागृतेति च वायसाः प्रत्यारटन्ति
तप्तलाक्षाश्लिप्टपक्ष्मेवाक्षियुगलं वातनिहतम्
शेषनिद्राकुटिलतारं मृगकुलान्युन्मीलयन्ति ॥

१८) विपिनकरिवरकर्णतालध्वान माकर्ण्यायमधुना
मधुरलास्यं किमपि कुरुते वनमयूरो जननि जागृहि
पल्लवाधरराजितायै कुसुमगुच्छस्तनभरायै
बाललतिकाविततये ह्युपदिशति पवनो मधुरलास्यम् ॥

१९) मधुकराञ्जनभक्तिचित्रं तिलकमास्ये संप्रकाश्य च
अरूणरागेण प्रवालाधरमभूषयदिह वनेला
कुसुमकोमलदन्तकान्ति र्भ्रमरगुञ्जितगीतिरेषा
वनलतावलिरनिलदोलितसलयकिसलयपाणिरधुना ॥

In Public domain. Digitization Muthulakshmi Research Academy

२०) उषसि दलदरविन्दवदना भ्रमरगुञ्जितकैतवेन
सरससरसी तावकस्तुतिगीतजातं वदति मधुरम्
कुसुमशृङ्गैः कुसुमरसमादाय काननदेवतानाम्
मलयपवनकरेण सिञ्चति माधवो वदनानि नूनम् ॥

२१) कुन्दमन्दारारविन्दसुजातिमुखकुसुमानि भक्त्या
मधुमरन्दसुगन्धसुफलान्यर्पयति वनदेवता ते
चन्दनागुरूदिव्यपरिमलपूररूपमुपायनम्
प्रेषयति पवनेन तुभ्यं सेवको मलयाचलोऽयम् ॥

२२) तुहिनगिरिमणिगोपुरोपरि शूलपाणिर्मृत्युविजयी
वैरिमारणहोमनिरतो द्वारपालनमम्ब कुरूते
दिव्यबदरीद्वारवसती दिव्यमूर्ती परमहर्षी
स्वस्तिवाकं जननि पठतो निगममयमम्बाधुना ते ॥

२३) जाह्नवी यमुना च सिन्धुर्गौतमी ससरस्वती
नर्मदाद्या आगतास्ते स्नानविधिमुपपादयितुमपि
जननि तव दौवारिकोरलाकरोऽयमुपायनम्
रत्नपुञ्जममूल्यमधुनाऽऽदाय देवि निरीक्षते ॥

२४) समदरिपुललनावलीवैधव्यदीक्षागुरुवरासे !
निहतदानवतनुगलद्रुधिरापगाजलकेलिलोले
आन्ध्रकेरलतमिलवंगमराठघूर्जरकनडजनता
उत्कलासमपञ्चनदकाश्मीरजनता नौति भवतीम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

२५) परममुनिगणमान्यमाने ! परमहंसनिषेव्यमाणे !
सकलतात्विकपूज्यमाने ! निखिलसात्विकनूयमाने !
विविधभक्तोपास्यमाने । विश्वजनतागीयमाने !
दातृवृन्दस्तूयमाने ! धर्मलीलावनविकासिनि !

२६) अम्ब दिव्यक्षेत्रमहिते दिव्यतीर्थविराजिते
विविधविद्यापीठकलिते चारूशिल्पविराजिते
विविधमन्त्रप्रगतिसिद्धे विविधयन्त्रप्रगतिसिद्धे
विविधतन्त्रप्रगतिसिद्धे विश्वभारति जननि जय जय ॥

२७) तुङ्गश्रृङ्गहिमाद्रिमौले रूचिरकाश्मीरैकतिलके
विन्ध्यपर्वतमेखले पृथुसिन्धुगङ्गाभव्यपाणे
नर्मदायमुनावितस्ताप्रभृतितटिनीकण्ठमाले
ब्रह्मपुत्राहेममयचेलाञ्चले घनमानसे ॥

२८) दिव्यकावेरीपिनाकिनिमञ्जुमञ्जीरे महेश्वरि
सिंहलामलचरणपीठीनिहितचरणसरोजयुगले
जडियकोलारादिमणिखनिमञ्जुमणिमञ्जूषिके
नल्लमलनीलाचलादिस्थललसत्प्रमदावने ॥

२९) प्राच्यदक्षिणपश्चिमाम्बुधिकेलिसरसीकेलिलोले
रत्नगर्भे सुस्थिरे नवदेहलीसिंहासने
प्राकृतादिविभिन्नभाषारीतिमेदुरवाक्प्रवृत्ते
संस्कृतैकैकात्मिके निगमैकशेमुषि जननि जय जय ॥

In Public domain. Digitization Muthulakshmi Research Academy

३०) सुगुणसिता कीर्तिलतिका मेरुकाण्डमवाप्य वितता
वियति तारामुकुलिता विधुकुसुमिता तव भाति भुवने
दिव्यतेजोनुभीता रिपुदिवान्धावलिरियं ते
तिमिरमयगिरिकन्दरासु प्लायतेऽरं जननि जागृहि ॥

३१) तावकीनां शान्त्यहिंसासत्यधर्मन्यायरीतिम्
संस्तवीति समस्तजनता जगति बहुधा हिन्दुभूमे
सकलजनतामापुनाना श्वसितपरिमलमधुरलहरी
तावकीनाऽऽस्माकमनिशं स्पन्दयति हृदयानि नियतम् ॥

३२) व्यासवाल्मीक्यादिकविकुलतिलकलालितललितकीर्ते
पृथुभगीरथभरतनलरघुरामरञ्जितमञ्जुमूर्ते
मौर्यगुप्तकशातवाहनचोलचालुक्यादिशक्ते
रूद्रमाम्बाझांसिलक्ष्मीवीरनारीजन्मभूमे ॥

३३) रिपुभयङ्करराजसुतमुखवीरसिंहार्चितपदाब्जे
तिलकगान्धिरवीन्द्रमोहनवल्लभादिककृतप्रतिष्ठे
भासलक्ष्मीचन्द्रशेखरजवहरादिकरत्नगर्भे
प्रवलरिपुकुलदलनलोलुपवीरमणिमालोपगूढे ॥

३४) दार्शनिकशितसुमतिदीधितिदर्शितप्रकृतीशपुरूषे !
सकलजगदाचार्यवर्यस्थापितस्वाम्नायतत्त्वे !
विविधगायककारूकविमणिमण्डितश्रीभासमाने !
कर्मभूमे जननि जय जय धर्मभूमे जननि जय जय ॥

In Public domain. Digitization Muthulakshmi Research Academy

३५) वैरिवैरनिवारणोद्यतशान्तिपूरुषशान्तिभूमे
द्रोहिदलनव्रतरतात्मक्रान्तिपुरूषक्रान्तिभूमे
महितवैष्णवशक्तियुक्ते प्रथितशैवस्फूर्तिपूर्ते
विततशतधृतिधृतिकलामयि वीरभारतजननि जय जय ॥

३६) सकलकमलामोदलहरी पुलकयति ते भासमाने
प्रतिकलं तेजोरवाविदमम्ब । कुवलयमपि समस्तम्
रत्नगर्भां वसुमतीं सर्वंसहां त्वामुर्वराम्
काश्यपीं विपुलामुदारां नौति सकला जननि जगती ॥

३७) विलयकालाभीलसंज्वलदनललोचनकीलमाला
लोककण्टकनिकरमविरतदुरितनिरतं दहति ते
विश्वमखिलं क्रूरतासन्तापतप्तं शीर्णहृदयम्
परमपारकृपासुधारसपूर एवोज्जीवयति ते ॥

३८) नैककोटिकरांघ्रिकन्धरमस्तकाया अपि गुणाढ्ये
हृदयमेकं भवति तव पुनरेकविधमास्पन्दते
आ महाम्बुधिहिमशिलोच्चय मास्ववङ्गाखातजलनिधि
सकलकार्येष्वप्रमत्तास्ते सुतास्समुपासते त्वाम् ॥

३९) उन्नतिं तव वदति हिमगिरिरल्ल ! गङ्गा पावनत्वम्
सुस्थिरत्वं मेरूरपि गम्भीरतां रत्नाकरोऽयम्
ज्ञानगौरवमम्ब ! निगमा, उपनिषत्स्मृतिदर्शनानि
ईशपुरुषप्रकृतितत्वविचारधारां व्यञ्जयन्ति ॥

In Public domain. Digitization: Muthulakshmi Research Academy

४०) उल्लिखन्ति सुवर्णमदुररीतिसरसं सारमहितम्
विविधभङ्गीसङ्गतं पदमम्ब । कृषकाः फलयुतं ते
कार्मिका अतिलङ्घ्य शक्तिं स्रष्टुमखिला स्संपदस्ते
श्रान्तिविरहं बहुपरिश्रमकर्मजातं कुर्वते ॥

४१) असकृदालोचितकठोरप्रज्ञया सुमनोज्ञया
दितिजगुरुमपि दिविजगुरुमपि मन्त्रिणस्ते परिहसन्ति
देशकल्याणोद्यता बहुमानिताखिलभिक्षुका स्ते
धनदमादिमभिक्षुमखमपि सार्थवाहाः परिभवन्ति ॥

४२) प्राच्यनव्यप्रकृतिशास्त्रप्रथितविज्ञानार्जवेन
प्रगतिमधिकं तव पदं विज्ञानिमणयः प्रापयन्ते
प्राज्यराज्यसुभोगभाग्यादीनि नितरामनुभवन्ति
शक्तियुक्तिक्रान्तिशान्तिप्रगतिसिद्धा आत्मजा स्ते ॥

४३) विमलशीलोदारचरितास्सुगुणनिधयो दुहितरस्ते
सफलमहिलाराधनीया आप्नुवन्ति महोन्नतिम्
नास्ति साम्यं जगति केनाप्यम्ब ! भूतलदेवभूमे
जननि सकलानपि सुतान् तव सुमनसस्सततं सुधारय ॥

४४) दुरितविरतैस्सुकृतनिरतैः कार्यशूरैरात्मजैरपि
सार्थकीकृतरत्नगर्भानामधेया भव सदा त्वम्
मङ्गलं ते रत्नगर्भेमङ्गलं सुखशान्तिभूमे
मङ्गलं प्रणतारिपाले ! मङ्गलं नवभारतेश्वरि ॥

In Public domain. Digitization Muthulakshmi Research Academy

४५) रसालपल्लवग्रास - विकस्वरपिकस्वरा
भारतश्रेयसे भूयात् - वाणी विजयसारथेः

४६) जगन्नाथपदाम्भोज - मकरन्दमधूकृता
कल्पतां सत्प्रमोदाय - वाणी विजयसारथेः ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

१) अहं तनूभवोऽस्मि ते कृते व्ययीकरोमि ते
स्वकं धनं बलं कुलं स्वकानसूनपि प्रसूः
इति स्वमातृदेशजातिरक्षणे प्रतिश्रुतिं
विधाय भारतात्मजो विजेजयीतु सर्वदा ॥

२) सदा स्वजातिसेवनाय धारये स्वजीवितं
सदा स्वराष्ट्ररक्षणाय धारये तनूमिमाम्
सदा स्वधर्मपालनाय धारये स्वकानसू
निति प्रतिश्रुतिं करोतु भारतात्मजस्सदा ॥

३) स्वजन्मदायिनीं बलादरातिभिर्वशीकृतां
यशोधनैः पुरातनै र्वलीकृतासुभिर्मुदा
सुरक्षितामरक्षतस्तव स्वदेशमातरं
जनुस्त्रिलोकवीरलोक एव गर्हते तराम् ॥

४) स्वपरचक्रभयविभीतमातृदेशरक्षणे
समुद्यता भवन्तु भोस्समुद्यता भवन्त भो
तनुधनासुजीवितादिसकरवस्तुसन्ततिं
यशोधनास्समर्पयन्तु देशरक्षणाध्वरे ॥

५) त्रिविष्टपं वशीकृतं, वशीकृतश्च मानसं
स्वभारतैकमानसं नराधमैः कुमायया
महाशिवालयं स्वमातृदेशभद्रतालयं
हिमालयं ग्रहीतुमेव तेऽरयोऽभियुञ्जते ॥

In Public domain. Digitization Muthulakshmi Research Academy

६) अनर्थकापजल्पितैः कलङ्कपङ्ककल्पना-
विशङ्कटैः स्स्वभारतं विदूषयत्यरिस्सवयम् ।
सदात्मनीनमुन्नतं यथार्थवादमुज्ज्वलं
स्वकं प्रकाशयाम एव तद्धिताहितैषिणाम् ॥

७) जहीत भारता वृथाधिरोथमेदुरार्भटी
मुपेत भारता मिथस्सहोदरैकभावनाम्
पुनीत दुष्पथोद्यतान् दुरायतीन् निजानुजान्
प्रयात दुर्मदानरीनरं निहन्तुमञ्जसा ।

८) इदन्तु वीरभारतं न कातरात्मजन्मभू
रिदं स्वतन्त्रभारतं न चाप्यनाथमन्दिरम्
इदं मनस्विभारतं न चाज्ञदुर्जनावली-
जनुस्स्थलीति घोषयन्तु शक्तियुक्तिपाटवम् ॥

९) स्वतन्त्रभारता वयं प्रवीणभारता वयं
ह्यनन्यसेवका वयं त्वनन्यशासका वयं
विचारपण्डिता वयं प्रचारकोविदा वयं
प्रकाशयाम एव वृत्तमुज्ज्वलं जगत्तले ॥

१०) पुरातनप्रतिष्ठयाऽधुनातनप्रतिष्ठया
समुल्लसत्पुरोदृशं ससुन्मिषत्पुरोगतिम्
नवीनसंविदञ्चिताः प्रवीणसंविदञ्चिताः
समार्जयन्तु भारता स्सवतन्त्रभारतावनौ ॥

In Public domain. Digitization Muthulakshmi Research Academy

११) महोन्नतैर्महोज्ज्वलैरनेककष्टपथास्पदै
स्वधीतपः फलायितै र्नवीनशास्त्रशोधितैः।
कृतश्रमा मनीषिण स्स्वयं समृद्धिसाधने
पुरोगतिं जगन्नुतां नयन्तु भारतावनीम् ॥

१२) स्वराष्ट्रशक्तिवर्धने स्वराष्ट्रसम्पदेधने
स्वराज्यवैभवार्जने स्वराज्यभद्रतावने ।
कृतश्रमा मनीषिणस्समेऽपि भारतास्समं
भजन्तु सर्वतो जयं स्वतन्त्रताफलायितम् ॥

१३) कुलान्तरावलम्बिनो मतान्तराबलम्बिनो
वसन्ति येऽधिभारतं सभाजयन्तु ते सदा
स्वभारतीयभावनां स्वभारतीयसंविधां
स्वभारतीयशासनं स्वभारतीयसंस्कृतिम् ॥

१४) धनाधिकारिणोऽपि वा धराधिकारिणोऽपि वा
मताधिकारिणोपि वा पदाधिकरिणोपि वा ।
वयं समेऽपि सर्वदा पवित्रभारताम्बिका
पदारविन्दसेवका इति स्म शासतु स्वयम् ॥

१५) समृद्धवर्गदुर्मदं दरिद्रवर्गदुर्गतिं
निरक्षरास्यनिर्झतिं सहाक्षरास्यनिस्पृहाम् ।
समूलकाषमादराद्विदार्य भारतप्रजाऽ-
विभक्तसत्कुटुम्बकव्यवस्थितिं वितन्वताम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१६) स्वदेशपक्षनायका विदेशपक्षनायकाः
स्वजातिरीतिपोषका विजातिरीतिपोषकाः ।
स्वतन्त्रभारतक्षमाविधेयतासमुल्लसत्
स्वजातिभक्तिभावनां प्रकाशयन्तु सर्वधा ॥

१७) मिथोऽनुरक्तवुद्धिषु प्रजासु सङ्गतासु वै
विभिन्नवर्णवर्गजातिवैरदुर्विभावनाम्
सृजन्तु मा स्म शासकास्सृजन्तु मा स्म नायकाः
स्ववैरसाधनेच्छया स्वलाभपूरणेच्छया ॥

१८) वृथानिनादधोरणीं मुधासदोमुखार्भटीम्
मृषाविचारवैखरीं मृषाप्रचारचातुरीम् ।
विहाय सत्क्रियामुखेन नायका मनीषितं
यथोक्तमर्जयन्तु भारतप्रजासमीहितम् ॥

१९) स्वतन्त्रतैकहानिकृत् स्वभद्रतैकहानिकृत्
प्रजागरैकहानिकृत् प्रजैकतैकहानिकृत् ।
स्वजातिनीतिहानिकृत् स्वशक्तियुक्तिहानिकृत्
कुभावितं कुचेष्टितम् कदाऽपि मा स्म कुर्वताम् ॥

२०) मितं सुभाषणं तथा मितेतरां क्रियां पुनः
मितम्पचत्वमन्वहं मितेतरं धनागमम्
मिता महंयुतां जनोऽमितां शुभंयुतां समो
विधाय भारतावनौ विजेजयीतु सर्वधा ॥

In Public domain. Digitization Muthulakshmi Research Academy

२१) वृथा मिथोनिरोधनं वृथा मिथोविरोधनं
मुधा मिथोविनिन्दनं मुधा मिथोऽभिनन्दनम् ।
विसृज्य भारतप्रजा वयं स्वराष्ट्रदेवता-
करादिका इति स्वयं विभावयन्तु सर्वदा ॥

२२) विहाय कल्पनाजगद्विहारधोरणीमरं
विमृश्य लौकिकीं प्रवृत्तिमञ्जसाऽधुनातनीम् ।
स्वजातिभद्रमात्मना समीक्ष्य साधु सर्वधा
जगन्नुतामवाप्नुवन्तु भारताः पुरोगतिम् ॥

२३) स्वतन्त्रभारतप्रजाधिशासनव्यतिक्रमं
विधाय भारतस्य मा सृजन्तु सङ्कटस्थितिम् ।
स्वतन्त्रभावनोन्नतिं समष्टिभावनोद्गतिं
प्रसारयन्तु नायकाः प्रजास्वपि प्रतिक्षणम् ॥

२४) विदेशदुष्टवित्तविक्रयीकृतान्तरात्मका
विदेशकूटशासनाय मा बलिञ्च कुर्वताम् ।
स्वतन्त्रभारतोन्नतिं स्वजातिसुप्रतिष्ठितिं
उपद्रवं विधाय सुस्वराज्यहानिमूलकम् ॥

२५) स्वतन्त्रभारताशयं न नाशयन्तु नायका
स्स्वतन्त्रराष्ट्रसम्पदं न लुण्ठयन्तु शासकाः ।
उदात्तजातिसंस्कृतिं न शोषयन्तु भावुकाः
स्वदुष्टराजकीयदुष्प्रयोजनैकसिद्धये ॥

In Public domain. Digitization Muthulakshmi Research Academy

२६) निहीनतां दरिद्रतामयुक्ततामनेकता
मधीरतामविज्ञतामपास्य भारतावनौ ।
सचेतनं सकेतनं सजागृतिं ससंस्कृतिं
मनस्विनं महस्विनं जनं बुधा वितन्वताम् ॥

२७) ऋणार्णवृत्तिजीवनं विदेशभिक्षुताटनं
विलासवेषलालसां विहाय दुर्व्ययं तथा ।
समृद्धदेशवत्सदा स्वयंसमृद्धिसाधने-
ष्वविश्रमं कृतश्रमाः कृतिक्षमा भवन्तु भो ॥

२८) स्वयंसमृद्धिसाधने समे समाधिकारिण
स्वयंश्रमार्जिते धने समे समानभागिनः ।
स्वजातिसम्पदुन्नतौ समे समानुरागिणः
समुन्नता जगन्नुता भवन्तु भारतास्सदा ॥

२९) अनेककर्मकर्मठा अविश्रमं परिश्रमं
सुधारयन्तु कार्मिका विधाय राष्ट्रसुश्रियम् ।
स्वयंसमृद्धिसाधनीं स्वराष्ट्रशक्तिवर्धनीं
कृषीवला स्समेधयन्त्वनेकधान्यसंपदम् ॥

३०) सुशिक्षितास्सुसंस्कृता विपश्चितामपश्चिमा
उपार्जयन्तु योषितः पुरस्कृतां पुरोगतिम् ।
प्रजागृतौ प्रतिष्ठितौ समुन्नतौ समन्वितौ
स्थितौ गतौ कृतौ मतौ स्मृतौ धृतौ भृतौ सदा ॥

In Public domain. Digitization Muthulakshmi Research Academy

३१) रसालसाललालसत्किसालपालिकाघसत्-
पिकाङ्गनाविकस्वरस्वरावलीं विहाय भोः ।
स्वराष्ट्रगौरवोन्नतिप्रतिष्ठितप्रजागृति-
प्रशस्तिकृत्कृतिं सृजन्तु काव्यकारव स्सदा ॥

३२) मरूत्तरोविजित्त्वरैर्मनस्तरोवितित्वरैः
तटित्तरोविजित्वरैः ध्वनेस्तरोविजित्वरैः ।
वियत्पयस्स्थलीचरै र्विचित्रयानवाहनैः
हरन्तु शास्त्रकौविदा महाग्रराज्यदुर्मदम् ॥

३३) प्रभूतयन्त्रशक्तिभिः प्रकृष्टमन्त्रशक्तिभिः
र्नवीनशस्त्रशोधितैर्महास्त्रशस्त्रसञ्चयैः।
स्वयंपुरोगमक्रमै स्स्वयंसमृद्धिसाधनैः
हरन्तु शास्त्रकोविदा महाग्रराज्यदुर्मदम् ॥

३४) स्वधर्मकर्मकौशालं स्वशक्तियुक्तिपाटवं
स्वतन्त्रभावनारतिं स्वराष्ट्रसंपदुन्नतिम्।
अनारतप्रजागृतिं निरन्तरं पुरोगतिम्
स्वतन्त्रभारतप्रजास्समार्जयन्तु सर्वधा ॥

३५) समे स्वशक्तिवञ्चनां विहाय भारता रता
विधेयधर्मकर्मसु प्रजाग्रतूद्यतास्स्वयम्।
प्रजाभिमानमानसाः प्रजानुरागलालसा
नयेन शासतु प्रजाः प्रजाधिशासकास्सदा ॥

In Public domain. Digitization Muthulakshmi Research Academy

३६) शनैश्शनैः पुरोगतिं प्रणालिकाभिरादरात्
वितन्वतश्श्रमव्रतान् शमव्रतानसूयया।
द्विषन्ति नः कुतन्त्रकैः दुराक्रमै र्विकुर्वते
दुराशया विजृम्भितान्श्रमापयन्त्वरीनरम् ।।

३७) सदायुधा भवन्तु भो उदायुधा भवन्तु भो
अकारणद्विषो हठाज्जगद्द्रुहोऽभियुञ्जते।
मृषाहितैषिणः पुनस्समन्ततश्चरन्ति भो
सहस्रदृष्ट्यो मनस्विनः परामृशन्तु तान् ।।

३८) हठाद्दुवराक्रमोद्यतं तमेतमाततायिनं
सुहृत्प्रतारणाचणं कुतन्त्रमन्त्रमार्मिकम्।
मृषापलापलोलुपं विषोपरक्तचेतसं
द्विषं रूषा भृशं नयन्तु मार्त्यवातिथेयकम् ।।

३९) अवद्यवादकोविदात् दुराक्रमप्रतिक्रमा
दणुस्फुलिङ्गवर्षुकात् द्विषद्बलान्मदोद्धतात् ।
असूनपि स्वकान् बलिं विधाय सङ्गराङ्गणे
ष्ववन्तु भारतप्रजाः स्वतन्त्रभारतप्रभाम् ।।

४०) जगज्जहानकक्रियाचणाणवास्त्रदुर्विधा-
विजृम्भितद्विषत्पलायनावहैकदीक्षया
अशेषमानुषस्तुतप्रथाप्रतापपौरूषा
अवन्तु भारतप्रजाः स्वतन्त्रभारतश्रियम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

४१) दुरूह्यमोद्यताभियातिजातिभूतमारण-
व्रताभिनिष्ठितज्ज्वलत्पिनाकपाणयस्सदा ।
अकुण्ठितैकदीक्षया विकुण्ठितारिविक्रमा
अवन्तु भारतप्रजाः स्वतन्त्रभारतश्रियम् ॥

४२) स्वभारताक्रमोद्यमप्रतिक्षणप्रजृम्भित-
द्विषन्नराधमत्रुटत्कपालमालिकावलीम् ।
नटोद्भटस्य कन्धरे विधाय ताण्डवोद्भटा
अवन्तु भारतप्रजास्स्वतन्त्रभारतक्षमाम् ॥

४३) अरातिवीरसुन्दरीदृगम्बुपूरमाधुरी-
निपानमत्तविस्फुरत्प्रतापमूर्तयो भृशम्
जयश्रिया स्वयंवृता नयश्रिया स्वयंवृता
अवन्तु भारतप्रजास्स्वतन्त्रभारतक्षमाम् ॥

४४) स्वयंवरार्थमागतामराङ्गनामणीमनो-
रथैकपूरणस्फुरत्प्रभावभावितास्सदा
अनूनमानमानिता मनोबलानुलालिता
अवन्तु भारतप्रजास्स्वतन्त्रभारतक्षितिम् ॥

४५) द्विषच्चमूघसद्भसन्महासिदुर्विषोरग-
प्रसूतसद्यशस्सुधानदप्लुतक्षमा स्समे
भयानकानकस्वनप्रवृद्धदिग्गजज्वरा
अवन्तु भारतप्रजास्सदा स्स्वतन्त्रभारतक्षितिम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

४६) दूराग्रहग्रहोद्गृदीतदुष्टरूष्टंशात्रवोऽ
दरान्तरान्त्रतन्त्रिकानियन्त्रितासयो रणे ।
अतान्तशान्तिचिन्तना नितान्तचिन्तितान्तरा
अवन्तु भारतप्रजाः स्वतन्त्रभारतावनीम् ॥

४७) करालकालकासरप्रकृष्टकन्धराघणं-
घणायमानघण्टिकारवार्भटीकटीकया ।
दिगन्तरप्रधावितद्विषद्वला मरूद्वला
अवन्तु भारतप्रजा स्स्वतन्त्रभारतप्रभाम् ॥

४८) विखण्डितप्रचण्डचण्डमुण्डरूण्डमण्डली-
प्रकाण्डचण्डिकाविडम्बिमण्डलाग्रधारया
प्रमापणप्रतिक्षणप्रजृम्भितप्रतिक्रमा
अवन्तु भारतप्रजा स्स्वन्त्रभारतप्रभाम् ॥

४९) नटेशताण्डवोन्नटन्निटाललोचनज्वल
त्करालकीलमालिकाविलोललोचनश्रिया
प्रसह्य दग्धविद्विषच्चमूचया निरामया
अवन्तु भारतप्रजा स्स्वतन्त्रभारतप्रभाम् ॥

५०) तटिन्नटत्कनत्कृपाणखण्डितद्विषल्लस-
त्तनुक्षरत्कवोष्णशोणितापगाभिरंजसा ।
प्रधौतजातिदुर्लगत्कलङ्कपङ्कशंकुका
अवन्तु भारतप्रजा स्स्वतन्त्रराष्ट्रसुश्रियम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

५१) गृहे गृहे विराजतामनन्तभाग्यवंहिमा
मुखे मुखे विभासतां सुखप्रमोदमञ्जिमा ।
कृते कृते प्रकाशतां जगन्नुता पुरोगति-
र्गते गते च दीप्यतां प्रजागृतिर्निरन्तरम् ॥

५२) उदारवारिसम्पदा ससारभूमिसम्पदा
प्रशस्तखानिसम्पदाऽनवद्यखाद्यसम्पदा
विनूलशास्त्रसम्पदा विवेकनीर्यसम्पदा
समेधतां जगन्नुता स्वतंत्रभारताम्बिका ॥

५३) अनेकजीववाहिनीनिरन्तराम्बुसारणी-
प्रणालिकासमृद्धमुग्धशस्यसस्यसत्फला ।
सुमावलीफलावलीलतावलीद्रुमावली-
वनावलीविराजिता विभातु भारतावनी ॥

५४) जगन्मरीचिमालिनी जगन्महत्वशालिनी
जगत्प्रमोदपालनी जगच्छुभैकशीलिनी ।
जगद्विषत्त्रिशूलिनी जगन्मरुन्निभालिनी
जयत्वशेषपावनी स्वतन्त्रभारतावनी ॥

५५) मरुन्मुदासुधाझरीसुमाधुरीजरीहरत्-
हरिद्दरीतरीतरत्सुचित्कलापरीमला।
समुन्मनत्समुन्मनी कलावनीकलापिनी
कृपावनी सुपावनी चकास्तु भारतावनी ॥

In Public domain. Digitization Muthulakshmi Research Academy

५६) विराजतामुदाररीतिमाधुरीमधूकृताऽ
खिलाचला कलाकलापकोमलानुलापिनी ।
झणन्झणन्मरालनूपुराञ्चितारविन्दपात्
धगद्धगत्तलत्तलत्तटित्कनत्परिच्छदा ॥

५७) पिनाकशूलशार्ङ्गचक्रपाशपट्टिशादिभी-
कराजिराजिजाजिमन्महास्त्रशस्त्रशालिनी ।
भयानकानकोत्कनज्ञहानकद्विषच्चमू
विपाटनोन्नटद्भटा विभातु भारताम्बिका ॥

५८) श्रुतिस्मृतीतिहासशास्त्रकाव्यसत्कथाकला-
द्यशेषवाङ्मयाभिवर्णितोन्नतात्मवैभवा ।
पवित्रयागहोमधूमपूतदिक्तटाञ्चला
जगत्तमोनिरासिका चकास्तु भारताम्बिका ॥

५९) तुषारभूमिभृत्किरीटरञ्जिता महापगा-
मनोज्ञपाणिपङ्कजा महाब्धिमञ्जुमेखला
अवन्ध्यविन्ध्यनूपुरा विशालमानसाञ्चिता
विचित्रकाननांवरा विभातु भारताम्बिका ॥

६०) यशोमयीं महोमयीं महोन्नतां महोज्ज्वलां
सुसंविदासुधाधुनीं सुसभ्यतामृतापगाम् ।
कलामयीं सुसंस्कृतिं दिगन्तरे निरन्तरं
प्रसारयन्त्यहर्निशं विभातु भारताम्बिका ॥

In Public domain. Digitization Muthulakshmi Research Academy

मातृदेशं प्रीणयानुज

१. मातृदेशं प्रीणयानुज भ्रातृभावं दर्शयानुज ।
दनुजवृत्तिं दूरयन्निजमनुजवृत्तिं पालयानुज ॥

२. अन्यहिंसां सन्त्यजानुज भूतकरुणां दर्शयानुज ।
मानवत्वं मा दहानुज माधवं मा विस्मारानुज ॥

३. प्रेमवान् किल भवति मनुजः प्रेमरहितो दनुज एव ।
प्रेमतत्वं विद्धि पूर्वं प्रेम नियतं पूजयानुज ॥

४. तूलशय्याशयनशीलः कष्टजीविभिरर्जितेन ।
अपहृतेन बलाद्धनेन च तुङ्गमुदरं मा निपूरय ॥

५. धनिकनिर्धनभेदवैरं वर्गकलहं द्रोहचिन्ताम् ।
स्वार्थबुद्धिं पक्षपातं क्रोधमीर्ष्यां मनुज दूरय ॥

६. कृषककार्मिककष्टजीविस्वच्छहृदयं मा निपीडय ।
कृषककार्मिकहृदयदुःखे खिद्यति ध्रुवमेष लोकः ॥

७. उच्चनीचविभेदबुद्धिः स्वार्थनिरतः कल्पिताऽनुज ।
उच्चनीचविभेददृशया मातृभूमिं मा कलङ्कय ॥

८. रसिकहृदयं प्राप्य पूर्वं रसमयं कुरुविश्वमेतत् ।
विरसिको यदि भवसि नूनं नीरसं परिणमति भुवनम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

शङ्खारवः

१. प्रयाहि धीरं विक्रान्तमणे ! प्रयाहि पुरतो विक्रान्तमणे ।
जवेन भारतपुरोगतौ निजकवोष्णरक्तं बहूपयोक्तुम् ॥

२. अरालजलमुग्धोपगभीरं करालकाहलनादं कुर्वन् ।
लयान्तनृत्यत्स्फुलिङ्गवह्निं क्रियानिविष्टस्तृणाय मत्वा ॥प्र॥

३. अपेहि दूरं हताश शीघ्रम् उपेहि पुरतः कृताश धीरम् ।
निरस्य प्रगतेर्विरोधिवर्गं पुरोगतिं निजराष्ट्रं नेतुम् ॥प्र॥

४. स्वराज्यमधुना श्रेयोराज्यं निरन्तरायं प्रयस्य कर्तुम् ।
स्वयं पुरोगमतपोनुरूप - प्रयोगसिद्धिं लभस्व नियतम् ॥प्र॥

५. स्वराष्ट्रबहुलप्रगतिपुरोगतिनिरोधकं मा कार्षीः कार्यम् ।
कदाऽपि चिन्तय राष्ट्रद्रोहं विदेशवित्तान्मा स्वप्नेऽपि ॥प्र॥

६. स्वराज्यसिद्धेर्बहुधाप्रभृति स्थिरा समृद्धि स्सुसाधिताऽपि ।
प्रतिष्कशा निजदेशश्रेयस्तितांसयोपरि पुरस्सराम ॥प्र॥

७. अपाकृतैकाहारसमस्याऽऽतपैश्च भाक्रानंगल् प्रमुखैः।
शतैस्सरोभिस्सस्यश्यामा कृतोर्वरा मरूभूमिस्सर्वा ॥प्र॥

८. विशीर्णकुकुटीवास्तव्यजना विशालवेश्मसु विलसन्त्यधुना
निरक्षराणां सङ्खा ह्रासं परेण गमिताऽऽदरेण देशम् ॥प्र॥

९. इलाऽपि गमिता जवनैर्विपुला स्थलीययानैरिव गोष्पदताम्।
विमानशक्त्या विलङ्घिता द्यौस्समुद्रमुद्रा कृता तरीभिः ॥प्र॥

In Public domain. Digitization Muthulakshmi Research Academy

१०. प्रतिप्रदेशं तटित्प्रदीपैर्नितान्तदीप्तैस्तमोऽप्यपास्तम् ।
न चाद्रियन्ते कदापि चान्द्रीं रूचिं जनास्तत्सुखानुभूत्या ।।प्र।।

११. अशेषविषयैस्स्वयंसमृद्धेस्सिसाधयिषयोद्यतं स्वराष्ट्रम् ।
मदेन रोद्धुं प्रणाय्यवर्गाः पदे पदे दुर्दमा यसन्ति ।।प्र।।

१२. अनेकचोरव्यापारपरा घनास्स्वदेशश्रेयो हन्तुम् ।
समं क्रमन्ते प्रजा रिपूँस्तान् समूलकाषं कष त्वमधुना ।।प्र।।

१३. प्रजाधनेन च सुखानुभूतिं भजन्ति ये ये कृताधिकाराः ।
प्रजाद्रुहस्तान् नराधमानपि निजाधिकारान्निपातयन्तु ।।प्र।।

१४. शुनायमानास्सुवर्णसिंहासनेषु बहवोऽधिकृता स्सन्ति ।
स्वराष्ट्रसम्पद्विलुण्ठकानां धुरन्धरास्ते प्रजागृहित्वम् ।।प्र।।

१५. जहीहि जडतां, कर्मणि दीक्षां गृहाण, घोरं दूरय तिमिरम् ।
कृतश्रमस्त्वं, मितव्ययस्त्वं कृते स्वमातुस्समर्पय स्वम् ।।प्र।।

१६. स्वदेशमवितुं सर्वस्वं ते मुदा व्ययीकुरू महामनीषिन् ।
स्वदेशमवितुं प्राणानपि ते मुदा बलिं कुरु ननु मेधाविन्।।प्र।।

१७. सदा पुरस्कुरु समत्ववादं हृदा तिरस्कुरु नीवीवादम् ।
स्वयं प्रशासनकृतकृत्यस्त्वं वयस्य शिष्टिं ब्रूहि परस्य ।।प्र।।

१८. प्रजाहितैषिन् । महामनीषिन् प्रजागरूकः क्षणेक्षणे भव ।
यतो हि लोकप्रशासनं तत् प्रतीपशक्तिर्यतते हन्तुम् ।।प्र।।

In Public domain. Digitization Muthulakshmi Research Academy

१९. बिभीहि विलयादपि मा कस्मात् शृणीहि जनताविरोधि कीटान्।
जहीहि कुलमतवर्गविरोधं पुनीहि राष्ट्रं स्वशक्तिहविषा।।प्र।।

२०. पदैकमोहात् प्रजाप्रशासन विदारणं वा कदाऽपि मा कुरु ।
स्वलाभदृष्ट्या प्रजैकताया विलोपमथवा कदाऽपि मा कुरु।।प्र।।

२१. चिकीर्षितं वद विवक्षितं कुरु न कर्मणो वद वचो विरूद्धम्।
स्वलाभपूर्त्यै न वञ्चयान्यान् स्वलाभमपि जहि परस्य न मुदे।।प्र।।

२२. कुलाचलानपि विजृम्भमाणान् बलेन रोद्धुं शक्नोषि त्वम् ।
दवानलानपि ग्रसितुं प्रभवसि तवास्त्यजेयं न किमपि लोके।।प्र।।

२३. कदा प्रमादं कुरुष्व मा मा सदापि जागृहि विधेयकर्मणि ।
विदाङ्कुरु त्वं स्वराज्ययोगं विदाङ्कुरुष्व स्वराष्ट्रभद्रम् ।।प्र।।

२४. विदेशमोहव्याधिग्रस्तान् स्वदेशजनुषश्चिकित्स शीघ्रम् ।
समूलघातं विदेशतन्त्रप्रमादशक्तिं जहि त्वमधुना ।।प्र।।

२५. अरातिजयभवयशस्समृद्धं करालतेजः प्रभावपूर्णम् ।
सुधीः कलङ्कय कदापि मा मा विधानभीतो निजं चरित्रम् ।।प्र।।

२६. तिरोभवत्तन्महीध्रशृङ्गाण्यरालगत्या व्यतीत्य भद्रम् ।
विजृम्भमाणान् नदीनदानपि विलङ्घ्य राष्ट्रं श्रेयो नेतुम् ।।प्र।।

२७. स्वराज्यभाजनदीप्तं ज्योतिस्स्वतन्त्रताख्यं स्वशक्तिवर्ति ।
ज्वलन्निजासृक्तैलेन प्रतिकलं सभाजय निरन्तरायम् ।।प्र।।

In Public domain. Digitization Muthulakshmi Research Academy

२८. न शान्तिवादात् बिभेति वैरी प्रशान्तिरपि नो सिध्यति राष्ट्रे ।
इतोऽपि मित्राभासान् शत्रून् प्रतापतो हि प्रधावयारम् ।।प्र।।

२९. उदात्तभारतचरित्ररीती रूदारजातिप्रतापकीर्ती ।
निजासुधनसंव्ययादपि त्वं स्वराष्ट्रबन्धो निभालयस्व ।।प्र।।

३०. निगूढभारततेजः पुञ्जं प्रगाढमन्तःर्बहिश्च धीरम् ।
प्रकाशयन् है, हृदन्तरालं विकासयन् वै विनिद्रशक्त्या ।।प्र।।

३१. तुषारपिहिताहस्करदीप्रं तुषावृतानलदारूणदाहम्
शमावृतं ते निगूढतेजस्समीकरङ्गे शत्रुः पश्यतु ।।प्र।।

३२. अहीनविद्युन्नटत्कृपाणप्रहारजर्जरिताङ्गा नूनम् ।
अरातयस्ते द्रोप्यन्त्यद्धा हरित्सु समरात् प्राणानवितुम् ।।प्र।।

३३. समाजवादच्छलेन नूनं समाजमेतं समजं कृत्स्वा ।
क्रमेण विद्विट्कबन्धहस्तैरशेषराष्ट्रं ग्रसितुं यतते ।।प्र।।

३४. महोमयं ते यशः पवित्रं यशोमयं ते महच्चरित्रम् ।
कलामयं ते जीवितममलं कलङ्कयितुमिह यतते वैरी ।।प्र।।

३५. स्वपञ्चशीलाभ्युपगमदम्भात् प्रपञ्चमकरोत् तवाभियाती ।
दुराक्रमोद्यतममुं प्रतारकमरिं नराधममरं जहि त्वम् ।।प्र।।

३६. स्वराष्ट्रमवितुं सर्वस्वं ते मुदा व्ययीकुरू विरोधिवर्गात् ।
स्वराष्ट्रमवितुं प्राणानपि ते मुदा बलिं त्वं कुरु सङ्ग्रामे ।।प्र।।

In Public domain. Digitization Muthulakshmi Research Academy

३७. स्वराष्ट्रजनतां सुभटीकुर्वन् स्वराज्यलक्ष्मीपदाब्जपीठम् ।
करालखड्गत्रुटितारुन्तुद विरोधिरूधिरैरभिषिञ्च त्वम् ।।प्र।।

३८. सदाभ्यमित्र्यव्यूहान् सुदृढं स्वभूमिसीमसु कल्पय शीघ्रम् ।
बलात्प्रविष्टं प्रहृत्य विद्विट्कुलं बलेन द्रावय शीघ्रम् ।।प्र।।

३९. अभारतीयान् स्वजातिशत्रून् स्वभारतात् विद्रावय धीरम्
अखण्डभारतराष्ट्रं वितनितुमखण्डशक्त्या कृषिं कुरूष्व ।।प्र।।

४०. श्रयस्व खड्गं छातुं शत्रून् डयस्व यानैरहितान् व्यद्धुम् ।
व्ययस्व रक्तं दुष्टान् जेतुं म्रियस्व राष्ट्रं श्रेयो नेतुम् ।।प्र।।

४१. रिपुर्दुरात्मा परहंसालिभिरुपास्यमानां मानससरसीम् ।
स्वदेशमातुर्मानसकल्पां मदात् ग्रहीतुं द्रागुद्युङ्क्ते ।।प्र।।

४२. विभज्य दत्तं पाकस्थानं स्वभारतीयं दयया यस्यै ।
विलोमजातिस्साप्यधुना दुष्प्रलापकलहैस्त्वामभियुङ्क्ते।।प्र।।

४३. यमेव मित्रं पूर्वं ममंस्था यमेव सभ्यत्वार्हमवोचः
स एव योद्धुं त्वामभियातस्सएव भारतमाक्रमते ते ।।प्र।।

४४. ज्वलत्प्रतापाहुतीकृतारे । अलं ग्रथित्वा वधान धीरम् ।
स्वराष्ट्रदुर्गद्वारे द्विषतां शिरोभिरेभिस्तोरणमालाम् ।।प्र।।

४५. यमा अनेके प्रभूय कोपे प्रमापयन्ति द्विषस्तवाजौ ।
क्रुधारुणेक्षासमुत्थितोल्काप्रधूतदहना दहन्ति शत्रून् ।।प्र।।

In Public domain. Digitization Muthulakshmi Research Academy

४६. अरण्यरुदितं भस्मनि निहुतं परासुपूजनमम्बरहर्म्यम् ।
अथ द्विषं प्रति प्रशान्तिपाठो मुधाप्रयासं जनयति नूनम् ।।प्र।।

४७. जिगर्हिष त्वं विजातिनीतिं जिगास नित्यं स्वदेशनीतिम् ।
पिपिक्ष विद्विट्कुतन्त्रयन्त्रं पुपुक्ष दिव्यं स्वराज्यतन्त्रम् ।।प्र।।

४८. क्षमस्व मा मा कदापि शत्रून् रमस्व विद्विण्मारणहोमे ।
तनुष्व तेजोवृद्धिं राष्ट्रे चिनुष्व शीर्णन् स्वभूमिभागान् ।।प्र।।

४९. अधीष्व चीनादेशचरित्रं मुधा प्रशान्तिं मा च ब्रूहि ।
अधीष्व भारतचरितमुदात्तं मुधाऽवमानं शमेन माऽऽप्नुहि।।प्र।।

५०. पदप्रहारैर्यथाऽभियाती मदोद्धतोऽपि स्ववशो भूयात् ।
रिपुस्तु वश्यो न सान्त्ववादैरपि स्वकं द्रागाधिरोहति शीर्षम् ।।प्र।।

५१. कदाऽपि मा कुरु कृपामपारां स्वदेशजातिद्रोहिणि शत्रौ ।
सदाऽपि वैरं शोच्यं निवमन् दिदंक्षति त्वां विषाहिवद् भो।।प्र।।

५२. विदेशजनतारञ्जनबुद्ध्या स्वदेशभञ्जनमधुना कुरुषे ।
अहो त्वदीयं किमुच्यते भो महत्वमेतत् त्रिभुवनचोद्यम् ।।प्र।।

५३. क्रमेण कवलीकरोति शत्रुर्वमानयन् न स्थलानि नूनम्
अथाऽपि शान्तिस्वप्ननिलीनः क्रुधा स्वचक्षुर्नोन्मीलयसि ।।प्र।।

५४. पवित्रसिन्धुं विरिञ्चिदेशं त्रिविष्टपं स्वं स्वयमरिहस्ते ।
समार्पयः किल, खिलीकृतं भो शमप्रवचनै राष्ट्रमखण्डम् ।।प्र।।

In Public domain. Digitization Muthulakshmi Research Academy

५५. स्वदेशरक्षामहोद्यमाजिषु मुदाऽसुदानं चक्रुरनेके ।
विदेशवित्तक्रीतस्वान्ता स्वराष्ट्रहानिं कुर्वन्त्येकम् ।।प्र।।

५६. अलं प्रशान्तिप्रवचनतपसा ज्वलन्तमेनं पराभवाग्निम्
प्रधूमितं तै स्समरोन्मत्तैरथाऽपि शमय स्वकशरवर्षैः ।।प्र।।

५७. प्रशान्ति पाठप्रवचनलग्नो द्विषा मिहाङ्गुलमात्रीं भूमिम् ।
कदापि माऽर्पय निगूढशक्त्या मदोद्धतान् तान् मारय मंक्षु।।प्र।।

५८. चिराय सिद्धां प्रमाणबद्धां स्वभूमिरेषां परिमार्जयितुम् ।
समुत्सहन्ते द्विषो नितान्तं समुद्धरैनां विजित्य शत्रून् ।।प्र।।

५९. स्वशान्तभावं विलोक्य शत्रुर्विशिष्य चास्मदशक्तिं मत्वा ।
स्वभूमिसीमाक्रमते निर्भयमरे मुधा किं शान्तिं जपसि ।।प्र।।

६०. हृदन्तराले कदाऽपि माऽऽप्नुहि दुरन्तजीवननैराश्यम् ।
वृथा स्म तुच्छं क्लैव्यं मा गा मुधा कुरूष्वारातिकुतन्त्रम् ।।प्र।।

६१. अरून्तुदोक्ती स्स्वराष्ट्रमण्डल विधुन्तुदानां भयङ्कराणाम् ।
निरस्य चेरम्मदद्युतिं द्राक् समस्य भिन्दि प्रगाढतिमिरम् ।।प्र।।

६२. स्वमातृमौलिं हिमालयं भो अमान्तमेवाक्रमितुं वैरी ।
कुमाययाऽऽयातीमं शत्रुं प्रमापयितुमिह सन्नह्य त्वम् ।।प्र।।

६३. स्वदेश विद्विण्णराधमासृङ्नदप्रमोदोन्मादक्रीडा ।
अरात्यरून्तुदभीकृत्क्ष्वेडा पुराञ्चतु त्वा माहवचण्डी ।।प्र।।

In Public domain. Digitization Muthulakshmi Research Academy

६४. कनत्कपालैरभिषिञ्चाकृतिविनिस्सरद्रुधिरेद्धैः कालीम् ।
द्विषा मिहान्त्रस्त्रग्भिः पूजय वसास्थिमज्ञावलिभिस्तर्पय ।।प्र।।

६५. त्वदीयदारूणतेजसि हूणा मदोद्धतास्ते यवनाः पूर्वम् ।
शकास्तुरुष्काश्शलभा इव भो विकुण्ठिताशा दग्धा अभवन्।।प्र।।

६६. क्रियैकसिद्धेस्तवाग्रतः परमये मनस्विन्नरातयस्ते
मृगादना अपि शुनकीभूय प्रगाढभीत्या सम्प्लायन्ते ।।प्र।।

६७. उदात्ततां स्वां जगति विशाले उदारयाऽऽविष्कुरु विक्रान्त्या ।
स्वयं विरोधिनमिमं कृतघ्नं स्मयेन जित्वा यशस्त्व माप्नुहि।।प्र।।

६८. सहस्रमुद्गरताडनदुस्सहमजस्रमाधिं समास्थितोऽपि ।
कदापि हृदये क्लैब्यं मा गा मुदा निहन्तुं यतस्व शत्रुम् ।।प्र।।

६९. अशेषविषयैर्महोन्नतं पदममन्दमधिगत मुदारराष्ट्रम् ।
पराभवन्तं द्विषं समन्तु पलाययितु मुज्जृंभस्वारम् ।।प्र।।

७०. तवास्ति विपुला पवित्रभूमिस्तवास्ति जातिर्गुणाभिरामा
तवास्त्युदात्तेतिहाससम्पत् नवा विभीतिः कुतोऽपि ते स्यात्।।प्र।।

७१. तवोन्नतत्वं हिमालयोऽयं पवित्रतां ते सुरस्रवन्ती ।
त्रयीऽयमादिप्रधीप्रशस्तिं स्वयं जगत्यां विवृणोति परम् ।।प्र।।

७२. मुरातनूजं तथाग्निमित्रं मुरारिगुप्तं शकारिभूपम् ।
प्रतापसिंहं शिवाजिवीरं प्रतापसिंहान् स्मरापरानपि ।।प्र।।

In Public domain. Digitization Muthulakshmi Research Academy

७३. जयोऽस्तु तुभ्यं विद्विण्णर दुर्णयापनोदनजाग्रच्छक्ते ।
अरातिशोणितधारापूरैः स्वराष्ट्रदुर्गां तर्पय समरे ।।प्र।।

७४. स्वयंसमृद्धौ समाधिकारास्स्वयंश्रमे वा समानभागाः।
समाजदीप्तौ समानुरागास्समुन्नतिं वयमवाप्रवाम ।।प्र।।

७५. कृषीवला वा कर्मकरा वा कवीश्वरा वा सुकारवो वा ।
स्वतन्त्रराष्ट्रप्रवृद्धिविषयेष्वितोऽरि कृतितां वहन्तु बहुधा।।प्र।।

७६. विहायभाषाप्रान्तविरोधं सहायभूता वयमन्योन्यम् ।
जगन्नुतासु क्रियासु नूनं प्रगाढमुन्नतिमवाप्रवाम ।।प्र।।

७७. कलिङ्गकेरलमपाटवङ्गास्त्रिलिङ्गतमिलासमकाश्मीराः।
इमे समे वयमुदार भरतक्षमासुता इति विभावयामः ।।प्र।।

७८. करा अनेके पदोऽप्यनेके स्वरा अनेके मुखान्यथाऽपि ।
विभाति हृदये तुल्यस्पन्दं प्रभूतमस्माकमेकमेव ।।प्र।।

७९. अनेककर्म स्वविश्रमं श्रममनन्यचित्ता विधाय लोके ।
समस्तसम्पत्समृद्धिमेनं समुन्नयामस्स्वमातृदेशम् ।।प्र।।

८०. प्रियात्मजोऽहं व्ययीकरोमि प्रियानसूनपि कृते तवाम्ब ।
इतीव शपथं विधाय भारतसुतस्स्वसिद्धिं भजेत सर्वः ।।प्र।।

....

In Public domain. Digitization Muthulakshmi Research Academy

उषस्सूक्तम्

जननि! जगृहि भारतावनि । जननि । जय जय पूतचरिते ।
सकलजनतानन्दवाहिनि । निखिलमानवशान्तिसारणि ॥

१. सत्त्ववाद इव प्रसादो, दिवि रजोवादः प्रसर्पति
सान्ध्यरागस्तम इवारादपि तमोवादोऽपयाति
समसमाजविचारधारेवैधते दिव्युदयशोभा
पुञ्जवादविचारधारेवास्तमेति तमश्छटाऽपि

२. मृदुकरैरिव सकलजनतां रञ्जयन्नधुनाऽस्तमयते
अमृतमयहृदयोऽयमहहा कालवशतो जननि ! राजा
व्यक्तिवादमहाप्रतिष्ठेवैति विलयं कौमुदीऽयं
अधिनियन्तेवाखिलं जगदर्यमावशमातितांसति ॥

३. कलुषरहिता देशसेवेवाऽवली हरितां प्रसन्ना
प्रतिदलानामिव विवादाः कलकला वयसां भवन्ति
जननि निर्वाचन पराजित प्रतिदलानामवलिरिव सा
तारकाणां मालिकाऽन्तर्धानमुपयातीह नूनम् ॥

४. बहुलखरकर भारनमिता स्वल्पजीवनवृत्तिशीर्णा
कुवलयाली क्षीयते सामान्यजनतेवाधुनाऽम्ब !
अधिकृतेषूत्कोच इव कार्यालयेष्वविनीतिरिव वा
तिमिरपटली कुञ्जतरुगिरिकन्दरासु निलीयते ॥

In Public domain. Digitization Muthulakshmi Research Academy

५. भृशमकिञ्चनशिष्यसत्प्रतिभेव भाति न दीपशोभा
भृतिविरहिताश्शिक्षिता इव चन्द्रकिरणा निष्कलास्ते
जननि ! जनगणतन्त्रदिनकरतेजसा निहताशवाशाः
विविधसंस्थानाधिपालाः कौशिका इव लयमयन्ति ॥

६. साम्यवादे क्रान्ति विसृमरधोरणीऽव विजृम्भते
रक्तपातेनाधियन्तुं वियति सन्ध्यारागरेखा
दलितपीडित दीनजनतावेदनामयहृदयदीर्णा
जाठरज्वालेव सर्पत्यरूणरेखा प्रतिविधातुम् ॥

७. कृषककार्मिककष्टजीविश्रमजजललवकैतवेन
तुहिनजलकणजालमपनुदतीव तापं प्रकृतिमातुः
भृतिसमष्टिविधानसिद्धौश्रामिकाणामिव मनांसि
नियतमवदातानि जातान्युषसि तरुगुल्मान्यमूनि ॥

८. अधिनियन्तुश्शासनादिव जगदराजकदुर्गतेरिव
तिमिरपटलात् क्रमविमुक्तं जीवकलया लालसीति
कूटवणिजो व्यंसका उत्कोचका अपि सन्त्यनेके
ताम्रचूडा ''जागृतेति'' प्रतिपदं प्रतिबोधयन्ति ॥

९. वेदिकास्विव नायकास्तरुशाखिकासु रुवन्ति कीराः
चलति चान्दोलनरतामितकामरुतमिव काकविरुतम्
स्वार्थनिरताः पदविरहितान् नायकानिव पदविलसितान्
कैरवाणि विहाय मधुपा विकचकमलान्याश्रयन्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

१०. क्षिपणिकर्मागारकारव विविधवेशनसमयरसितम्
श्रामिकान् स्वविधेयकर्म विधातुमधुना जागरयति
संविधानमहोऽपि गणतन्त्रेणबिम्बावरणभूतं
द्रोहिकण्टककुण्ठक स्तनयित्नुहिमकूहा निहन्ति ॥

११. असहमानो मैत्रमुदयं सकलकमलामोदनिरतम्
उषसि दोषाकर इवेन्दुर्म्लानवदनोऽपैति दूरम्
सार्वजनिकाभ्युदयनिरता लोकजागरणैकशीलाः
तरणिकिरणाः पर्यटन्ति प्रगतिकारा नायका इव ॥

१२. वर्गकुलमतजातिविरहितजनसमाज इवाधुनाऽयम्
समविकासामोदसम्पदमेति नवनलिनकरोऽपि
अनुगरहिताः पदविगलिता दिग्विमूढा नायका इव
शशिवियोगान्नियतमन्धा अतिविषीदन्त्यपि चकोराः ॥

१३. सपदि निर्वाचनदशायां पौरसुविधावहविधाना
सरति शासकपक्षकृतिरिव मलयमारूतमधुरलहरी
उन्नतानि पदानि बहुधा नायकाश्रित सहचरा इव
शैलतरुशिखराणि नलिनीनायकांशव आक्रमन्ते ॥

१४. विविधसंस्थानां समुद्धरणेषु कृतदम्भावताराः
ध्यानमुद्रां धारका इव जलतटेषु बका भजन्ते
सरसबहुसहकारशाखासंश्रिता दलपिहितरूपाः
मूलसारग्रसननिरताः परभृता विलसन्ति समजे ॥

In Public domain. Digitization Muthulakshmi Research Academy

१५. कायमेदश्श्रम मृतेऽपि व्यंसका इव भोगभाजः
राजकीयाः पीठमर्दा झिल्लिकाः परितो रुवन्ति
नोपयोगमनातपा उपयान्ति विविधा योजना इव
आतपोऽपि विवर्धते श्रमजीविसन्तापाग्निवदसौ ॥

१६. जननि ! जनगणतन्त्रतरणौ भासितेऽपि न याति तन्द्रा
नापयाति तमो न दीप्तिर्नापि विकसति हृदयकमलम्
प्रान्तभाषादुरभिमानैर्वर्गकलहैः पदविमोहैः
कामनादैः वक्रवादैः कुण्टयन्ति प्रगतिमधमाः ॥

१७. नियति सहजादर्शसाम्यसमाजपुञ्जनियन्तृवादाः
नास्तिकास्तिकदुरपलापा दधति वैरं जनमनस्सु
शान्तिनिर्मलजीवनग्रामाम्बुजाकरनिकरमधुना
अविमलैषा कलुषयति दूराजनैतिकसैरिभालिः ॥

१८. शासनातिक्रमविधानैर्दुरपवादैस्स्वार्थनिरताः
दुष्टशक्तिप्रेरणाभिर्दधति देशेऽराजकम्
जयम्रियस्वाकरणि मेदुरतीव्रनादैर्विविधवर्गैः
दुर्विधानदुरूद्यमैस्स्थगयन्ति वस्तूत्पत्तिमितरे ॥

१९. चित्रचित्राडम्बरैर्निजराजभोगविलासवेषैः
राष्ट्रियं धनमम्ब ! पैतृकमिव च केचन दुर्व्ययन्ते
स्वस्वयोगक्षेमदृष्ट्या नायका वा शासका वा
व्यवहरन्ति, प्रतिविधाने भावना जनहृद्युदेति ॥

In Public domain. Digitization Muthulakshmi Research Academy

२०. अक्रमद्रविणार्जनानि श्रामिकाधिकपीडनानि
अधिकमूल्यान्यधिकशुल्कान्यनमितायादीनि बहुधा
स्वार्थपूरितराजनैतिकदुर्दलीयकुचेष्टितानि च
लोकतन्त्रेऽप्रत्ययस्याराजकस्य च कारणानि ॥

२१. कोटिवीरैः प्राणवलिनोपार्जितां स्वायत्ततामिह
हर्तुमभियुङ्क्ते रिपु र्बहिरन्त, रनुपदमम्ब । जागृहि
जनगणेष्वधिसुप्त नवचैतन्यदीप्तिं जागरयितुं
प्रगतिमयजीवनविधानं समुपधातुं जननि जागृहि ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

भारतमहिम्नःस्तुति

१. यत्राभ्रतलचुम्बितुङ्गशृङ्गावलि - श्शीताचलस्सालवद्विभाति
यत्र मन्दाकिनी घुंघुंमस्वनदूर्मि - रापुनाना हृदयानि वहति
यत्रार्षभारती चिदचिदीश्वरतत्त्व - संदर्शनी विजरीहरीति
यत्र संस्कृतभारतीज्ञानविज्ञान - तेजोऽन्यखण्डेषु तन्तनीति
विश्वमङ्गलपावनोदारचरित - मगणितानन्तधनधान्यभाग्यराशि
मिहपरानन्दसन्दोहसंविधायि - पूर्ण भारतभारतमानतोऽस्मि

२. यत्पतकानिलामदमत्तभूस्वामि - मौलिदीपर्चीषि परिमृजन्ति
यच्छिलीमुखगणा विद्रोहिहृदयाम्बु - जासृगासवपूरमापिविन्ति
यत्तिग्मतेजांसि साम्राज्यवादि दु - र्भावान्धतमसानि दूरयन्ति
यद्वाहिनीभ्रमाः प्रतिपदप्रतिरोधि - भूभृन्मदाटोपमपहरन्ति
सा गुणोपायशक्तित्रयोदयादि - सिद्धिसम्पन्ननृपनीति विदितकीर्ति
रमलगणतन्त्रभारतमातृमूर्ति - रनुपमानन्दविस्फूर्तिरुदयमेतु ॥

३. यस्य शक्तिर्महाकालरात्रिविभीत - भरतपालनदीक्षिता बभूव,
यच्छूरता क्रूरवैरिवारणजीव - नादाननित्यव्रता चकास,
यद्धीरता सत्यशिवसुन्दरोदार - संस्करसारायिता ललास
यस्य तेजो देशदास्यसंतमसनुत् - स्वातन्त्रयभानूदये ससर्ज
विविधशात्रविध्वंसनैककेलि - विहरमाणपराक्रमानलहुतासु
परमभारतस्वातन्त्र्यसमरवीर-विविधसैनिकनिकुरुम्बमानतोऽस्मि॥

In Public domain. Digitization Muthulakshmi Research Academy

४. त्रुटितमत्तारातिमस्तकव्रातेन - निर्माय निर्माय तोरणानि
विद्वेषिपरिपन्थिरक्तचन्दनवारि - सङ्कीर्य सङ्कीर्य चत्वरेषु
द्विषदस्थिचूर्णेन रङ्गवल्लीकलां - सम्पाद्य सम्पाद्य वेदिकासु
सुरभिलामलयशोमुक्तावितानानि सन्धाय सन्धाय दिङ्खेषु
सर्वतन्त्रस्वतन्त्रैकभारतस्व - राज्यलक्ष्मीः प्रतिष्ठापिता च येन
तज्ञगज्ञनपोपुवोदारचरित - ममरसैनिकनिकुम्बमानतोऽस्मि

५. पाराशर्यमहर्षिसूक्ति सुषमासौवस्तिकीतत्त्ववि-
त्संवित्स्वागतिकी सनातनमतप्राभूतिकी सर्वदा ।
वेदाभ्युन्नतिकी विरोधिविमतव्याधूतमाशब्दिकी
भायाद् भारतभारती श्रुतिशिरस्सिद्धान्तदौवारिकी ॥

६. नीलं वारिभृतां गवाक्षति पदं यत्कीर्तिसौधावलेः
स्वर्णक्ष्माभृदपि स्फुलिंगतितरां यच्छौर्यवह्नेः स्फुटम् ।
गङ्गा भङ्ग धुताम्बुशीकरति यत्त्यागैकधारम्बुधेः
वन्दे तं भरतं नृपालमुकुटालङ्कारहीरं सदा ॥

७. प्रजानुरञ्जनपरान्तरङ्गान् प्रभावसाहसपराक्रमाढ्यान्
स्वधर्मरक्षानिविष्टचित्तान् समस्तजनतावनैकतानान् ।
कलिङ्गकेरलमराठवङ्गान् त्रिलिङ्गमालवसुराष्ट्रवीरान्
अवन्तिमागधकुरूनू प्रमुख्यान् महीपतीनपि विभावयेऽहम् ॥

८. स्वभारतजिगीषयाऽऽगतमपारसेनावृतं
सिकिन्दरसमाह्वयं लघु विजित्य यो भारतात् ।
पलायनमपाठयत् समरशूरसेनाञ्चितं
स्मरामि पुरूषोत्तमं तमपि वीरराजोत्तमम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

९. यस्योदग्रप्रतापज्वलदनलजटालार्चिरुत्तप्तचित्ताः
शत्रुक्ष्माभृन्महोक्षाश्शरणमनुययुः पादमूलं विनम्राः।
यस्मिन् साम्राज्यभारं वहति च जनता प्राप निर्भीतिभोगान्
मौर्यं श्रीचन्द्रगुप्तं रिपुजनशमनं सार्वभौमं तमीडे ॥

१०. स्तम्भा अपि यत्कीर्तिमुदारां - गायन्त्यविरतमाशाचक्रे ।
सम्राट्तिलकं शान्तिवादिनं - पुण्यश्लोकमशोकं वन्दे ॥

११. दिग्जेतुर्यस्य तेजः प्रगतिकृदुदयात् प्राणरक्षैकचित्ताः
प्लायन्त ध्वान्तदेशं रूचिमयभरतं क्षिप्रमुत्सृज्य हूणाः ।
धर्माम्भोरुड्विकासोऽभवदमलकला हिन्दुषु प्रादुरासीत्
सम्राजं मालवेन्द्रं तमहमपि यशोधर्मवर्माणमीडे ॥

१२. चखाद यस्यासिवषोरगो द्विषत् - विलोम भूपासुमयानिलंबलात्
ज्वलत्प्रतापज्वलनार्चिरर्चितं - प्रतापसिंहं प्रणमामि नित्यम् ॥

१३. हिन्दुदेवताप्रतिमाध्वंसन - निरतं गोरि महामदमहितम् ।
यत्समहार्षीत् पृथ्वीराजं - शब्दभेदिप्रवणं वन्दे ॥

१४. क्रूरतुरुष्कप्रभुतारुन्तुद - मार्यावनिसन्त्राणधुरीणम् ।
सेनाव्यूहविधाननदीष्णं शूरं शिवनृपमविरतमीडे ॥

१५. तत्तत्संग्रामरङ्गप्रतिभट पटल प्राणवाताद्मरोद्यद्
निस्त्रिंशाहि प्रसूतामृतविशदयशोदेहदेदीप्यमानान् ।
स्वातन्त्र्यायोधनाग्नौ हुतधनवपुषः क्रान्तिशान्त्येकवीरान्
हीरान्धीरानुदारान् रिपुजनशमनान् राष्ट्रबन्धून् स्मरामि ॥

In Public domain. Digitization Muthulakshmi Research Academy

१६. प्रमथनसवने हूणनृपाणामापणहोमं कृत्वासिकया ।
याऽतर्पयुदुरु राष्ट्रदेवतां झान्सीलक्ष्मीं तामहमीडे ॥

१७. निजासिनिर्भिन्नमदोद्धतद्विषत् करोटिमाल्यैर्निजराष्ट्रदेवताम् ।
अपूपुजद्या बलशक्तिसंयुतां स्मरामि दुर्गां नरपालिकामिमाम् ॥

१८. हिन्दूराष्ट्रदुराक्रमैककुटिलव्यापारपारायणा
हूणा यस्य करालखड्गविहृतीरास्वाद्यसङ्ग्रामतः ।
''ओ मै गा'' डिति शोकविप्लुतमहाक्रोशैः पलायन्त तं
तान्त्यातोपसमाह्वयं रणजितं वीराग्रगण्यं भजे ॥

१९. परिपन्थि पशुस्तोमबलिना राष्ट्रचण्डिकाम्
योऽतूतुषन् महावीरं वाजीरायं भजाम्यहम् ॥

२०. लसद्यशस्वच्छ्रगुलुच्छवासना सुवासितं येन कृतं स्वभारतम् ।
सिताननोज्ञासनकर्मकर्मठं स्मरामि तं कन्वरसिंहमुत्तमम् ॥

२१. तमुदारमतिं कर्मयोगिनं स्वातन्त्र्योद्यम मूलस्तंभम् ।
परमकलासुरभीकृतमनसम् तिलकमहोदय मनुदिनमीडे ॥

२२. विरोधिविधुमण्डलग्रसनराहुदंष्ट्रास्फुरत्
करालकरवालिकातटनटत्प्रतापश्रियम् ।
यशस्विजननोनुतं तिलगुसीमसिंहं सदा
मनस्विकुलभूषणं तमपि रामराजं भजे ॥

२३. भारतजननीदास्यविमोचन संत्यक्तासुं साहसवीरम् ।
स्वदेशभक्तं स्वराष्ट्रशूरं लजपतिरायं प्रतिदिनमीडे ॥

In Public domain. Digitization Muthulakshmi Research Academy

२४. उदात्तमतभारताक्रमणबद्धगार्ध्योन्मिष-
न्मदांग्लरुधिरापगा मुदरपूरमापेपिवन् ।
यदुद्यदसिभैरवो निजमतिष्ठिपद् गौरवं -
स्तवीमि महितौजसं भगतसिंहनीरोत्तमम् ॥

२५. यस्य क्ष्वेडितमानिशम्य तरूणैरूज्जृम्भितं सर्वतः
यद्धुङ्कारमुपाकलय्य चकितैः ल्पायन्त हूणौर्नृपैः ।
येनासृग्जलधारया च निजया प्रक्षालितं दुर्यशः
विख्यातं भुवि चन्द्रशेखरमहावीरं भजे सर्वदा ॥

२६. क्रान्तिवादिशिरोरत्नं देशभक्तशिखामणिम् ।
ओजस्विनं महावीरं वन्दे सावर्करं गुरूम् ॥

२७. दूरादालोक्य हूणा यमहितशमनं सङ्गरे त्यक्तवन्तो
बाणान् प्राणावनार्थं विविशुरुदनिधिं केचिदुत्क्रान्तजीवाः।
भूमौ पेतुश्च केचिद् दिशि दिशि चकिता श्चेरुरानम्य पेठुः
स्वीयं दैवाह्वयं तं भरतसुतमणिं श्रीसुभासं नमामि ॥

२८. न्यायवादिशिरोरत्नं देशसेवाधुरन्धरम् ।
चित्तरञ्जननामानं क्रान्तिवीरं स्मराम्यहम् ॥

२९. आंग्लेयानां समक्षमेव स्वतन्त्रभारतविजयपताकाम् ।
अतिष्ठिपद् या लालखिलोपरि 'केप्टेन्' लक्ष्मी तामहमीडे ॥

३०. विजातिविभुतां स्वदेशपीठात् पलाय्ययोऽसो स्वराज्यमेनम् ।
असाधयत्तं प्रसन्नचित्तं महात्मगान्धिं सदा भजेऽहम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

३१. न्यूनान्न्यूनं पञ्चशतानि स्थानान्येकीकृतवान् भरते ।
यो हरिगभीरगर्जितवचसा वल्लभदेवं तमनिशमीडे ॥

३२. अद्भुतचरितं तरणिसमानं जगदेकैककंशान्तिवादिनम् ।
प्रधानमन्त्रिणमादिममसमं जवहरपण्डितमविरतमीडे ॥

३३. आदौ योऽतिष्ठिपद्देशे विश्वविद्यालयंस्वकम् ।
आर्षधर्मप्रबोद्धारं वन्दे मदनमोहनम् ॥

३४. अजातशत्रुं राजेन्द्रं राधाकृष्णं सुधीमणिम् ।
राजगोपालनामानं चाणक्यमपरं भजे ॥

३५. आलोके योहि खर्वोऽपि त्रिविक्रम इवावभौ ।
तमहं शास्त्रिणं वन्दे लाल्बहद्दुरमन्वहम् ॥

३६. आयेजनाभिर्नैकाभिर्याऽगोप्सीत् नवभारतम् ।
प्रधानमत्रिणं वन्दे इन्दिरागान्धिमन्वहम् ॥

३७. उत्तिष्ठ जागृहि सखे ! चिरकालतस्त्वम्
दुष्टेन दग्धविधिना परिवञ्चितोऽसि
अल्पेष्टपूरणपरे रनुदानवित्तै
स्तुष्यन् स्वकँ स्वयमये किमु वञ्चयेथाः ॥

३८. ग्रामाद् बहिर्बहि रहो विनिवेशनैस्तै
रस्पृश्यताकिमपयाति विवर्धते किम ।
प्रत्येकश स्त्रिदशमन्दिरकल्पनाऽपि
नूने बहिष्करणमेव तवाभिचष्टे ॥

In Public domain. Digitization Muthulakshmi Research Academy

३९. दूराजनैतिकदलानि तथा मतानि
नानाविधानि निजलाभदृशा यतन्ते ।
नैकः प्रयस्यति तनोन्नतये समाजे
जागर्षि किं कुटिलवञ्चित ! नाधुनापि ॥

४०. अस्पृश्यता कथमिवोपनता सखे ते
आलोचितेऽपि हृदि न प्रतिभाति जातु।
स्प्रष्टुं त्रिभिः करणकैर्नितरामनर्हैः
नान्तर्भवस्ययि जनेऽद्यतनेऽपकृष्टे ॥

४१. अस्पृश्यतां सपदि राष्ट्रियताभिशाप
भूतामपाकुरूत सभ्यसमाजदूष्याम् ।
मेधाविनो ! हरिजनादिमनिम्नवर्गं
संवित् प्रबोधपरमां प्रगतिं नयध्वम् ॥

४२. हरिजनोरि जनोभूत् जातुमास्मचतंद्विषम् ।
मा स्म कार्षीत् व्यवस्थेयं शासकीया च सांघिकी ॥

४३. सङ्घर्शणं कुरुत सङ्घटितात्मशक्त्या
प्रोद्धर्तुमुद्यमपरास्स्वयमेव च स्वान् ।
जातीयतोपचितमात्मनि गौरवं स्वं
श्रेयोऽप्युदञ्चयत यूयमये युवानः ॥

In Public domain. Digitization Muthulakshmi Research Academy

४४. सदुपानत्करणैरशेषनगरग्रामैकसम्मार्जनैः
मलसंशोधनकर्मभिः कृषिफलीभावादि सम्पादनैः
उपकुर्वन्तमधःकरोति सुमते ! यस्त्वां सखे ! गर्हते
जनमस्पृश्यमुदीरयत्यभिनवैर्दण्डैर्बहिस्तं क्रियात् ॥

४५. अस्पृश्यताग्रस्तजनाः भवन्तः कुर्वन्तु धीरं पुरतः पदानि।
नयन्ति केचित् भवतोऽपमार्गं भजन्तु सिद्धिं स्वयमप्रमत्ताः॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतप्रशस्तिः

१. या भारतीदेवता भारतावनिं
तेजसा सौवेन संस्करोति
याऽऽनन्दपीयूषनिष्यन्दिनी सती
कल्पयत्यमृततां भारतस्य

या मञ्जुभाषिणी क्षेत्रभाषायोषि
तामेव संस्कारमादधाति
या देवभारती विश्वसाहित्येति-
हास एवोन्नतं स्थानमेति

अमलसंस्कारसौन्दर्यपरमसार
सारणी साऽपि संस्कृतभारती ह
नवसमाजेन विस्मृता कार्श्यमेति
दुष्टतनयेन मातेव किं ब्रवीमि ॥

२. यस्य प्रभावेण भारतीयप्रभा
विद्योततेऽद्यापि निखिलजगति
यस्यप्रसादेन भारती संस्कृति-
स्सर्वोन्नतं स्थानमभ्युपैति

यस्यानुकम्पया शास्त्राणि सर्वाणि
क्षेयोगतिम् समाजं नयन्ति
यस्यानुभावतो भारताभिजनोऽपि
आदर्शजीवनाभ्युदयमेति

In Public domain. Digitization Muthulakshmi Research Academy

ताद्दशं भारतीयैक्यसम्विधान-
मूलकारणमनुपममप्रमेय
महह संस्कृतमद्यापि मृतजनेन
मृतमिति ख्यायते किं विचित्रमार्य ॥

३. उत्तिष्ठामरभारती सुतमणे ! कष्टैकजीविन् ! निज-
स्वातन्त्र्येऽपि निकृष्टजीवनमहो किं धारयन् ध्यायसि ।
शीघ्रं जागृहि तावकीननयनान्तस्सञ्ज्वलत्पावक-
ज्वालां पातय संस्कृताभ्युदयविद्विट्सु प्रजाद्रोहिषु ॥

४. अस्मानस्मदुदारसंस्कृतिरतान् संस्कारसञ्जीवनीम्
अस्मत्संस्कृतभावरतीं च विमतव्यामोहतो बालिशः।
यो निन्दत्यवमानयत्यपकरोऽत्यत्यन्तमोहग्रह-
ग्रस्तं तं तु चिकित्सयाम विबुधा ! उत्तिष्ठतोत्तिष्ठत ॥

५. या वाणीवरवर्णिनी पुषति ता स्ता भारतीस्साहितीः
या भारत्यजरामरं भुवि यशो जातेस्समावर्जयत् ।
या मातोज्ज्वलसभ्यताग्रशिखरं प्राचस्समारोपयत्
सैषा संस्कृतवागहो निजजनैः पातालमापात्यते ॥

६. या काकोदरकालकूटविमतव्यामोहमोमूर्छित-
म्लानम्लानसनोमरीचिजनतासञ्जीवनीवल्लिका ।
या देवी भुवनेषु भारतभुवः कीर्तिप्रतिष्ठाकरी
सैषा संस्कृतभारती स्वमहिने सन्धानभाषा भवेत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

७. सत्संस्कारसुसभ्यतादिषु भुवि स्पर्धासमिद्धात्मनां
नृणामग्रत एव भारतजनोऽसावग्रताम्बूलिकाम् ।
प्राप्यागीयत कोटिमानवगलैर्यस्याः प्रसादेन वाक्
का नामार्हति तां विना स्वमहिने सन्धानभाषापदम् ॥

८. स्वसम्प्रदायसंस्कारविद्याविज्ञानवैभवम्
विधितो रक्ष्यते यत्र तत् स्वातन्त्र्यमुदीर्यते ।
परित्यक्तमिथोवैरा मिथस्सम्प्रीतचेतसः
संस्कृतोद्धरणत्राणदीक्षां गृह्णन्तुं भारताः ॥

९. संस्कृते रक्षणायापि जातेरुज्जीवनाय वा ।
ऐक्यसंघटनायै वा सुरभाषैव कल्पते ॥

१०. सर्वं सम्पद्यते तत्तत् संस्कृतैकसमाश्रयात् ।
दुर्लभं दुष्करं यद्यत् संसारे तु विभाव्यते ॥

११. संस्कृतप्रगातिं कृत्वा संस्कृतेः प्रगतिं कुरु ।
संस्कृतेः प्रगतिं कुर्वन् विश्वमार्यं प्रकल्पय ॥

१२. स्वजातेर्जीवनेनैव स्वभाषा जीवति ध्रुवम् ।
मृता यदि भवेत् जातिस्सैषाऽपि मृतिमाप्नुयात् ॥

१३. छान्दसत्वं परित्यज्य नव्यविज्ञानबोधकम् ।
शास्त्रजातं विनिर्माय संस्कृतं भावयामहे ॥

१४. मध्यं बध्नन्तु विद्वांसः संस्कृतस्याभिवृद्धये ।
अर्पयन्तु धनं प्रणान् सर्वस्वं च समादरात् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१५. पाश्चात्यवासनाघोरविषवल्लीविमूर्छितान्
संस्कृतामृतधाराभिश्चेतयाम स्वकान् जनान् ।।

१६. समृद्धपदसंस्कृतप्रगतिसन्तताकाङ्क्षिणाम्।
वहामि चरणाम्बुजं स्वशिरसा बुधानामहम् ।।

१७. मुहुर्मुहुरिदं पुरोगतिनिरोधिनां विद्विषाम् ।
मदीयपदपङ्कजं शिरसि निक्षिपाम्यन्वहम् ।।

१८. तिरोहितात्मचैतन्ये तमसा भारते पुनः।
अनाहतं महाज्योतिः प्रदुस्तात् संस्कृताह्वयम् ।।

१९. सर्वस्यापि जनस्यास्य सरोजे संस्कृताभिधा ।
नृत्यतादवतातीर्णाभाषा संस्कृतिवाहिनी ।।

२०. रसालपल्लवाग्रास विकस्वरपिकस्वरा
भारतश्रेयसे भूयात् वाणी विजयसारथेः ।।

२१. हिरण्मयीपदाम्भोजमकरन्दमधूकृता
भारतश्रेयसे भूयात् वाणी विजयसारथेः ।।

.....

In Public domain. Digitization Muthulakshmi Research Academy

दीपशिखाप्रशस्तिः

१. काव्यतत्त्वपरिस्फूर्तिपरिधे ! प्रतिभानिधे !
भाग्यावधे सरस्वत्याः कालिदास ! नमोस्तु ते ॥

२. अनल्प कल्पना कम्र कवितघनतावधे ।
काव्यसौन्दर्यमर्मज्ञ ! कालिदास ! नमोस्तुते ॥

३. रसभावादिसौन्दर्यभावनापरिपक्वता ।
कालिदासे यथा भाति न तथाऽन्यत्र लक्ष्यते ॥

४. प्राच्य पाश्चात्यसौन्दर्यमानदण्ड इव ध्रुवम् ।
द्योतते कविता यस्य नादबिन्दुकलात्मिका ॥

५. क्षीरवाराशिगम्भीरं हिमालय महोन्नतम् ।
स्वर्णदीपावनं यस्य काव्यं जगति दीप्यते ॥

६. तमःपिहित चैतन्यदीप्तिं दीपशिखेवया ।
करोति कविता यस्य कालिदासं स्तवीम् तम् ॥

७. पदे पदे ध्वनिस्फूर्तिः ध्वनिस्फूर्तावुदात्तात् ।
उदात्तत्वेऽपि माधुर्यं तवैव द्रविणं ब्रुवे ॥

८. क्रमशो रसविस्फूतिदृतिसन्दीप्तिविस्तराः ।
उत्तरोत्तरमुत्कर्षं यान्ति रूपेषु च त्रिषु ॥

९. श्रृङ्गार एव मुधुरः पराप्रह्लादनो रसः ।
कालिदासकृति स्सेयं तस्योपनिपदायते ॥

In Public domain. Digitization Muthulakshmi Research Academy

१०. समस्तं जगदारामं कालिदासोऽवलोकते ।
जीर्णारण्यं जगत्सर्वं भवभूतिरुदीक्षते ।।

११. व्यञ्जनारञ्जिता यस्य कविता घनतामगात् ।
अभिधाभ्युदिता यस्य कविता पटुतामयात् ।।

१२. विभिन्नघटनावृत्तरसभावविभावयोः ।
कथं वक्तुं तयोस्साम्यं शक्यते काव्यकोविदैः ।।

१३. कवीश्वरास्सन्ति सहस्रशोऽन्ये प्रभावितैषा भवता धरित्री ।
नक्षत्रताराग्रहसङ्कुलाऽपि ज्येतिष्मती चन्द्रमसैव रात्रिः ।।

१४. मात्राः वर्णाः पदानि स्वयमनुपहता वृत्तयो वृत्तयोऽर्थाः
भाषा भावा रसा वा ध्वनिगुणघटनाऽलङ्क्रियावृत्तजातम् ।
व्युत्पत्तिश्शक्तिकर्माऽनुपमनिपुणता यस्य वक्त्रारविन्दे
नृत्यन्ति स्वैरवृत्या नम इदमनिशं कालिदासाय तस्मै ।।

१५. आर्याणां न पुनः परं परममार्यावर्तसंवासिना-
मप्याराधनपात्रतां बहुतिथात् कालात् त्वमेवार्हसि ।
विश्वे विश्वकवेऽधुनापि तुलानां नैकोऽपि ते विन्दते
वागर्थप्रतिपत्तिकर्मकविताकान्तारकण्ठीरव ।।

१६. यस्योद्यत्कवितानुभूतिसमये हृत्पुण्डरीकाङ्गणे
पात्राणि स्वयमेव नाट्यनिपुणाव्यापारमातन्वति ।
भग्नाज्ञानचिदावृति स्फुटतरं चैतन्यमुद्योतते
कानीदासमहं स्तनीमि कवितारामावनीमाधवम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

१७. आस्माकीनं रसयितुमतिम्लानमाधिव्यधाभि-
श्चेतोभूयो नवरसदृशा भारतीयं महत्वम् ।
एहि स्तोतुं भुवमिति मुहुः प्रार्थये सत्कवे ! त्वां
याञ्चामोघा वरमधिगुणे नाधमे लब्धकामा ॥

१८. त्वत्काव्यानां पठनसमये चारुशृङ्गारवापी-
लीलाकेलीविहरणसुखं नूनमेतीव चेतः।
जायायुक्ता अपि विरहिणं भावयन्ति स्वमार्याः
कस्सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम् ॥

१९. अग्रस्थानं जगति भवतो यावदस्ति प्रसिद्धं
भासादीनां शततमकला नास्ति तस्यापि नूनम् ।
नैतद्युक्तं कविकुलमणे यत् त्वयोक्तं पुराऽऽसीत्
नीचैर्गच्छत्युपरि च दशा चक्रनेमि क्रमेण ॥

२०. वागर्थानां रसभावानां घटनादीनामतिमाधुर्यम् ।
मधुरभावनासुधया योऽधात् कालिदासमहमविरतमीडे ॥

२१. उपमार्थान्तरसूक्ष्मोत्प्रेक्षाद्यर्थालङ्कृतिसु चमत्कारे
भावावेगे भाषागरिमणि समुचितघटनानैपुण्ये वा ॥

२२. विविधव्यक्तिप्रकृतिविचारे पात्रचित्रणे लोकरञ्जने ।
जागतिकप्रतिभासितवस्तुनि प्रकृतिवर्णने रसपरिपुष्टौ ॥

२३. हृदयतलस्पृशि सम्यग्दृष्टौ तत्तत्पदसंन्धानौचित्ये ।
चित्रोक्तौ वा कृतकृत्यस्त्वं कालिदास! ते न समः कोऽपि ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

रूपसूक्तम्

१. अयिरूप ! तवरूपमिह को नु जानाति ।
परिमातुमिदमित्थमिति को नु शक्नोति ॥

२. अमितप्रभावस्य निरवधिकरूपस्य
नैपुणी तव रूप ! किमु वर्ण्यते मया ।
आबालगोपालमापामराभिज्ञ-
मखिलोऽपि तव नामपारायणे लगति ॥

३. यत्रावलोकिते यत्रावकर्णिते
यत्रानुभाषिते यत्रोपयातेऽपि ।
निस्समो महिमोपलक्ष्यते तव रूप !
कोटिरूपैरहो विष्णुवद् व्याप्नोषि ॥

४. पारया बाधितुं धारया दुरितस्य
सुहृदामुदेजयाः प्रीता भावन्ति ते ।
तस्करो घातुकः कण्टको लुण्टको
वञ्चकस्सुजनोऽपि तव निमित्ते भवति ॥

५. दण्डनानर्होऽपि दण्ड्यतामुपयाति
दण्ड्योऽपि मानवस्सम्मानमाप्नोति ।
त्वदनुग्रहामृतस्विन्नस्य पुरूषस्य
संसृतावयिरूप ! किमवशं वर्तेत ॥

In Public domain. Digitization Muthulakshmi Research Academy

६. एकत्र कल्पयसि मन्दारनन्दनम्
अन्यत्र विदधासि भग्नाटवीमपि ।
एकदा किङ्किणी किणकिणात्कारेण
विश्वमपि नर्तयत् क्रीडसि स्वेच्छया ॥

७. एकदा हा हान्तकारेण विबुधमपि
खेदयन् मोदसे भुवि रूप ! बहुरूप ।
सौधमधिरोपयसि सौधान्निपातयसि
सकृदेवननु रूप ! तव विचित्रा गतिः ॥

८. अस्थिरा तव गतिर्निस्वस्य वाञ्छेव
कामिनीचित्तमिव तव रतं चञ्चलम् ।
क्रूरोऽपि दुष्टोऽपि सेवानभिज्ञोऽपि
निर्वाचितो भवति तव मायया रूप! ॥

९. तव विना करूणया सामान्यमपि रूप !
उद्योगमाप्नोति न च पट्टभद्रोऽपि ।
दुर्बलः पुरूषोऽपि दुस्साधमपि कर्म
कर्तुमीष्टे रूप ! तव दयालेशतः॥

१०. तव दयाया ऋृते शक्तोऽपि मानवः
सुकरमपि तत् कर्म कर्तुं न शक्नोति ।
हन्तुमायातोऽपि शान्तचित्तस्सपदि
भृत्यायते नरस्तव महिम्ना रूप! ॥

In Public domain. Digitization Muthulakshmi Research Academy

११. तत्क्षणं रोदयसि तत्क्षणं मोदयसि
तत्क्षणं कोपयसि तत्क्षणं प्रीणयसि ।
अन्योन्यमात्सर्यमुद्भाव्य चैकदा
पादप्रहारैकखेलया तृप्यसि ॥

१२. पत्यौ कलत्रस्य वैरमुत्पादयसि
द्वेषमापादयसि पत्युः कलत्रेऽपि ।
सोदरेष्वपि तथाजनकयोरपि रूप !
मानुषं पाषाणहृदयमेव करोषि ॥

१३. मित्रेऽपि शात्रवं शत्रौ च मित्रताम्,
उद्भाव्य मानवं क्रीडाशकुन्तवत् ।
परिकल्प्य मोदयसि परिभवसि परिहससि
क्रीडसि प्रतिदिनं कूर्दसि स्वेच्छया ॥

१४. भूपायते कोऽपि भृत्यायते कोऽपि
धीरायते कोऽपि भीरूयते कोऽपि ।
तव दृङ्निपातस्य तारतम्येनैव
उच्चावचं भवति जगदिदं परिणतम् ॥

१५. शिङ्घाणपिञ्जूषदूषिकास्यन्दिनी-
पामादिदूषिते शरणं प्रपद्यसे ।
गुणरूपभारतीसुन्दरे धीरेऽपि
जातिवैरं सदाऽऽविष्करोष्ययि रूप! ॥

In Public domain. Digitization Muthulakshmi Research Academy

१६. बन्धुहीनस्यापि बन्धूयते जनः
सम्वाहयति रूप ! भृत्यवत् पादमपि ।
तरुणमपि वृद्धमिव विदधासि वृद्धमपि
तरुणमिव कल्पयसि मानवं बहुमान्य! ॥

१७. स्वस्थमपि रुग्णमिव रुग्णमुल्लाघमिव
कल्पयसि मायया मानवं बहुरूप! ।
हालाहलेऽमृतं गरलमप्यमृते च,
उत्पाद्यतत्क्षणं त्वमिह केलायसि ॥

१८. चन्द्रातपे तमस्तमसि चन्द्रातपं
निष्पाद्य तत्क्षणादानन्दमनुभवसि।
अक्षरानज्ञोऽपि सेव्यायते कोऽपि,
अक्षराभिज्ञोऽपि सेवकीयति कोऽपि ॥

१९. सद्गुणा दुर्गुणादुर्गुणान्सद्गुणाः
व्यत्यासमनुयान्ति तव मायया रूप! ।
एकत्रलघुरूपमन्यत्र गुरुरूप-
मपरत्र सदसच्च परिधारयसि रूप! ॥

२०. एकतश्चारभ्य शतकोटिकोटिशः
रूपैर्विनोदयसि स्वपदाश्रितान् रूप! ।
लीलायितं रूप बहुरूपतामेति
वैरायितं रूप बहुरूपतामेति ॥

In Public domain. Digitization Muthulakshmi Research Academy

२१. सत्कृतौ दुष्कृतौ सज्जने दुर्जने
समभाव एवास्ति समवादिवत् तव ।
सोऽभिजातायते स तु विधिज्ञायते
स वदावदायते यस्य दयसे रूप! ।।

२२. इन्द्रन्ति चन्द्रन्ति धनदन्ति धर्मन्ति
पुष्पबाणन्ति ते येषां प्रसीदसि ।
विषमेक्षणेन यदि वीक्षसे जगदिदं
प्लुष्टं भवेदेव प्लुष्टं भवेदेव ।।

२३. दृशया प्रसन्नयाऽऽलोकसे यदि जगत्
नूनममृतं भवति नूनममृतं भवति ।
नाहंस्मरामीति नाहमिच्छामीति
त्वामब्रुवाणस्तु न क्वापि दृश्यते ।।

२४. मन्यसे यदि रम्यमाकाशहर्म्यमपि
निर्माय मानवं विस्मये मज्जयसि ।
मन्यसे यदि रूप चन्द्रगोलस्यापि
सोपानसंहतिं निर्मासि तत्क्षणम् ।।

२५. विग्रहाराधनद्वेषिणो ये केऽपि
तव विग्रहं रूप! मनसा समर्चन्ति ।
चार्वाकभावुका अपि रूप! नास्तिका
अस्त्यदृष्टं चेति विश्वसन्ति ध्रुवम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

२६. श्रुतिपुराणागमप्रावर्तनं भवति
कानना‍क्रन्दनं नापि दयसे यस्य ।
भस्माज्यधारेव देवतोपासना
व्यर्थप्रयासाय कल्पते जनिमताम् ॥

२७. अलमलं तददृश्यदेवतापूजया
दृश्यमानं रूपदैवतं संस्मरत ।
प्रत्यक्षदैवतं त्वां रूप परिहाय
बुद्धिहीना जना अन्यानुपासते ॥

२८. विष्णुरिति शम्भुरिति पद्मेति गौरीति
कविवञ्चकैर्वयं वञ्चिता ननुरूप! ।
यत्कृपालेशतः सुखशान्तिसंपदः
प्राप्नुवन्ति प्रजास्तद्रूपमाश्रये ॥

२९. निन्द्यमपि विदधासि मान्यमिवयद्दया
तद्रूपदैवतं सञ्जपत सञ्जपत ।
पामरं विदधाति पण्डितं यद्दया
तद् रूपदैवतं सञ्जपत सञ्जपत ॥

३०. त्वामेव पश्यामि सर्वतस्सर्वदा
न त्वया विरहितं किञ्चिदपि वर्तते ।

In Public domain. Digitization Muthulakshmi Research Academy

३१. जगदेकमूलमिति जगदेकसारमिति
जगदेकशरणमिति भावये त्वामेव ।
ब्रह्मासि विष्णुरसि रूद्रोऽसि शक्रोऽसि
वह्निरसि मृत्युरसि विश्वरूपस्त्वमसि ॥

३२. तृष्णाम्भसि प्रबलकामानिलोद्धूत-
मोहोर्मिसङ्कुले भामाभ्रमाञ्चिते ।
सहजबन्धुग्राहसङ्घाकुले घोर-
संसारसागरे नः परं मज्ञताम् ॥

३३. अयि रूप ! तावकीं देहि करूणातरीम् ।
देहिकरूणातरीम्, अयिरूप ! तावकीम् ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

आप्तलेखः

१. इरुकुल्लेति विख्यातः करीनगरमण्डले
सम्पन्नशालिको ग्रामः पद्मनायकजन्मभूः
अस्ति, तत्र विशेषज्ञा जुव्वाडि कुलदीपकाः
पद्मनायकजातीयास्सन्ति ग्राममहत्तराः।

२. तेषु प्रसिद्धः प्रज्ञावान् रामरायाभिधः कृती
पुण्यश्लोकयाऽवात्सीत् जायया कान्तमाख्यया
तयोःपुण्यविशेषेण सञ्जातावात्मजावुभौ
चोक्करायः तयोर्ज्येष्ठः कनिष्ठो वरदाभिधः ।

३. श्रीकान्ता जननी गुणज्ञविनुतः श्रीरामरायः पिता
यस्यासीत् कविपण्डित स्तुतमतिश्श्रीचोक्करायोऽग्रजः
श्रीमान् तिर्मल संज्ञया च विदितोऽनन्त श्रियो वल्लभः
दत्तं स्वीकृतवानुदारचरितं यं पुण्यलोकाप्तये ।

४. सोऽयं लोकविदां मणिः कृतिमणिर्जुव्वाडिवंशाग्रणीः
प्राज्ञः श्रीवरदाभिधः परिणयन् सत्याभिधानां वधूं
प्राप्नोत् तत्र सुतौ सुतामुपरतौ तस्याश्च तत्सोदरां
गोपाम्बामुपयम्य तत्र तनयामेकां गुणज्ञामगात् ।

५. हनुमन्तरायनामा ज्येष्ठस्तस्य सुतस्तुधीः
पद्मोदयं वितन्वानः बालभानुवदेधते ।

In Public domain. Digitization Muthulakshmi Research Academy

६. रामचन्द्रः कनिष्ठोऽपि कुलोत्तरगणोत्तरः ।
प्रसन्नः कृतसन्मोदः शरच्चन्द्रवदेधते ॥

७. हनुमन्तरायः प्राज्ञः वाणिज्यैकविशारदः ।
सावित्र्यां परिणीतायां लब्धवान् चतुरः सुतान् ॥

८. रामचन्द्रः कनिष्ठोऽपि रमणीं परिणीय च ।
आत्मजाते उभे तस्यामविन्दत सुतावुभौ ॥

९. रङ्गमाम्बा सुतां ज्येष्ठां चोक्कारायस्सुधीमणिः ।
समाजवादि नेतृणां पर्यणैषीत् शिरोमणिः ॥

१०. रामचन्द्रो गुणैस्सान्द्रः स्वयं प्रगति पारगः ।
कनिष्ठां तनयां तस्य आण्डाल् नाम्नीमुदूढवान् ॥

११. एवं शाखोपशाखाभिः वरदस्य सुधीमणेः ।
प्राप्तायामपरीणाहः वंशवृक्षो विवर्धते ॥

१२. तमेनं वरदरायंच - आप्तं प्राप्तगुणोदयम् ।
उपकर्तारमुद्धिश्य लेखोऽयं लिख्यते मया ॥

१३. श्रीमन् जुव्वाडिवंशाब्धिसुधाशो वरदाभिधः ।
आप्तावतंसे किमपि मया त्वयि निवेद्यते ॥

१४. न लक्ष्यते कोऽप्यधुनातने युगे भवादृशो धर्मपरः प्रसन्नधीः
प्रियंवदो नर्मवचस्सुपेशलः कृपासुधास्निग्धदृगञ्चलः पुमान् ।
भवादृशानां सुधियां सुजन्मनां गुणैरुदारैस्सुरभीकृतात्मनाम्
सत्कर्मनिष्ठानिबिरी सचेतसां परोपकाराय भवत्यहो जनिः ॥

In Public domain. Digitization Muthulakshmi Research Academy

१५. विचार्य मत्कष्ट-सुखानि सम्यक् श्रेयोविधातुं बहुधा ममैव ।
सुधीमणे त्वं यतसेस्स विष्टपे परोपकारप्रवणाहि साधवः ॥

१६. अयाचितोऽप्यम्बु ददाति वाहिदः फलानि यच्छन्ति बहून्यनेकहाः।
परार्थमृच्छन्ति धनं मनस्विनः स्वभावसिद्धा हि सतामुदारता ॥

१७. अयं ममाप्तो न ममाप्तकोऽसाविति प्रभेदोऽल्पधियां प्रजायते।
उदारताविष्ट विशिष्टमानसः विभावयत्येव जगत्कुटुम्बकम् ॥

१८. दीनानां दयसे बुधानुपकरोष्याजानतोऽहंयुतां
नाप्रोषीषदपि स्वधर्मसदनुष्ठाने सदा दीक्षसे ।
स्वश्लाघां कुरूषे न जातु बहुधा संश्लाघसेऽन्यान् न वा
क्षुभ्यस्यापदि नैषि सम्पदि मुदं पूर्णोऽसि तेस्तैर्गुणैः ॥

१९. ईशावास्यमिदं जगत् ध्रुवमिति ज्ञात्वा परं सेवसे
लोकं नैकविधं सदा निजपरव्यामोहलेशं विना ।
अन्तर्यामिणमच्युतं विमलया व्यालोकसेऽन्तर्दृशा
तत्वं श्री वरदाभिधानसुमते श्रौतं समाटीकसे ॥

२०. विज्ञानं विनयप्रबोधमधुरं प्रज्ञा मनोज्ञा स्वयं-
संवेदाभ्युदिता, विधिज्ञमपि हृन्निर्मत्सरं मञ्जुलम् ।
उक्तिर्वक्रतमाऽपि हास्यमसृणा स्नेहोऽपि निष्कल्मषः
सर्वं त्वय्युदितं तदेतदयि भो जुव्वाडिवंशोद्वह ॥

In Public domain. Digitization Muthulakshmi Research Academy

२१. आम्नातं भवता यदेव बहुधा तत् संविदा सूक्ष्मया
ज्ञातं निर्विषयं, यदेव विदितं तत् सर्वदाऽनुष्ठितम् ।
सत्यं यद्यदनुष्ठितं सपदि तन्नेतुं प्रचारं कृति-
न्नुदिद्दष्टं चरितार्थतामपि जनुर्नीतं सितैः कर्मभिः ॥

२२. अत्याचारशतात् कृतादपि रजाकारैर्विभीतान् जनान्
त्रातुं यद्यतनं त्वयाऽऽपदि कृतं नैतत्पुरीयो जनः ।
को वा न स्मरति प्रबोधमधुरोदाराणि सूक्तानि ते
को नाभ्यञ्चति पद्मनायकमणे जुव्वाडिवंशोद्वह ॥

२३. स्वान्तं ते नवनीतकोमलतरं साधूपकारोन्नतं
प्रज्ञा विज्ञमनोहरा नवनवोन्मेषस्फुरन्मञ्जिमा ।
सेवा राष्ट्रपुरोगतिप्रणयिनी वाणी गुणज्ञा हिता
ध्यानं श्रीहरिपादपद्मनिरतं ज्ञानं सदैकेश्वरम् ॥

२४. यस्मिन् जीवति पूरुषे बहुजना जीवन्ति जीवेत् स ही-
त्युक्तिं सार्थयति प्रजाहितमहासंस्थाभिरद्धा भवान् ।
व्यासप्रोक्तमतानुपालनमना श्रीवैष्णवार्चारतः
श्रेयोभि श्शरदां शतं विजयतां जुव्वाडिवंशोद्वह ॥

२५. मूर्त्या स्फूर्तिजुषाऽन्वयेन वचसा वृत्या प्रवृत्त्या धिया
सौहार्देन नयेन भावुकहृदा लक्ष्मीपतेस्सेवया ।
चारित्रेण पुमर्थबन्धुरदृशा वादे पटिम्ना पुनः
कस्स्पर्धेत विधिज्ञमान्या भवता लोके सुधीग्रामणीः ॥

In Public domain. Digitization Muthulakshmi Research Academy

२६. श्रीमन् ! वरदराय ! श्री जुव्वाडिकुलदीप ! ते
कुटुम्बवृत्तं संक्षिप्य लोकवृत्तमुदीर्यते ।
यथाश्रुतं यथादृष्टं वर्णयामि यथामति
लोकवृत्तं विचित्रं ते सश्रद्ध मवधारय ॥

२७. संस्कृते संस्कृतज्ञेषु ज्येष्ठायाः कुटिला दृशः ।
प्रसरन्ति बहोः कालात् दावकीला वने यथा ॥

२८. क्षुत्क्षामान् दीनतालीढान् असंस्कृतशिरोरूहान् ।
जीर्णशीर्णप्रतीकांश्च लुप्तजीवकलान् बुधान् ॥

२९. विषाददेवतामूर्तिभूतानेतान् दरिद्रकान् ।
पश्यतो मम लोकज्ञ ! शतधा दीर्यते हृदा ॥

३०. वासोऽभावात् गृहाभावात् अन्नाभावात् महीतले ।
अनेके मानवा निस्वा विषीदन्ति महोदय ॥

३१. तस्करा मुष्करा जाता क्रूरहिंसाविलोलुपाः ।
कुक्षेरपूरणात् भृत्या निस्वास्सम्प्रति भारते ॥

३२. दरिद्राणां सहस्राणि सहस्राण्यपि भारते ।
दारिद्र्यभूतवातेन म्रियन्तेऽद्यापि कोविद ॥

३३. तदा किंचित् तदा किंचित् धनं दत्त्वा कुसीदिकाः ।
अधमर्णस्य सर्वस्वं बलात् गृह्णन्ति निर्दयम् ॥

३४. बुभुक्षाज्ज्वलनाभीलज्वालापोप्लुष्टकुक्षिकान् ।
श्रामिकान् भस्मसात् कर्तुं धनपालास्समुद्यताः ॥

In Public domain. Digitization Muthulakshmi Research Academy

३५. आत्मसेवां दिवारात्रं कुर्वतो भृत्यकानिमे ।
रक्तं निष्पीड्य निष्पीड्य मारयन्त्यधिकारिणः ॥

३६. धनपाले निगीर्यन्ते सर्वे दोषा यदा क्षणात् ।
निगीर्यन्ते दरिद्रेऽपि गुणास्सर्वे तथैव च ॥

३७. भृत्यकान् कृषिकान् साधून् दरिद्रान् कष्टजीविनः ।
भुञ्जते वञ्चकाश्श्रीलाश्शवानिव शिवाः परम् ॥

३८. कोविदोऽपि गुणज्ञोऽपि विधिज्ञोऽपि दरिद्रकः ।
गण्यते धनदुर्मत्तैः निकृष्टः कुक्कुरादपि ॥

३९. न विषं विषमित्याहुः दारिद्रयं विषमुच्यते ।
विषमेकाकिनं हन्ति दारिद्रयं पुत्रपौत्रकम् ॥

४०. आय अल्पो व्ययस्तावत् त्रिगुणो वाञ्छितान्यपि ।
शतम्पराणि चारस्माकं मनस्कारः कथं भवेत् ॥

४१. लिहेदप्यनलज्वालां तरेदप्युरसाऽबुधिम् ।
चुम्बेदप्युरगं कृद्धं न सहेत दरिद्रताम् ॥

४२. धरेदपि शिरस्यद्रिं भरेदपि नभोधुनीम् ।
हरेदपि विषं घोरं न सहेत दरिद्रताम् ॥

४३. अरण्यानि वरं जूर्तिर्वरं हालाहलं वरम्
वरमग्निर्वरं मृत्युः दारिद्रयं न वरम् नृणाम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

४४. सङ्कल्पादेव धनिनां दुष्करं सुकरं भवेत् ।
प्रयासैरपि निस्स्वानां सुकरं दुष्करं भवेत् ॥

४५. यातायातप्रयासं च कल्पयन्ति मुहुर्महुः ।
मासिकं वेतनं दातुं भृत्यानामधिकारिणः ॥

४६. शक्त्यतीतं महत् कष्टं कारयन्तो धनाधिपाः ।
भृत्यैर्मुहुः परावर्त्य शपन्तो ददते भृतिम् ॥

४७. पालयन्ति परं प्रेम्णा शुनोऽपि द्रविणोद्धताः
वदनं विकृतं कृत्वा बुधान् निन्दन्ति याचकान् ॥

४८. कुक्षिपूर्णा दरिद्रास्तु शान्तिं शासति केचन ।
कुक्षिदाहे दरिद्राणां कुतश्शान्तिः कुतस्सुखम् ॥

४९. दरिद्रहृदययोद्भूता बाष्पसन्धुक्षिताऽधुना ।
प्रतीकारदवज्वाला प्रतिकर्तुं विजृम्भते ॥

५०. वर्गवैरं समुत्पाद्य दरिद्रेषु मुहुर्मुहुः ।
साधयन्ति निजोष्टानि मृषामित्राणि नायकाः ॥

५१. वर्षधाराविदीर्णाङ्गाश्शीतवातनिपीडिताः ।
निदाघदाहसन्दग्धाः यवागूतृप्तकुक्षयः ॥

५२. शयानाश्शर्कराभूमीष्ववशीर्णाम्बरा भृशम् ।
भृत्यकाः कर्षका राष्ट्रसम्पदो वर्धयन्त्यहो ॥

In Public domain. Digitization Muthulakshmi Research Academy

५३. अकृत्वैव परिश्रान्तिं श्रामिकास्येषु मृत्तिकाम् ।
निक्षिप्य धनिनो नानाभोगान् सौधेषु भुञ्जते ॥

५४. धनिनामेव प्रथमं स्थानं सर्वत्र दीयते ।
तेषामेव पुरस्कारास्तेषामेव परिष्क्रियाः ॥

५५. धनिनो नववर्षादिरुत्सवाय प्रकल्पते ।
दरिद्रस्य तु घोराधिव्याधितापादयें ध्रुवम् ॥

५६. धनित्वं बन्धुता चेति भुवि प्रगतिसाधिके ।
सर्वरिक्तेषु निस्वेषु उन्नतेरिह का कथा ॥

५७. निस्स्वपीडनचित्तानां भूमतां धनिनामपि ।
नेतारश्शासकास्सर्वे पीठमर्दन्ति केवलम् ॥

५८. निरुद्योगसमस्याऽपि दरिद्रेष्वेब नृत्यति ।
न पूर्वं नाधुना श्रीमदधिकारिसुतादिषु ॥

५९. अवाच्यं वदतां सम्पदुन्मत्तानां दुरुक्तयः ।
ज्वाला इव दहन्त्यार्य कवीन् निस्वान् पदे पदे ॥

६०. साम्राज्यवादिनामेव साम्यवादवदावदाः ।
पदे पदेऽपि कुर्वन्ति पार्ष्णिसंवाहनक्रियाम् ॥

६१. घोरदारिद्र्यदौर्भाग्यनष्टसंवित्कला वयम् ।
धनिनां वन्दितां प्राप्ता अगत्याऽभूम वन्दिनः ॥

In Public domain. Digitization Muthulakshmi Research Academy

६२. गृहे गृहे दरिद्राणां पञ्चषा अविवाहिताः ।
पितॄणां हृदयव्याधिं कन्यका जनयन्त्यहो ॥

६३. कतीनां मानभङ्गोऽपि कतीनां प्राणामोचनम् ।
कुलस्त्रीणां बलादार्य । दुर्मदान्धविचेष्टितैः ॥

६४. दारिद्र्यदाहसन्तप्ते हृदये श्रमजीविनाम् ।
सन्धुक्षिता विभिद्यन्ते नित्यं कोट्यग्निपर्वताः ॥

६५. दरिद्राणामतिम्लानदृक्कोणाश्रुबिन्दुतः ।
एकैका ज्वलनज्वाला दग्धुमायाति वञ्चकान् ॥

६६. शुष्कोदर्कं कलयति जने दुर्दलानां विधानं ।
दुर्णेतॄणां व्यथयति बुधान् दुर्भरा दुर्व्यवस्था ।
उद्दामोऽयं प्रगतिनिगमः लोकतन्त्रेऽपि लुप्तः
सत्संस्कारं हृदि सजनुषां धातुमायाति बेला ॥

६७. बहुनिष्कपटच्छिदो भृशं बहुधान्यैकविखण्डनोद्यताः ।
बहुरन्ध्रगवेषणे रताः परितस्सन्ति खला यथाऽऽखवः॥

६८. गले दधानामतिकालकूटं भुजङ्गमालामनुला लयन्तीम् ।
तन्मिवैशीं प्रणमेन्न को वा सभां तु दौष्टीं सुजनो बिभीतः॥

६९. एकत्रैव समाविश्य द्वीपिनः फेरवा वृकाः ।
भल्लूकाः पुण्डरीकाश्च चर्चयन्ति परस्परम् ॥

७०. अमर्यादातिरस्कारौ गोजातेर्नस्समागतौ ।
तन्निरोधधिया तावत् सभां कुर्वन्ति रासभाः ॥

In Public domain. Digitization Muthulakshmi Research Academy

७१. गान्धिजन्मतिथावेव तद्भक्तास्तन्मतं मुहुः ।
निमील्य चक्षुर्ध्यायन्ति भसिते भषका इव ।।

७२. छायाप्रदानदम्भेन स्फटां विस्फार्य भीकरीम् ।
कालोरगा विनृत्यन्ति दर्दुराणामुपर्यहो ।।

७३. कृत्वा प्रलोभं विविधम् - अर्जयन्ति मृगादनाः ।
मृगाधिपत्यपीठानि जम्बुकैर्वञ्चकैस्समम् ।।

७४. व्याघ्राणां पालकत्वेतु जम्बुका स्तुतिपाठकाः ।
अहो नीतिरहो सेवेत्याशंसन्ति परस्परम् ।।

७५. हेयकर्मप्रवृत्तेषु गुरुष्वध्यापनादृते ।
भवेदेव सुधीमान्य ! छात्राणामधमागतिः।।

७६. शिक्षेतरेषु निन्द्येशु कर्मसु व्यापृतेष्वपि ।
छात्रेष्ववश्यं भूयात् शिक्षायाः अधमा गतिः।।

७७. न्यायवादिनि धर्मज्ञे कूटवादैकतत्परे ।
अन्यायार्जनसम्पृक्ते न्यायस्यत्वधमा गतिः।।

७८. कारूण्यरहिते वैद्ये रोगनिर्हरणाठाति ।
रोगिनिर्हरणव्यग्रे मृत्योर्विलयताण्डवम् ।।

७९. कूटवाणिज्यसंसक्ते क्रयविक्रयिके, प्रभो ।
तद्दण्डनाक्षमे लोके वृत्तिर्भवति दुर्भरा ।।

८०. खण्डखण्डेषु विख्यातं दुश्शासनविधानतः ।
उदारं भारतं त्वद्य दरिद्रं समपद्यत ।।

In Public domain. Digitization Muthulakshmi Research Academy

८१. राजादीनां कतीनाञ्चित् पदानां परिवर्तनम् ।
जातं, शासनकार्येषु त्वन्तरं नैव लक्ष्यते ॥

८२. पक्षपातयुते क्रूरे अविनीते च शासने ।
प्रतीकारधिया स्वैरं प्रजाशक्तिर्विजृम्भते ॥

८३. गान्धीयोष्णीषभूषाढ्या खद्दरम्बरधारिणाः ।
निस्वप्रलोभं कुर्वन्तः पर्यटन्ति विनायकाः ॥

८४. परद्रव्येषु दातृत्वम् आत्मद्रव्येषु लुब्धता ।
परनिन्दा निजश्लाघा नेतॄणां सहजा गुणाः॥

८५. क्रूरस्य दुर्मतेस्स्वस्य पितुस्संस्करणे पुनः ।
अक्षमः किं नु शक्नोति कर्तुं लोकसुधारणाम् ॥

८६. नाश्नन्ति न प्रयच्छन्ति कतिचिद् भूमिभारकाः ।
धन एवावतिष्ठन्ते लुब्धा इव पिशाचकाः ॥

८७. दरिद्राणां कलत्रणि हीहीकारपुरस्सरम् ।
विहसन्ति विनिन्दन्ति गर्वान्धा धनिकाङ्गनाः ॥

८८. शतच्छिद्रं पटं सीव्येत् चालन्या जलमाहरेत् ।
न तु गेहं शतच्छिद्रं चतुरास्योऽपि निर्वहेत् ॥

८९. समर्जयामि यत्किञ्चित् प्रतिमासं कुतोऽपि वा ।
एकदापि मनस्कारस्सुखं वा नानुभूयते ॥

In Public domain. Digitization Muthulakshmi Research Academy

९०. परस्परं विघृष्टा मे विपर्यस्ता मुहुर्मुहुः ।
भावाः प्रभिन्ना हृदयं वितुदन्ति दिवानिशम् ॥

९१. अभ्रं स्पृशन्ति मूल्यानि चास्माकं वेतनं लघु ।
मनोरथास्सहस्राणि मनस्कारः कथं भवेत् ॥

९२. वनायते दरिद्राणाम् अगारं बान्धवा अपि ।
व्याघ्रायन्ते कृपेस्तावत् मृगतृष्णायते फलम् ॥

९३. प्रतिज्ञापालनं कर्तुं बहुधा प्रयते पुनः ।
आगूदितं नैकतोऽपि मनीषिन् ! सार्थकीकृतम् ॥

९४. मूषिकाकृकवाकूनामाधिपत्याय केवलम् ।
मार्जारश्येनगृध्राश्च वैरायन्ते परस्परम् ॥

९५. व्याघ्राभिषेकवेलायां गानं कुर्वन्ति फेरवाः ।
वादयन्ति मृदङ्गादिं वृका नृत्यन्ति चापरे ॥

९६. वृकेऽग्रजः पिता व्याघ्रः पुण्डरीकः पितामहः ।
अनुजः फेरवो यस्य सोऽयं नेतृमणीयते ॥

९७. मा बिभीत झषा ! यूयं व्याधेभ्यो रक्षणाय वः ।
आगताश्चरतस्वैरम् इत्याख्यान्ति बका ह्रदे ॥

९८. निजाहारं प्रदायापि शमयन्तु परक्षुधम् ।
मृगादना वदन्त्येवं स्वधर्मं हरिणान् प्रति ॥

In Public domain. Digitization Muthulakshmi Research Academy

९९. श्रमदानं प्रकुर्वन्तु पारिशुद्ध्यमवन्तु भो ।
धर्मोपदेशं कुर्वन्ति भल्लूकाः किटिनां कृते ॥

१००. युष्मच्छममपाकर्तुम् आगच्छामाजरक्षिणः ।
मा बुक्कतेह भषका इति सन्दधते वृकाः ॥

१०१. पिकानां स्वरमाधुर्यात् अन्तस्तापमुपागताः ।
काकास्सर्वत्र कुर्वन्ति व्यतिरेकप्रदर्शनम् ॥

१०२. सुधारणां यदीच्छन्ति युष्मच्छ्रेयोभिलाषिणाम् ।
दत्तास्माकं मतं चेति याचन्ते वञ्चका मृगान् ॥

१०३. कूटवादैः मृषावेषैः भ्रष्टाचारैर्हितेतरैः ।
समाजं समजं कृत्वा राज्यं कुर्वन्ति केचन ॥

१०४. धारका मारका जाता नायका मायका भुवि ।
पण्डिताः खण्डिता नूनं गणतन्त्रेऽधुना विभो ॥

१०५. स्वाधीनताध्वरे ते च हुतात्मानो महोदयाः ।
बहिष्कृता, वञ्चकास्तु प्राप्नुवन्ति पुरस्कृतिम् ॥

१०६. कौशेयानि महार्घाणि वसानामसृणान्यपि ।
स्वल्पादप्यातपात् भीताः कर्मकर्तुमनीश्वराः ॥

१०७. मैरेयाणाममूल्यानां पिबा भोगपरायणाः ।
नात्युष्णशीतलेऽगारे वस्तुकामा निरन्तरम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१०८. वैदेशिकैः क्रीतदासाः स्वैरवादवदावदाः ।
श्रमजीविमृषाप्रीतिव्यतिसन्धानकोविदाः ॥

१०९. म्रियस्व विजयस्वेति निन्दास्तुतिविशारदाः ।
समाजसाम्यवादादिवृथाक्रोशकुवाशितैः॥

११०. मिथोद्वेषविषासारैः सौहार्दामृतशोषिभिः ।
प्रतिक्षणपरावृत्तैः प्रलोभावशकश्मलैः ॥

१११. चूषन्ति शोणितं भ्रातः ! वैक्लव्यं जहि जागृहि ।
पुञ्जवादिविनाशाय जृम्भस्वेत्येवमादिभिः ॥

११२. विचित्रैर्मोहनैर्गीतैः प्रतारणपरायणैः ।
मायाजालेऽवसम्पात्य विप्लवग्रन्थिसंकुले ॥

११३. कार्मिकान् कर्षकानज्ञान् श्रामिकान् तानमायिकान् ।
क्रीडाशकुन्तवत् केचित् नर्तयन्ति मुहुर्मुहुः ॥

११४. विवेकच्छुरिकाच्छिन्नवञ्चनावागुरागुणान् ।
विधाय स्वविधेयेषु जनताशिवतातिषु ॥

११५. वैयक्तिकविकासकश्रेयःकर्म स्वतन्द्रितान् ।
मिथोरक्तान् मिथोयुक्तान् स्वयंश्रमसमार्जिते ॥

११६. समानाधिकृतान् नूनं उच्चावचभिदां विना ।
समावकाशसन्धानस्वयंशासनशिक्षितान् ॥

In Public domain. Digitization Muthulakshmi Research Academy

११७. कर्मयोगरतान् देशे विधिबोधमयोक्तिभिः ।
प्रबोधयन्तु भावज्ञा भावुकाः कवयो जनान् ॥

११८. यथावच्चित्रणं कैश्चित् कवित्वमिति गीयते ।
तदेव परमार्थश्चेत् पत्रैः किमपराध्यते ॥

११९. व्यष्टेः पूर्णविकासो हि समष्टिरिति भण्यते ।
तस्य सिद्धिं करोतीदं साहित्यमिति मे मतम् ॥

१२०. गेयं वा यदि वा पद्यं ग्रान्थिकं व्यावहारिकम् ।
स्पन्दस्य न विना शक्तिं साहित्यपदभाक् भवेत् ॥

१२१. आमोदिसारसहितं सरसं मनोज्ञं
काव्यं सरोवरमिवातिगभीरम्भावम् ।
व्यालोड्य शादमतिशातमृषापवादम्
अन्विष्यति प्रसभमेष खलोलुलायः ॥

१२२. अम्लानप्रतिभाविकस्वरनवव्याहारभङ्गीमयं
मुद्रामुग्धमुदाररीतिमधुरं पात्रौचितीसुन्दरम् ।
युक्तिस्फीतमयत्नसिद्ध ललितालङ्कार रोचिस्फिरम्
कस्योदात्तचरित्रशोभि सरसं न स्यान्मुदे वाङ्मयम् ॥

१२३. आजानप्रतिभानभासुरपदन्यासस्फुरन्माधुरी-
धारास्पन्दमुदारबन्धमभितो लावण्यलीलायितम् ।
अक्लेशस्फरितार्थसौभगमभिव्यक्ताभिजात्यं नवम्
साहित्यं सुकुमारमार्गमसृणं न स्यान्मुदे कस्य वा ॥

In Public domain. Digitization Muthulakshmi Research Academy

१२४. ऋजुवक्रोक्तिमयोपदेशललितं दिव्यानुभूतिप्रदम्
समुदात्तीकृतमूलवृत्तिनिवहं सौन्दर्यमुद्राङ्कितम् ।
जनताजीवनदर्शनं रसगुणालङ्कारसारोज्ज्वलम्
कविवाणीलसितं जनाभ्युदयदं न स्यान्मुदे कस्य वा ॥

१२५. वैचित्र्यात् विषयस्य दीप्तमसृणच्छायस्य सीमायितं
सत्त्वादेर्द्दतिदीप्तिविस्तरगतिस्रोतायितं चोद्गमात् ।
संविद्बोधवशात् परस्परभिदातीताद्वयानन्दधु-
स्याद्वाणीलसितं चमत्कृतिमयं न प्रीतये कस्य वा ॥

१२६. काव्यमालोचनाधानं मूलवृत्तिपरिषकृति
चयने चानुभूतीनां लोकजीवनदर्शनम् ।
ऋजुवक्रोक्तिभङ्गीभिः जनताभ्युदयावहम्
मलिम्लुचस्य सदृशः व्यापारोऽयं कवेर्मतः ॥

१२७. पदाधाने तदालोके तत्तदर्थैकसङ्ग्रहे ।
दोषान्वेषणतात्पर्ये सुवर्णग्रहणे तथा ॥

१२८. कृतमन्दपदन्यासं परितश्शब्ददर्शिनम् ।
सुवर्णदाननिपुणं नानालङ्कारहारिणम् ॥

१२९. नैकार्थाहृतिसंसक्तं रसान्तर्गतलालसम् ।
सर्वस्वापहृतिव्यग्रं दोषान्वेषणतत्परम् ॥

मूलवृत्तीनां परिष्कृतिः यस्मिन् तत् इति काव्यविशेषणम् ।

In Public domain. Digitization Muthulakshmi Research Academy

१३०. महाचोरमिवस्तौति को नाम न कवीश्वरम्
संस्कर्ता कवी राजा कारुश्चेति हितैषिणः
स्थेम्ने समाजसौधस्य मूलस्तम्भन्ति सर्वथा ॥

१३१. चत्वारस्त इमे धीराः स्वस्वकर्मप्रभावतः ।
उपस्कुर्वन्ति जनतां विश्वश्रेयसि व्यापृताः ॥

१३२. दण्डप्रधानात् शासनात् लोकोऽद्विजते सदा ।
मूलवृत्तिं न लोकस्य संस्कर्ता कर्तुमर्हति ॥

१३३. कारुणा चित्रितं भावं प्रजा नावैतुमर्हति ।
शासनं संस्क्रिया चित्रं भीकरं विप्रिया जडम् ॥

१३४. मनोज्ञात् शासनात् लोके रस्यात् संस्करणादपि ।
सुव्यक्तात् चित्रणात् प्रायः कविस्तेषु प्रशस्यते ॥

१३५. लोकोत्तरकलोदारवर्णना महितोक्तिभिः ।
मलवृत्तीरुपस्कर्तुं लोकस्य कविरीहते ॥

१३६. व्यर्थवादतपोत्तप्तां विरोधविषमूर्च्छिताम् ।
कुनादक्रिमिसंकीर्णां क्रूरकासरदूषिताम् ॥

१३७. दुरावेश मरुम्लानां दुष्टसत्त्ववशीकृताम् ।
उदारां कविताजातिं श्रेयस्सौरभबन्धुराम् ॥

कवितमयीं जातिलताम्

In Public domain. Digitization Muthulakshmi Research Academy

१३८. पुष्णन्तु दोहदैर्नैकैः संवित्सौगन्ध्यकामुकाः ।
सदामोदप्रसाराय शंयवोऽननहंयवः ॥

१३९. गेयपद्यपरीवादात् विसंवादविषोद्गमात् ।
विरता, निरतास्सन्तु विश्वश्रेयसि भावुकाः ॥

१४०. तमोवादमरुप्रान्ते रजोवादमरीचिके ।
सत्त्ववादप्रपाशालाः निर्मान्तु भ्रमतां बुधाः ॥

१४१. वाङ्मयात् सवनात्भान्तु भूमिकाः सप्त संविदः ।
शुष्यत्संस्कारबीजानि फलन्तूक्तिसुधारसैः ॥

१४२. श्रेयसी प्रेयसी भूयात् संस्कृतिस्सर्वतोमुखी ।
स्पन्दशक्तेर्विलासोऽपि व्यष्टौ व्यष्टौ समुन्मिषेत् ॥

१४३. तिरोहितात्मचैतन्ये तमसा भारते पुनः ।
परिष्कर्तुमुपस्कर्तुं काऽपि शक्तिरुदेतु नः ॥

१४४. नवां शक्तिं नवां दीप्तिं नवामालोचनामपि
श्रेयस्करं नवं सर्वं भगवान् प्रददातु नः ॥

१४५. लक्ष्मीवाणीभवान्यो हरिविधिगिरिशा मातरस्सप्तदेव्यो
दिक्पाला लोकपाला भगणपरिवृढा भूमिरापः प्रसन्नाः ।
दूरीकृत्याधिबाधा, विदधतु जनतां सर्वसम्पत्समृद्धा-
मब्दोऽयं हेमलम्बी प्रभवतु जगतां श्रेयसे भूयसे च ॥

In Public domain. Digitization Muthulakshmi Research Academy

१४६. श्रेयोराज्यं समाविर्भवतु जननुतं यातु दुर्भिक्षमस्तं
राष्ट्रं विज्ञानाशक्तयाऽभ्युदयमुपचितं प्राप्नुयात् सर्वतोऽपि ।
चैतन्यज्योतिरिन्धां सकलजनगणो मोदतां पूर्णकामः
दीर्घायुर्भोगभाग्यैर्वरदकृतिमणे ! वर्धतां ते कुटुम्बम् ॥

१४७. आशयान् मिनुमो यांस्तु प्राणोभ्योऽप्यधिकान् वयम् ।
अस्माकमन्वये जातास्सुधियस्साधयन्तु तान् ॥

१४८. अनन्तचैतन्यसमुज्ज्वलस्य महासमाजस्य समग्रशक्त्या ।
प्रादुर्भवार्थं कवयो विधिज्ञा मेधाविनश्शास्त्रविदो यतन्ताम् ॥

१४९. दुर्जनस्सुजनो भूयात् सुजनश्शान्तिमाप्नुयात् ।
शान्तो मुच्येत बन्धेभ्यः मुक्तश्चान्यान् विमोचयेत् ॥

१५०. इति सम्भावनां कृत्वा लेखादस्माद् विरम्यते ।
ददातु नस्सदा धीमन् ! मङ्गलानि श्रियः पतिः ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

भ्रातृलेखः

१. श्रीमन् आचार्य गोपाल श्रीभाष्यकुलभूषणा ।
प्रियाग्रज नमोवाकैर्लेखस्ते, लिख्यते मया ॥

२. निवेदनीयं भवतेऽस्ति, किञ्चित् प्रियाग्रज! त्वं श्रुणु सावधानम्।
विना भवन्तं नहि कोऽपि लोके मदीयमाधिं विबुध श्रृणोति ॥

३. विचार्य मत्कष्टसुखानि नूनं
श्रेयो विधातुं बहुधा ममैव ।
त्वया मनीषिन् यतितं जगत्तले
स्वसौख्यमिच्छन्ति न जातु साधवः॥

४. महानुभावस्य महोदयस्य ते यशस्विनो भ्रातृमणेः सुधीमणेः।
ऋणं महत्तद् व्यपनेतुमक्षमः कृतज्ञताविष्करणं करोम्यहम् ॥

५. पूर्ववृत्तं कुटुम्बस्य किञ्चित् प्रस्तुत्य राष्ट्रियम् ।
विवृणोमि ततो वृत्तं लेखेऽस्मिन् सकलोक्तिभिः ॥

६. चेगुर्तिनामा धनधान्यकेन्द्रो मानेरू तीरेऽस्ति निजानम्बाबोः ।
ग्रामोऽयमाहुः परमप्रपन्नसंस्थानमित्यार्यजना महेच्छाः॥

७. मानेरभिरव्या भुवि गुण्डिवागु संज्ञेव नद्यै यमुनासरय्वौ ।
यमापुनत्यौ वहतश्चकास्तस्स्वर्चास्वरूपेण च रामकृष्णौ ॥

In Public domain. Digitization Muthulakshmi Research Academy

८. अनेकवर्णाभिजनैरधिष्ठिते ग्रामे
प्रतीते कविकारु पण्डितैः ।
पत्न्या च तस्मिन् सह नर्समाख्यया
नारायणार्यो वसतिस्म वैष्णवः ॥

९. स वैदतो भागवतान्वयेन्दू रङ्गार्यमानीय निधाय गेहे ।
द्विजाय तस्मै सहगोपमुख्यां सम्पत्तिभिस्स्वाभिरदात् स्वपुत्रीम् ॥

१०. तस्यात्मजः परमभागवतः प्रपन्नो
नारायणार्यदुहितुस्तनुजो द्विजन्मा ।
श्रीभाष्यवंशजमणिर्नरसिंहनाम्ना
ख्यातिं गतः परमवैदिवगीतकीर्तिः ॥

११. कन्दाळ रङ्गतनया बुधलक्ष्मणार्य
सम्पालिता कृतिनुतैस्सुगुणैरभिज्ञा ।
श्रीवेङ्कटार्यसहजा भुवि गोपमाख्या
तस्यार्यसन्नुतगुणस्य विभाति पत्नी ॥

१२. गोपालो रत्नमालाख्या वेङ्कटः पार्थसारथिः ।
आण्डालिति क्रमाज्ञाता वयं पञ्चसुतास्तयोः ॥

१३. काण्डूरि रामानुजदेशिकस्य पुत्राय विज्ञाय निजात्मजाताम् ।
श्रीवेङ्कटार्याय च रत्नमालां दत्वा विवाहं कृतवान् पिता नः ॥

१४. सुतया वेङ्कटार्यस्य वानमामलवंशिनः ।
विवाहो रङ्गनायक्या पित्रैवाकारि तेऽग्रज ॥

In Public domain. Digitization Muthulakshmi Research Academy

१५. अस्मत्पिता विंशतिहायनं त्वां
वोढुं कुटुम्बस्यभरं नियुज्य ।
अस्मान् समातृनगतीन् विषण्णान्
त्यक्त्वा परंधाम जगाम गम्यम् ॥

१६. शोकं पटुप्रसरमप्यधिकं निरुन्धत्यस्मान्
स्तनन्धयसमानपि गोपमाख्या ।
माता स्वका गुणवती विदुषी विदिज्ञा
प्रापद्बहून् समभिवर्धयितुं प्रयासान् ॥

१७. क्षेत्राणि हर्तुं भवनं ग्रहीतुं प्रहर्तुमस्मान्भृशमुद्यतां स्तान् ।
शत्रून् पराजित्य निजात्मशक्त्या प्राज्ञेत्यवाप्नोत् विनुतिं स्वमाता॥

१८. श्रीवेङ्कटार्य इति प्रसिद्धः पतिर्भगिन्या विबुधो विधिज्ञः ।
कृष्णोयथा पाण्डुसुतैस्सुबन्धुर्गुरूस्सखास्माभिरवापि नूनम् ॥

१९. सोऽयं महात्मा स्मृतिशास्त्रवेत्ता काण्डूरिवंशैकमणिः प्रबुद्धान्
अस्मानधात् तेन कृतां प्रशस्यामुपक्रियां जातु न विस्मरामः ॥

२०. अस्मान् सुशिक्षितान् विज्ञान् स्वावलम्बैकजीविनः ।
कर्तुं प्रयासा बहवोऽप्यनुभूतास्त्वयाऽग्रज ॥

२१. ताण्ड्यालगोत्रतिलकाय च नम्बुलाद्रि
संज्ञाय भक्ततनयाय सुधीसुताय ।
आण्डालिति व्यवहृता सहजा कनिष्ठा
दत्ता त्वया गुणवती प्रतिभावती नः ॥

In Public domain. Digitization Muthulakshmi Research Academy

२२. पुनः परिणयादीनि सङ्घसंस्करणान्यपि ।
कृतानि मत्वा भव्यानि तृणवत् प्रतिरोधिनः ॥

२३. केल्लेडु पुरवास्तव्यो वेङ्कटाचार्यपण्डितः ।
अस्माकमभिवादार्हं यो न श्श्रेयोभिलाषुकः ॥

२४. श्रीरुक्मिणीसत्यभामासमेतस्य मुरद्विषः ।
ब्रह्मोत्सवा निरूढाश्च भवता सानुयायिना ॥

२५. रामानुजमहाचार्य श्री जयन्तीमहोत्सवान् ।
प्रावर्तयदहोवादैः प्रजानां सानुगो भवान् ॥

२६. ध्वजस्तम्भप्रतिष्ठादीन्युपेन्द्रस्य बहून्यपि ।
कैङ्कर्य पुण्यकार्यणि कृतानि श्रद्धया त्वया ॥

२७. दीनानामधमर्णानां पशुक्षेत्र गृहाणि च ।
प्रसह्महर्तुमुद्युक्ता विद्विषो ग्रामदुर्ग्रहाः ॥

२८. हरेर्जनान् समुद्धर्तुं पाठशाला प्रवर्तिता ।
उद्बोधिताः पुञ्जिताश्च दुर्विधा पीडिता जनाः ॥

२९. रजाकारप्रियान् सौवग्रामिकान् जनताद्रुहः ।
दुर्ग्रहान् रोद्धुमस्माभिःसंघर्षा बहुधा कृताः ॥

३०. कृतमान्दोलनं प्रान्ते दमनाय प्रजाद्रुहाम् ।
तत्रान्दोलनकारेषु भ्राताऽभूत् वेङ्कटोऽग्रियः ॥

In Public domain. Digitization Muthulakshmi Research Academy

३१. अस्माकमेव सम्पन्नं क्रान्तिकेन्द्रं निकेतनम् ।
बहवश्शरणं यत्र क्रान्तिकारा गता रहः ॥

३२. क्रान्तिकारा इति स्वान्ते कृत्वैवास्मास्वमर्षतः ।
दुष्टैर्ग्रामग्रहैः कैश्चित् सृष्टाः कष्टपरम्पराः ॥

३३. द्रोहबुद्ध्याऽवसृष्टानि कष्टजालानि धैर्यतः ।
सोढान्यपि समारब्धात् कार्यान्नविरता वयम् ॥

३४. आयोमितो व्ययोऽनल्पः पोष्या गेहेत्वनेकशः ।
अभ्यागतार्चनेत्यादि ऋणभारं तवाकरोत् ॥

३५. उत्तमर्णकृतां बाधाम् अवज्ञां दुस्सहामपि ।
अपाकर्तुं च विक्रीतं क्षेत्रं दैवमपि त्वया ॥

३६. महाकुट्म्बस्य भरं तु वोढुं ग्रामान्तरे क्षेत्रपतेरगत्या ।
कृषिक्रियावेक्षणरूपसेवा कृता बताहो विदूषा त्वयाऽपि ॥

३७. कुटुम्बस्य कृतेऽद्याऽपि श्रद्धा ते नाप्यहीयत ।
यद्यदस्मद्विकासाय कर्तव्यमपि तत् कृतम् ॥

३८. कलकुण्टकुलीनस्य पुत्रया नरहरेर्बुधः ।
रुक्मिण्या वेङ्कटार्यस्य कृतः परिणयस्त्वया ॥

३९. विज्ञस्य शिर्शनगलोपपदस्य
वेङ्कटार्यस्य हेमलतया सुतया गुणिन्या ।
धीमन्मणे विजयसारथिशर्मणे मे
सारस्वतस्य च कृतो भवता विवाहः ॥

In Public domain. Digitization Muthulakshmi Research Academy

४०. योगक्षेमपरं यद्यदस्माकं भवता कृतम् ।
स्मरामो मनसा वाचा तत्तद् भ्रातरनारतम् ॥

४१. मङ्गलाशासनाद् भ्रातर्भवतोऽनुभुवो वयम् ।
भजामहे सुप्रतिष्ठां तासु तासु च वृत्तिषु ॥

४२. प्रज्ञामणिरुपाध्यायवृत्तिमाण्डालुरुत्तमा ।
संस्करोति स्वसाऽस्माकं वैदुषैरभिनन्दिता ॥

४३. श्रीयामुनार्योऽग्रियरत्नमाला श्रीवेङ्कटाचार्यसुतस्सुगाता ।
अध्यापकोऽस्मत्प्रियभागिनेयो ज्योतिष्यविद्वान् अभिवर्धतेऽयम्॥

४४. संस्कृतान्ध्रकलाशालाप्राध्यापकपदे स्थितः ।
लोके कविरिति ख्यातस्सोऽहं विजयसारथिः ॥

४५. उभावप्यग्रजौ सौवौ भ्रातरौ पुत्रशालिनौ ।
युवामिति प्रहृष्टस्य नाधिकृत्मेत्वपुत्रता ॥

४६. देवतानुग्रहाज्ञातः एक एवात्मजो मम ।
वरप्रसादनाम्नायं दीर्घायुरभिवर्धते ॥

४७. अथापि गुणशालिन्यः कृतिकन्यास्त्वेकशः ।
विज्ञैर्मेकीर्तितास्सन्ति पुण्यश्लोका यशःप्रदाः ॥

४८. पत्नीं दुहितरौ पुत्रं तथाऽस्मान् शोकविक्लवान् ।
त्यक्त्वाऽगमत्परन्धाम रत्नमालापतिर्गुरूः ॥

In Public domain. Digitization Muthulakshmi Research Academy

४९. प्रागेव शरदां षष्टेः पूर्तेस्सोऽदयमुत्सृजन् ।
वैकुण्ठं गत इत्यस्मान् बाधाऽद्यपि न मुञ्चति ॥

५०. प्रियग्रज महाप्राज्ञ ! गोपालाचार्य याज्ञिक ।
सर्वथा भवतो नूनमधमर्णा वयं सदा ॥

५१. कुटुम्बवृत्तमस्माकं स्मृतिं नीतं चिरादपि ।
साम्प्रतं भवते भ्रातर् राष्ट्रवृत्तं निवेद्यते ॥

५२. उद्घाट्यन्ते परं दोषा गुणेषु बहुलेष्वपि ।
सुधारणार्थं राष्ट्रस्य दोषज्ञानमपेक्ष्यते ॥

५३. विशालभूते हृदयाम्बुराशौ परस्परोद्धृष्टविभिन्नभावाः ।
मुहुर्मुहुर्भुरितरङ्गभाङ्गाः पुरोभवन्तीव तिरोभवन्ति ॥

५४. कदा कदाऽपि प्रतिकूलविक्रियाकलाप एष स्फुटमार्य जृम्भते।
स्वराष्ट्रवास्तव्य जनस्य दुर्गतिर्नितान्तमुन्मादयतीव मे मनः ॥

५५. मृषापवादभिनिविष्टचेतसां विचित्रवेषादिविलासवर्तिनाम् ।
अकारणद्वेषविषोद्वमद्गिराम् अतीवसाम्राज्यमिहास्ति दुष्कृताम्॥

५६. न सज्जनानां निजधर्मवर्तिनां समाजभव्याभ्युदयाभिलाषिणाम्
उदात्तसंस्कारविशेषभास्वतां पदं मनागप्यधुना प्रशासने ॥

५७. स्वकीयदेशे विषमापरिस्थितिः करोति भीकृल्लयताण्डवं पुनः।
अनेन देशस्समुपैत्वधोगतिं पुरोगतिं यात्वध किं न बुद्ध्यते ॥

In Public domain. Digitization Muthulakshmi Research Academy

५८. न संस्कृतं वैदिकसंस्कृतिर्न वा धर्मनिष्ठा न चरित्रशालिता
न कर्मयोगां न परार्थचिन्तनं विनायकेभ्यस्स्वदते प्रियाग्रज ॥

५९. अनेकवर्गा बहवोऽपि सङ्घा मिथोविरूद्धानि मनोमतानि ।
विचित्रभाषा विविधा विलासा नयन्ति दौर्गत्यमहो स्वदेशम् ॥

६०. विवर्धते जीवनवस्तुमूल्यकं प्रशासनं चापि विवर्तते क्षणात्
रुचिप्रभेदा बहुवक्रतां गता निबन्धना काऽपि न वर्ततेऽधुना ॥

६१. परस्परद्वेषविवृद्धपक्षाः परस्परक्रोधसमृद्धवर्गाः ।
परस्परद्रोहपराश्च शासकाः समाजभव्याय भवन्त्यलं किम्

६२. अमायिकानां पुरतस्सभासु ये प्रगल्भवग्भिर्निगदन्ति भावुकम्
त एव कुर्वन्ति च देशसेवकास्तदीयसर्वस्वविलुण्टनं पुनः ॥

६३. जीवन्ति ये दुर्नृपनीतिवृत्त्या विदन्ति किं ते सदसद्विधानम् ।
पदाभिमोहाभिनिविष्टचित्ताः शासत्यलं किं जनताममात्याः ॥

६४. समस्तमुल्लुण्टितमस्मदीयं सुवस्तुजातं प्रतिलोमशक्तिभिः ।
हृतावशिष्टं खिलमेव जातं निरादरात् किंवनवेक्षणात् किम् ॥

६५. विना निरीक्षां किमपीह नैधते विना प्रयत्नं नहि सिद्ध्यति क्रिया
विना प्रबोधं विविधस्तरेषु नो पुरोगतिं जातिरुपैति काऽपि वा॥

६६. निरन्तरं यत्र पवित्रसंस्कृतिद्युतिस्रवन्ती वहति प्रकृष्टा ।
महोन्नतिं याति स एव देशस्समिद्धचैतन्यमहोमहिम्ना ॥

In Public domain. Digitization Muthulakshmi Research Academy

६७. अलोकशास्त्रव्यवहारपण्डिता निरन्तरस्वार्थपिशाचसाधिताः ।
हिताहितोदारविचारवर्जिताः प्रशासकीयं पदमर्जयन्त्यहो ॥

६८. निर्वीर्यताधायिमतप्रचारा विद्वेषकाकोलविवृद्धपक्षाः ।
वैषम्यसम्पूर्णविरोधिसङ्घाः कदाऽपि राष्ट्रं न विकासयन्ति ॥

६९. विशालदेशो बहुरत्नकोशस्समस्तसम्पत्मुखलालिताश्रीः ।
निजासुदानैरवितोद्य वीरैः खण्डीकृतस्त्वेभिरहोप्रवुद्धैः॥

७०. महोमहाभारतसीम दुष्टैराक्रम्यते स्वार्थपरैः प्रणाय्यैः ।
उपेक्षतेऽस्मप्रभुताऽऽकलय्य प्रोत्साहमेभ्यो ददतीव नूनम् ॥

७१. पवित्रहिन्दूमतसंस्कृतिद्विषत्कृतावमानज्वलदग्निसज्ज्वरः ।
समस्तहिन्दूहृदयावदाहको विना प्रतीकारमसौ न शाम्यति ॥

७२. अशक्तिमस्माकमवेक्ष्य वञ्चकाः प्रतारणोपायशतैः पदे पदे ।
महामदीया अपरे सितानना निजप्रचारं बहुधा वितन्वते ॥

७३. पदेषु लुब्धा बहुपक्षनायका-
स्तदोतु मात्रार्जनलम्पटा इमे ।
न तान् निरुन्धन्ति कदाऽपि
तत्कृतस्वजात्यवज्ञां गणयन्ति नाप्यहो ॥

७४. अनश्वरं यन्मुनिभिर्विशालं प्रज्ञानरूपं द्रविणं प्रदत्तम् ।
याचाम मत्वा तदिदं तृणाय विज्ञानभिक्षां स्वविलोमवर्गान् ॥

In Public domain. Digitization Muthulakshmi Research Academy

७५. यदेव बौद्धेन मतेन देशे पदं समाक्रान्तमिह प्रजासु ।
तेजस्सहोवीर्ययशोवलानां ह्रासाय नान्दी घटिता तदैव ॥

७६. तदात्वतोहि प्रथिताऽऽर्यजातिः क्रमादवज्ञामुपयाति लोके ।
उदासितृत्वात् कृतिनां स्वराष्ट्रे दुराक्रमोऽकारि विलोमजात्या॥

७७. निजप्रतिष्ठास्पदसंविदावह प्रभूतसारस्वतसंस्कृतिश्रियाम् ।
मुहुर्मुहुर्द्रोहिषु दुर्मतिष्वये कृते च सौभ्रात्रमुदेति नः कथम् ॥

७८. भ्रातः! स्वराष्ट्रे निजजातिरेव स्वकप्रतिष्ठास्पदसंस्कृतिश्रियम्
अरुन्तुदैर्निन्दति यद्वचोभिः खेदं कियन्तं वितनोति मानिनाम् ॥

७९. न बुद्ध्यते कोऽपि निजार्यधर्मं न वावगच्छत्यपकीर्तिमेनाम् ।
न वेविदीति स्वकजात्यवज्ञामार्याभिमानोऽद्य युगे विलुप्यते ॥

८०. स्वजातिधर्मस्थितिकर्मवृत्तिप्रवृत्तिमारात्परिभूयाचार्याः ।
अनार्यताजुष्टमतान्तरीयप्रकल्पनान्धौ निपतन्ति मूढाः ॥

८१. विजातिदुर्मोहवचावशंवदा विरुद्धभाषामतवेषलम्पटाः ।
स्वजातिनीतिं प्रगतिं च संस्कृतेरिमे प्रबुद्धा बहुधा हसन्त्यहो ॥

८२. अनेकवृत्तिस्थितिरीतिनीतिप्रदेशभेदे सति भारतानपि ।
सुसंस्कृतिद्वारमुदारसंस्कृतं सदैकमत्यं नयतीदमग्रज ॥

८३. अनेकशास्त्रैर्बहुभिः कथानकैःश्रुतीतिहासागमसूत्रबाङ्मयैः ।
विचित्रवक्रोक्तिमयैः सूभाषितैरनन्तकोशत्वमुपैति संस्कृतम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

८४. समस्तहिन्दूजनतानुबन्धिनीमशेषभाषाऽऽकृतिदां मृतेति ।
ब्रुवन्ति गीर्वाणसरस्वतीमहो स्वयं मृतत्वं त उशन्ति निस्त्रपम् ॥

८५. स्वातन्त्र्यसम्भवेऽप्यस्मिन् भारते सुरभारतीम् ।
नैव त्यजति दौर्भाग्यरूपा घोरपिशाचिका ॥

८६. स्वभाषामतसंस्कारवेषविज्ञानवैखरी ।
यत्र प्रतिष्ठिता भाति तत् स्वराज्यमुदीर्यते ॥

८७. भारतीयैक्यघटनाविधानं संस्कृतं विना ।
स्वराज्यं न स्वराज्यं स्यात् भारतं नापि भारतम् ॥

८८. आत्मीये किल हिन्दूदेशे हिन्दूमतवाङ्निरसनपूर्वम् ।
परमतभाषावेषादरणं जनयति दुःखं कियदस्माकम् ॥

८९. भारतभाषावेषविलासाचारविशेषविराजितममलम् ।
भारतसंस्कृतिसंस्कृतमनसं विहसति परमतभाषादासः ॥

९०. दम्भाचारं दम्भविलासं दाम्भिकवेषं दाम्भिकवचनम् ।
दृष्ट्वा जाल्मो मुह्यन्नमति नहि नहि पश्यत्यन्तस्सारम् ॥

९१. परभाषाविकासाय कोटिशो द्रविणं मुदा ।
भारते सर्वकारोऽयं व्ययतेऽद्यापि चिन्त्यताम् ॥

९२. मृदुपदशय्याभाग्यमनोज्ञा ध्वनिसौन्दर्यविशेषधुरीणा ।
द्राक्षामधुरा संस्कृतकविता नश्यति प्रभुतादरणाभावात् ॥

९३. संस्कृतेस्तु विकासाय जातेरुज्जीवनाय च ।
सन्धानायैकमत्यस्य संस्कृतं भुवि कल्पते ॥

In Public domain. Digitization Muthulakshmi Research Academy

९४. प्रान्तभाषादुरावेशो वक्रवृत्तिविजृम्भितम् ।
अनैकमत्यमित्यादि न स्यात् संस्कृतसेवनात् ॥

९५. सम्पूर्णभावविस्फूर्तिसमिद्धपदसम्पदा ।
संस्कृतस्य समा भाषा नास्ति निश्चप्रचं भुवि ॥

९६. नैधते भारतस्यैव संस्कृतिस्संस्कृतं विना ।
मूलं विहाय शाखानां सेचनेन तरुर्यथा ॥

९७. भाषा भवति चान्योन्यभावाभिव्यक्तिसाधनम् ।
साधनानामभावे तु साधनं किं करिष्यति ॥

९८. न काऽपि जन्मना भाषा सर्वविज्ञानसम्पदा ।
प्रगतिं प्राप्नुयात् नृणामभियोगेन वर्धते ॥

९९. परदास्यान्धतमसात् जातिदौर्भाग्यतोऽपि वा ।
हिन्दवो व्यस्मरन् मातृभाषां संस्कृतभारतीम् ॥

१००. संस्कृता भारती यस्य नो भाति रसनाऽङ्गणे ।
वाचालोऽपि स चार्योऽपि मूक एव स्वसंस्कृतौ ॥

१०१. संस्कृतोत्थानभारोऽयमार्येष्वस्मासु वर्तते ।
मातृभाषां समुद्धृत्य गतां कीर्तिं भजामहे ॥

१०२. भारते वस्तुकामेन संस्कृतं सेव्यतामिति ।
उद्घोषयाम निर्भीतिढक्कावादनपूर्वकम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१०३. महाधिकारपदवीलाभार्थं नायमुद्यमः ।
प्रचारपरया दृष्ट्या संस्कृतस्य विभाव्यते ॥

१०४. निद्रालुहिन्दुसन्दोहप्रबोधार्थमियं कृषिः ।
किंस्वजातिप्रबोधोऽपि दोषाय परिकल्पते ॥

१०५. यस्य प्रभावेन महार्यजातिर्महोन्नतं प्राप पदं जगत्याम् ।
आचार्यतां तत्तदुदारतत्त्वज्ञानप्रबोधेन जगत्प्रजानाम् ॥

१०६. उदात्तसत्संस्कृतिसारसारणी समग्रभावार्थविशेषवाहिनी
उदारसाहित्यसुधातरङ्गिणी पुनातु नस्संस्कृतभारती सदा ॥

१०७. स्वजातिजीवातुमुदात्तसंस्कृतं
विहाय चान्यां गिरमाश्रयन्त्यहो ।
न कोऽपि मन्दो मधुरामृतापगां
विसृज्य सेवेत सदाबिलं ह्रदम् ॥

१०८. प्रतिष्ठानाय धर्मस्य यस्य स्वातन्त्र्यमार्जितम् ।
तस्य विस्मरणं भोगलालसैर्नायकैः कृतम् ॥

१०९. लक्ष्यस्य सिद्धये यस्य पूर्वैरात्मार्पणं कृतम् ।
क्रियते नायकैस्तस्य स्वार्थायोद्वासनं परम् ॥

११०. अजाशनाः परं याता आगता महिषाशनाः ।
इत्येवं प्रसरीसर्ति व्यवहारोऽधुना जने ॥

ब्राह्मणादिर्जातिः

In Public domain. Digitization Muthulakshmi Research Academy

१११. वैदेशिकैर्यद्यदुपार्जित स्वकं वैज्ञानिकं पुस्तकजातमुत्तमम् ।
अस्माभिरद्यापि पुनः किमाहृतं नकारघण्टैव निवेदयत्यदः ॥

११२. समग्रराष्ट्रप्रगतेर्विधायकं स्वजातिधर्माभ्युदयाभिसाधनम् ।
व्यवस्थितं वा किमपीह शासनं नकारघण्टैव निदर्शयत्यदः॥

११३. वैज्ञानिकेऽस्मिंस्तु युगे पुरागतिस्स्वदेशविज्ञैः कियतीह साधिता
पुराणशास्त्रेषु गवेषणा कृता नकारघण्टैव निदर्शयत्यदः॥

११४. अजात्यपेक्षं स्वमतानपेक्षं निबन्धना याहि कुताऽस्मदीयैः ।
सुधार्यते सा किमु निर्निरोधं नकारघण्टैव निदर्शयत्यदः॥

११५. पक्षैरनेकैर्बहुभिश्चसङ्घैः कियत्यहो जागरणा विधीयते ।
विकासरूपा निखिलप्रजानां नकारघण्टैव निदर्शयत्यदः ॥

११६. गुणानपेक्षं प्रतिभानपेक्षं
सत्तानपेक्षं स्थितिसंविधानात् ।
व्याकुण्ठिता राष्ट्रपुरोगतिर्भवेत्
इत्यस्मदीयैनं कदाऽपि चिन्त्यते ॥

११७. पुरोगातिप्रोन्नतिशान्तिसाधकास्स्वदेशपक्षाः किं वृद्धिरोधिनः।
परस्परक्रोधविरोधधायिनो विदेशपक्षाः किमु वृद्धिकारकाः॥

११८. निम्नस्तराणामभिवृद्धिकार्यं सम्पादनीयं बहुधा स्वराष्ट्रे ।
पुरस्सरा इत्यवलोकितानामपेक्षितव्या प्रगतिस्तथैव ॥

११९. निर्मूलयत्यात्मगृहं परार्थं न कोऽपि वा हन्ति कुटुम्बकं स्वम्
भ्रातर्नितान्तं पररञ्जनार्थं द्वयं तु कुर्वन्ति तदस्मदीयाः ॥

In Public domain. Digitization Muthulakshmi Research Academy

१२० न कस्यचित् कोऽपि सखा स्वभावतो
न कोऽपि कस्यापि विरोधभाजनम् ।
स्वराष्ट्रजातिव्यवहारतः पुमान्
स्वमित्रतां यात्यथवा प्रणाय्यताम् ।।

१२१ अनारतस्वाश्रितभूरिदक्षिणा प्रणामसत्कारपरायणा इमे ।
मठाधिपाः केवलभोगतत्पराः प्रतिप्रबोधात् जनयन्ति वेदनाम्।।

१२२ निगीर्य भव्यं श्रुतिचोदितं विधिं विचित्रवेषैर्निजलाभसिद्धये।
प्रचारयन्तस्स्वमतं त्ववैदिकं द्रुह्यन्ति धर्माय जनाय केचन।।

१२३ कश्चित् प्रतीकारदृशाऽपि वर्गं
करोति लाभाय च कोऽपि संघम् ।
निजाधिकाराय दलं च कश्चित्
न कोऽपि राष्ट्राभ्युदयं वृणीते ।।

१२४ परं लुभित्वा विपरीतबुद्धयः
स्वराष्ट्रविद्रोहपरैः प्रतारकैः ।
मिलन्ति केचिद्बहुशस्स्वसोदरा-
स्स्वके च निर्मूल्य यशःप्रतिष्ठिती।।

१२५ आर्या इमे द्राविडसंज्ञिता इमे
इमेत्विहत्याः पृथगागता इमे ।
इति प्रवादं परिकल्प्य विद्विषो
विभेदमस्मासु परस्परं दधुः ।।

In Public domain. Digitization Muthulakshmi Research Academy

१२६. प्रजासु सम्पातयति प्रभुत्वं सुदुष्करं शुल्कभरं समन्तात् ।
मूल्यैर्महद्भिर्व्यवहारिणोऽपि विक्रीय वस्तून्यलकेश्वरन्ति ॥

१२७. प्रजाप्रभुत्वाभिधया विनायकाः
प्रतार्य साधून् श्रमजीविनः परम् ।
पदान्यवाप्याधिकृतान्यनेकधा
नियन्तृतापालनमद्य कुर्वते ॥

१२८. दुराशयान् कानपि दुष्टवृत्तीन् विधाय दुस्वार्थपरान् प्रगृह्यान्
निर्माय नूलं कमपि स्ववर्गं चरन्त्यहो नेतृतयाऽद्यकेऽपि॥

१२९. परस्परप्रेम परस्परादृतिः परस्परश्रेयसि बद्धमध्यता ।
परस्परं चाभ्युदयाभिलाषिता न लक्ष्यते क्वाप्यधुना प्रजागणे॥

१३०. ग्रामौकसां नूनममायिकानां सिते हृदि स्नेहसुधारसाप्लुते ।
वैयक्तिकद्वेषविवृद्धपक्षैः परस्पर द्वेषविषं च सृज्यते ॥

१३१. सुखप्रशान्तिस्थिरचारुजीवनं परस्परस्नेहसहायताञ्चितम् ।
दूराजकीयप्रतिघर्षणेन ग्रामीणवातावरणं प्रणष्टम् ॥

१३२. प्रमोदपूर्णा सुखशान्तिलालिता
कला न कस्यापि मुखे विभासते ।
वैयाकुली काऽपि विलोक्यते
तरामाबालवृद्धं निखिलप्रजागणे ॥

In Public domain. Digitization Muthulakshmi Research Academy

१३३. विज्ञानवर्त्मसु पुरस्सरणात् प्रतीत्थम-
ज्ञानगर्तकमधः प्रविशाम मान्द्यात् ।
वैयासकादिषु महत्स्वपि दर्शनेषु
वैयाकुलीमथ वयं परिकल्पयामः॥

१३४. आस्माक एष विषयो महिताऽऽर्यभूमी
राष्ट्रं त्विदं भरतमातृसुतोऽहमस्मि ।
इत्येव काऽपि महती हृदि भावनाऽसौ
सम्पत्स्यते किल कदा निखिलप्रजानाम् ॥

१३५. विराण्मयीं हैन्दवराष्ट्रमूर्तिं
विनिन्दितुं खण्डयितुं च येऽपि ।
समुद्यतन्ते न हि तान् क्षमेये-
त्युपस्क्रियात् सर्व इहापि दीक्षाम् ॥

१३६. अनेकलक्षायुतकोटिरूप्यकव्ययेन
वृत्तिव्यवसाययोजनाः ।
प्रकल्पितास्सन्ति परन्तु दीनता
व्रातीनलोकस्य न चापसार्यते ॥

१३७. स्वपालकत्वं समुपागतं पुन-
स्सुपालकत्वं नहि तावदागतम् ।
विजाति दास्यं त्वपयातमेव नो
विभावदास्यं महदद्य तिष्ठति ॥

In Public domain. Digitization Muthulakshmi Research Academy

१३८. न धर्मचिन्ता न च सूनृतं वचो
न पुण्यकार्ये निरतिर्न चौचिती ।
न साधुता नापि पवित्रभावना
विलोक्यते क्वापि नरेषु साम्प्रतम् ॥

१३९. दिने दिने पापमृषानृशंसता कदर्यताद्रोहविरोधमत्सराः ।
मदाभ्यसूयापरवञ्चनादयो निरन्तरं यान्ति पृथङ् महोदयम्॥

१४०. महात्मनं वीरशिखामणीनां महामतीनाञ्च महाकविनाम् ।
महानृपाणामवरैश्चरित्रं मृषाकथाभिः कलुषीकृतं नः ॥

१४१. स्वदेशनीतिं निजजातिधर्मं निपात्य मूलात्परदेशनीतिम् ।
विजातिधर्मं निजदेश एव प्रवेशयत्यद्य बलात् प्रभुत्वम् ॥

१४२. पाश्चात्यवन्नो परमाणुशोधनं न प्राच्यवद्वा परमार्थचिन्तनम् ।
कुर्वन्ति मन्दाः पुनरस्मदीयाः इतश्च्युतिं यान्ति ततश्च्युतिञ्च॥

१४३. शुष्कैर्निनादैर्नकदाऽपि राष्ट्रं विकासमाप्नोति दुराशयैश्च ।
न कोऽपि सङ्घस्स्वयमेधते नो सुधारयत्यन्यगणान् कदाऽपि॥

१४४. लोभेन कामेन तथाभ्यसूयया मोहेन गर्वेण निरादरेण च ।
स्वार्थैकलग्नेन हृदा मदस्फूरा सदावकृष्टः पततीह नायकः॥

१४५. अविश्रमं कर्म करोति कश्चित्
श्रमं विना कश्चिदुपैति सौख्यम् ।
निर्दोषमेकोऽप्यधियाति दण्डम्
अन्यस्सदोषोऽप्यधुना सपर्याम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१४६. उत्कोचकास्स्वार्थपिशाचसाधिताः प्रतारका जात्यभिमानवर्जिताः
क्रूराश्च यत्राधिकृता भवन्ति तस्मै प्रदेशाय नमो नमोऽस्तु ॥

१४७. अमायिकानामतिमायिकानां
सदात्मनां यत्र दुरात्मनामपि ।
समा सपर्या वरिवर्ति वा स्थितिः
तस्मै प्रदेशाय नमो नमोऽस्तु ॥

१४८. पदाधिकारं प्रगतिं पुरोगतिं विशिष्टपूजामवनौ पुरस्कृतिम् ।
भजन्ति मूढा लघु यत्र बालिशाः तस्मै प्रदेशाय नमो नमोऽस्तु॥

१४९. पदं तु यत्र प्रतिभानपेक्षं स्वबन्धुमित्रश्रितपक्षपाततः ।
प्रकल्प्यते स्वस्य जनस्य नायकैस्तस्मै प्रदेशाय नमो नमोऽस्तु॥

१५०. पदे पदेऽज्ञा मदमत्तचित्ताः परीक्षका यत्र विवेकहीनाः ।
परीक्ष्यमाणाश्च बुधा भवन्ति तस्मै प्रदेशाय नमो नमोऽस्तु॥

१५१. कुलाङ्गना यत्र परम्परागतं
गृहस्थधर्मं परिहाय चार्जवम् ।
यदृच्छयाऽटन्ति विलासलालसाः
तस्मै प्रदेशाय नमो नमोऽस्तु ॥

१५२. शासने शिक्षणे काव्ये चित्रणे योजनासु च ।
रीतौ नीतौ विचारेऽपि दोष एव समेधते ॥

१५३. बहुव्रणपरिक्लिष्टं समाजं मूलतः पुनः ।
परिष्कर्तुमुपस्कर्तुं काऽपि शक्तिरुदेतु नः ॥

In Public domain. Digitization Muthulakshmi Research Academy

१५४. नवां शक्तिं नवां दीप्तिं नवामालोचनामपि ।
श्रेयस्करं नवं सर्वं भगवान् प्रददातु नः ॥

१५५. अनन्तचैतन्यसमुज्ज्वलस्य महासमाजस्य समग्रशक्तेः ।
प्रादुर्भवार्थं कवयो धनेशा मेधाविनश्शास्त्रविदो यतन्ताम् ॥

१५६. आशयान् मिनुमो यांस्तु प्राणेभ्येऽप्यधिकान् वयम् ।
अस्माकमन्वये जातास्सुधियस्साधयन्तु तान् ॥

१५७. इति सम्भावनां कृत्वा लेखादस्माद्विरम्यते ।
ददातु नस्सदा भ्रातर्मङ्गलानि श्रियः पतिः ॥

१५८. अनलर्तुविरिञ्चीन्दुमितेऽब्दे दशमे तिथौ ।
राधे प्रारभ्य राकायां भ्रातृलेखस्समापितः ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

राष्ट्रसूक्तम्

१. लोकसत्तात्रणशक्ते ! निखिलवर्गप्रणाशक्ते !
क्रान्तिशक्ते ! श्रान्तिशक्ते ! राष्ट्रशक्ते ! जागृहि त्वम्

२. बहुविधेन्द्रश्रीसमृद्धे ! लोकयोगक्षेमकारिणि !
नवनवाविष्करणदक्षे ! राष्ट्रशक्ते !

३. विविध खनिज गवेषणोत्सुक सफल वैज्ञानिक जयपताके।
बहुविधश्रमजीविसान्त्वनि ! राष्ट्रशक्ते !

४. जय जय श्रीदेवि ! दुर्गे ! जय सरस्वति जय महस्वति !
साक्षरास्यङ्रणनिरते ! राष्ट्रशक्ते !

५. क्रान्तिकारशितासिधारारङ्गनर्तकि ! रूद्रमूर्ते !
विद्विडान्त्र लतान्त्र माला लालितोरस्स्थलि ! जनार्दनि !

६. जय जयाहित कोटिकन्धरकर्तनोज्वलदसिभयङ्करि !
यवनदानवकोष्णशोणित पानमत्ते ! राष्ट्रशाक्ते !

७. आततायिक्रूरसत्त्वस्तोममारिणि ! राष्ठ्रदुर्गे !
वीरहिन्दूनुतपुरन्दरवीर्यशक्ते ! जागृहि त्वम् !

८. क्रान्तिमयि ! विक्रान्तकान्त क्रान्ति जागरणैकशीले !
अक्षिनिज्वलदुच्चलज्ज्वलनार्चिराल्पुषितारिहृदये !

९. निशित निस्त्रिंशोग्रधारा रक्षितोज्वल दार्य भूमे।
त्रितयशक्ति प्रतिकृतिस्फुरदसितपीतश्वेतमूर्ते !

In Public domain. Digitization Muthulakshmi Research Academy

१०. जातिदेश द्रोहिसन्ततिहनन दीक्षाव्रधुरीणे !
नैककोटिमहोदयार्योद्‍गीयमाने ! जय जय त्वम् ॥

११. यवनहृदयाम्भो रुडन्धकरण कूहाव्यूहसर्जनि !
भारतान्तर्वाणि संवित् स्पन्दनन्दिनि ! राष्ट्रशक्ते !

१२. वीरहिन्दूराष्ट्रदुर्गे ! पालितामलवेदमार्गे
रञ्जिताखिल मनुजवर्गे ! विजयदुर्गे ! जागृहि त्वम् ॥

१३. नैकनैककोटि भारतहृन्निलीन निषुप्तशक्तिम्
सपदि जागरय प्रमादं द्रुतमपाकुरु राष्ट्रशक्ते !

१४. भारतान्तःकरणगाढप्रतिजरत्तम तिमिरपटलीम्
दूरयन्ती ज्योतिरमलं ज्वलय सततं राष्ट्रशक्ते ॥

१५. नवनवोज्ज्वल दुल्लसत्कलललित लालितलास्य भूमे ।
मधुरतरदरहाससुषमा सुरभितोज्ज्वाल दधरबिम्बे ॥

१६. रक्तचन्दन रक्तमाला रक्तसिचयोज्ज्वलितमूर्ते ।
अरिभयङ्करि ! हितशिवङ्करि समरघस्मर चण्डि जय जय ॥

१७. जय जयेन्दीवर विनील विशालनयने ! मधुरहृदये ।
चिकुरलीलाभ्रमरमाला लालितानन जलजने ! जय ॥

१८. प्राक्तनी परमार्षसंस्कृतिरद्य याति क्षयमतीव
वेद वेदानन्तादिविद्या राष्ट्रशक्ते ! यान्ति कार्श्यम् ॥

१९. मनुजदनुजास्सवनभवनं भारतं परिलुण्टितुम् भुवि
छद्मवेषैस्सञ्चरन्ति च राष्ट्रशक्ते ! जागृहि त्वम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

२०. आर्षशन्ततिरेवमलसा निखिलरङ्गेष्वधमभावम्
यातिं सद्यस्तां पुरस्कुरु राष्ट्रशक्ते !

२१. हीनजीवन मूनवृत्तिं दीनभावं दुष्टरीतिम्
भारताभिजनोऽद्यकुरूते राष्ट्रशक्ते !

२२. परमपावन भरतदेशे स्वीय सन्ततिरेव मौढ्यात्
दृह्यति स्वकदेश मात्रे राष्ट्रशक्ते !

२३. नास्ति कश्चित् स्वमतपोषणकौतुकी निजभरतदेशे
विमतमतयस्सन्ति बहवो राष्ट्रशक्ते !

२४. चन्द्रमण्डलमात्मसादिव कर्तुमधुना श्रद्दधानः
विज्ञलोकोऽतीवयतते राष्ट्रशक्ते !

२५. प्रगतिमेति प्रकृतिशास्त्रं तत्वशास्त्रं यात्यधोधः
एधते दुस्स्वार्थबुद्धी राष्ट्रशक्ते !

२६. आर्षसूक्तिस्साऽपवादं याति वेदायन्ति निन्दाम्
सत्यमाप्नोत्यहह घात्यां राष्ट्रशक्ते !

२७. शैवमशिवाध्वानमृच्छति भजति वैष्णममुष्णमाधिम्
स्मार्तमार्तं भवति भरते राष्ट्रशक्ते !

२८. भ्रष्टवर्त्मा भारतीयो मुञ्चति स्वयमेव हस्तात्
निश्चितं निजभूमिभागं राष्ट्रशक्ते !

२९. द्रोहचिन्ता स्वार्थबुद्धिः पक्षपातो वर्गकलहम्
पदविमोहो यान्ति वृद्धिं राष्ट्रशक्ते !

In Public domain. Digitization Muthulakshmi Research Academy

३०. कुटिलमतयः पालका इह मायकाः खलुनायका भुवि
सुजनता कथमेतिकुशलं राष्ट्रशक्ते !

३१. हिन्दु जनतामान्ध्यमगमत् बिन्दुता कुत्रपि लुप्ता
मानमर्यदेऽप्यपेते राष्ट्रशक्ते !

३२. क्षात्रशक्तिर्दृश्यते न क्वापि कोणे ब्राह्मणत्वम्
लीयते किमु वर्ण्यते श्री राष्ट्रशक्ते !

३३. भ्रष्टशीला घृष्टधूर्ता मादकद्रवसार्थवाहाः ।
लुण्टकाः पाटच्चरा अधिकुर्वते गणतन्त्रराज्ये

३४. विविध विमताशीविषावलिदश्यमानामार्यजातिम्
पाहि पाहि क्रान्तिशक्ते ! राष्ट्रशक्ते !

३५. किं न पश्यसि साधुवाधामार्तरूदितं शुतिपथं किम्
नैति कथमिव जोषमास्से राष्ट्रशक्ते !

३६. दिव्यभावस्फूर्तिमहितं मातृदेशं प्रोर्दितं कुरु
कल्पयोज्ज्वलजीवितं नः राष्ट्रशक्ते !

३७. विविध कुलमत वर्णवर्ग प्रान्त भाषोपास्यमाने
विविध दलपतिनेतृ शासक कीर्त्यमाणे राष्ट्रशक्ते !

३८. बहुविधेन्द्र श्रीविनोदिनि ! बहुविधावेशनसभाजनि !
विविधविज्ञानप्रमोदिनि ! राष्ट्रशक्ते ! जय जय त्वम्

३९. सुरभयेश्वरि ! भरतनन्दनमागमद्युतिमुन्नतिं नय
भासयार्षज्योतिरभितो राष्ट्रशक्ते ! जय जय त्वम्

In Public domain. Digitization Muthulakshmi Research Academy

४०. सर्वतोमुखि ! सर्वतोजयमम्ब ! कल्पय नः कृपामयि
पूर्णसिद्धिं विविधकर्मसु नः प्रसादय रार्ष्टशक्ते !

४१. सततमस्मान् पूर्णविजयश्रीयुतान् कुरु विजयलक्ष्मि !
कीर्तिसुभगान् कुरु सदाऽस्मान् राष्ट्रशक्ते ! जागृहि त्वम्

४२. विविधरागश्रुतिलयाञ्चितगीतगानविमोहिताशे !
विविध भावतरङ्गरङ्गद्रसविकस्वरहृदयलासिनि !

४३. दुर्मदान्धव्रजभयङ्करि ! दुष्टमर्दिनि ! शिष्टपोषिणि !
भरतजनता प्राणशक्ते ! राष्ट्रदुर्गे ! जागृहि त्वम् ॥

४४. सकलजन चैतन्यदायिनि सकल दारिद्र्यापनोदिनि
सकलजनतामोदवर्षिणि जय जय श्रीराज्यलक्ष्मि !

४५. मणिविपञ्चीमञ्जुपाणे ! जय सरस्वति ! जयमहस्वति !
सकलजनता साक्षरीकरणोद्यते ! जय विविध भारति !

४६. खण्डखण्डेष्वधिकगौरवमधिगतं खलु भारतं भुवि
हन्त लाघवमेति बहुधा राष्ट्रशक्ते !

४७. प्राङ्महोदय साधिताखिलशस्त्रशास्त्र प्रगतिमधुना
लुम्पति स्वयमार्यजनता राष्ट्रशक्ते !

४८. प्रकृतिशस्त्रप्रगतिमुच्चैस्साधयन् परदेशवासी
प्रकृतिविजयं प्राप्तुमुत्सहते च जागृहि राष्ट्र शक्ते !

४९. कुटिलकुमतोलूकसन्ततिरारटीति श्रुतिकठोरम्
भरतखण्डोद्यानमध्ये राष्ट्रशक्ते !

In Public domain. Digitization Muthulakshmi Research Academy

५०. परम रम्या शिल्पसम्पन्निर्विकल्पानन्दभूमा
शिल्पिवेधः कल्पिता सा यवनदनुजैर्ध्वसिताऽभूत्

५१. भारतीयोदञ्चित प्रतिभानशक्तेःप्रतिकृतिस्सा
शिल्पसम्पन्नष्टसुषमा द्रावयति किं ते न हृदयम् ॥

५२. आर्यकीर्तिप्रतिनिधिं तां मसृणमोहनशिल्पलक्ष्मीम्
शीर्णजीर्णकलां निपश्यत एव मे हृदये न दीर्णम्

५३. प्रान्त भाषावर्गकुलमत कलहमय दुर्घर्षणानि
दूरयन्ती निरवरोधं सर्वतोमुख जयमुपार्जय

५४. लुण्टितुं निरार्ष्टसम्पदमेकतामपि तोत्तुमधुना
युञ्जते बहिरन्तररयो राष्ट्रशक्ते !

५५. स्वस्वलाभप्रेप्सयैवं कुटिलनेतारो वियाताः
धनमवैधमुपार्जयन्ते कोटिशश्श्रीराष्ट्रशक्ते !

५६. तुन्दपरिमृजमलसमितरश्रम समर्जित धनहराग्रम्
राष्ट्र सम्पल्लुण्टकं जनवञ्चकं च बहिष्कुरूष्व

५७. छिन्दती लुण्टाकवर्गं भिन्दती द्राक् कुण्ठकालिम्
पुष्णती श्रमजीविर्गं राष्ट्रशक्ते !

५८. स्वार्थपरदललोकवञ्चकनेतृशासक पीठमर्दान्
दूरयन्ती कुरु सुराज्यं राष्ट्रदुर्गे ! त्वं स्वराज्यम्

५९. विषमतापेत महितोद्यम धुरीणं साक्षरं भुवि
विविधवृत्ति श्रमधनाढ्यं कुरु समाजं राष्ट्र ॥

In Public domain. Digitization Muthulakshmi Research Academy

६०. सर्वतोमुखबहुपुरोगतिसाधनोद्यम कर्मठम्
पूर्णवैरिकर विकासविकस्वरं कुरू भारतम् ॥

६१. एकसूत्रे बध्नती बहुवर्ग कुलमतसंकुलम्
प्रगतिमुन्नय भारतं सुखशांन्तिपूर्णं राष्ट्रदुर्गे !

६२. निजविधेयेष्वेव कर्मसु दीक्षितं च विचक्षणम्
राष्ट्रसम्पत्पोषकं नवभारतंकुरू राष्ट्रदुर्गे !

६३. नवनवाविष्करण सुफलैर्नुत्ननूतनगवेषितैरपि
सर्वतोमुखमखपुरोगामित्वमुन्नय भारतम्

६४. शासनाग्रपदोपविष्टान् दुष्टसत्त्वान् स्वार्थ भरितान्
द्वीपिवञ्चकवृकमृगादन तुल्यवृत्तीन् स्पदि दूरय ॥

६५. विविध विज्ञान प्रयोगतपःफलेग्रहि भागधेयैः
अग्ररज्यमदापनुद्भी राष्ट्रदुर्गे ! वर्धयास्मान् ॥

६६. स्वस्ववृत्तिश्रम समर्जितिधन समग्रस्वाम्यकलितान्
परमविषमान् राष्ट्रदुर्गे ! पौरजानपदान् प्रबोधय ॥

६७. विविधरङ्गेष्वग्रतस्सरदसममहिलामणि निरञ्जनि
परमशान्तिज्योतिरञ्जितचरित शालिनि राष्ट्रदुर्गे !

६८. तुन्नवायान् तन्तुवायान् कुम्भकारान् लोहकारान्
स्वर्णकारान् ताम्रकुट्टान् वर्धकीनुज्ञीवय त्वम्

६९. शौण्डिकाजाजीवि नापित जालिकान् वैतंसिकानपि
भारवाहान् चर्मकारान् इतरवृत्तिपरान् पुषाण

In Public domain. Digitization Muthulakshmi Research Academy

७०. विविध कर्मागारतत्पर बहुविधश्रमजीविभृतकान्
द्रौणिकाढकिकादि खारीवापकृषका नव पुषाण ॥

७१. शीतवर्षातपजबाधामविगणय्ये तरहितरतान्
क्षेत्रखानिश्रमधनान् बहुकृषककर्मकरान् सभाजय ॥

७२. आच सायंप्रातरसय.... श्रान्ति सलिल स्विन्नगात्रान्
राष्ट्रयोगक्षेमनिरतान् कृषककर्मकरान् सभाजय ॥

७३. खलकुसीदिकपीडितानधिकारदुर्मदतर्जितानध-
श्रमसमर्जित लुण्टकव्यथितान् सदा परिपाहि कृषकान् ॥

७४. दुर्विधानैः प्राणमानस्थलगृहादीनपहरद्भिः
धूर्तधृष्टखलाततायिभिरर्दितान् व्यथितान् सुधारय ॥

७५. छात्रवर्गेज्ञानविज्ञानार्जवाभ्युदयोन्नतीः
उन्नतादर्शनिर्मलशीलसंस्कारांश्च वितनु ॥

७६. अधिकृतेषु न्यायबुद्धिः न्यायवादिषु धर्मचिन्ता
मुरुषुशिक्षणकौशलं स्यात् प्रगतिमूलं राष्ट्रदुर्गे ॥

७७. रोगनिर्हरणौकदृष्टिर्विविधवैद्यविशारदेषु
कृषककर्मकरेषु तृप्तिः प्रगतिमूलं राष्ट्रदुर्गे ॥

७८. लोक योगक्षेमनिरतिः केन्द्रशासनमन्त्रिषु
निरुपद्रवास्थितिरङ्गनासु प्रगतिमूलं राष्ट्रदुर्गे ॥

७९. लोकसुखहित कर्मदाक्ष्यं विविधदलपतिनेतृषु
न्याय्यसम्पद् वाणिजेषु प्रगतिमूलं राष्ट्रदुर्गे ॥

In Public domain. Digitization Muthulakshmi Research Academy

८०. बान्धवेषु प्रीतिरहितं पक्षपातादप्यपेतम्
विविधजनसमदर्शिशासनमेव भवति प्रगति मूलम् ॥

८१. राजनीतिक कविविदूषकवन्दिमागधपीठमर्दैः
विविधदानमिषोपनीतैर्जनगणैस्सह संकुलेषु ॥

८२. मेलनेषु सभासु कुर्वन्तो वियाता वञ्चयन्तः
जनविलोभन कल्पनास्पद काम्यतमवाग्दानकौटीः॥

८३. अम्बूकृतावाच्यसङ्कुलनिष्ठुरोत्रास वितथैः
विप्रलापापवारितक प्रलापप्रभृतिलषितैः॥

८४. विविधपदलिप्सैकलक्ष्या दूराजनीतिविशारदाः
विविध भोगाननुभवन्ति विलासपूर्णान् प्राज्यराज्ये ॥

८५. प्राप्य बहुविधकर्मकर सङ्घाधिपत्यानि धूर्ताः
द्विमुख बहुमुखवित्तराशिं राजराजन्त्यर्जयन्तः ॥

८६. अमिततम वरशुल्कराशिग्रहणलुब्धाश्शिक्षिता अपि
कन्यकाभिस्सहपितॄन् बहुधा वरा हिंसन्ति घोरम् ॥

८७. पानशाला नृत्तशाला द्यूतशालसु प्रविष्टाः
कोटिशः कृतदुर्व्यया निस्वाय दातुं सङ्कुचन्ति ॥

८८. विविधसेवा सदन सङ्घव्याजतोऽमी शासकीयाः
कोटिकोट्यनुदानराशिं वञ्चका लुण्टन्ति केचन ॥

८९. मादकद्रवदुष्प्रभावात् राजनीतिकदुष्प्रभावात्
स्वार्थपरगुरु दुष्प्रभावात् कलुपिता विद्याव्यवस्था ॥

In Public domain. Digitization Muthulakshmi Research Academy

९०. मूलतोपि समाजमधुना शासकीयां दुर्व्यवस्थाम्
समय ऐषोऽभ्यागतस्संस्कर्तुमभिनव भारते ॥

९१. दुष्पटच्चरधारिणो निर्वसतयोऽध कदन्नदग्धाः
कोटिशो निवसन्ति मनुजा शासनं जिह्रेति नैव ॥

९२. दलितपीडितताडिता उत्थाय संघीभूय सम्प्रति
स्वाधिकारं समधिगन्तुं क्रान्तिहेतिभिराक्रमन्ते ॥

९३. उच्चवर्गीयं प्रशासनमद्य दीर्णं भवति शीर्णम्
निम्नवर्गाः शासनं स्वाधीनयितुमभियुञ्जते ते ॥

९४. उच्चनीचविभेदवैरं वर्गकलहं पक्षपातम्
अपनयन्त्यन्योन्य सौहृदममृतरसमभिवर्ष भद्रे! ॥

९५. कुलविवादो वर्गवादः प्रान्तवादोऽप्यस्तमेतु
अखन्डभारतराष्ट्र बहुसमृद्धिभिःप्रवर्धतां भुवि ॥

९६. विकृतचेष्टाविकृतलपितैः कन्यकासु स्त्रीषुबहुधा
अनुचितव्यवहारिणः पुरवीधि धूर्तान् शाधि कठिनम् ॥

९७. नोपहारोत्कोचकादेर्हिरुक् सिद्धयति किमपि कार्यम्
सर्वतोऽप्यामूलचूडं ह्यविनीतिरेव विजृम्भते ॥

९८. स्वस्वकार्यप्रेप्सयावा स्वस्वपदवीलिप्सया वा
स्तभ्नुवन्ति मुहुर्वियाता बन्धनैर्जनजीवनम् ॥

९९. स्वप्रयोजनलिप्सु वञ्चक राजनीतिक जालबद्धाः
भ्रष्टचरिताश्छात्रका निघ्नन्ति भावि सुजीवनम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१००. भाविपौरच्छात्रवर्ग सुशिक्षणात् प्रति हृत्सु तेषाम्
मृदुतमेषु वपन्ति गुरवः केऽपि विषबीजानि दुष्टाः ॥

१०१. विविधदलकुल वर्गमतबहुकलहविलय कृशानुकीलैः
दह्यमानं राष्ट्रमखिलं शान्तिसुधया जीवय त्वम् ॥

१०२. विष्टिसेवा कर्मकारान् क्षुत्पिपासा दग्धजठरान्
जीर्णकच्चरकर्पटान् धनिवञ्चितानुद्धर वराकान् ॥

१०३. राष्ट्रभङ्गं कर्तुमुद्यतमुग्रवादकबन्धहस्तम्
खण्डयित्वाऽखिलसमाजं रक्षितुं प्रोद्युंक्ष्व दुर्गे ।

१०४. दुश्चिकित्साकारिणो धनहारिणो जनकण्टकान्
सार्वजनिकजलाशयादेः कूटकर्तॄन् दण्डय त्वम् ॥

१०५. सङ्क्रमब्धजयष्टिविग्रह भेदकान् गृहदाहकान्
अप्रकाशं सुप्रकाशं द्रव्यहारिशठांश्च दण्डय ॥

१०६. राज्यशासन केन्द्रशासन कूटनीतिविशारदाः
कूटलौकिकवादिनोऽमी राष्ट्रभङ्गाय क्रमन्ते ॥

१०७. वृकसुपर्णातापिचटका द्वीपिकुक्कुरतुल्यवृत्ताः
जनसमाजे वर्तमाना राष्ट्रभङ्गाय क्रमन्ते ॥

१०८. अत्युदारो हिन्दुवादो नैव कस्मै द्रोग्धुमिच्छति
दुर्मतान्धा दुर्दलान्धा विद्विषन्ति भयेन हिन्दून् ॥

१०९. हिन्दूमन्दिरसम्प्रदाय प्रभृति संस्कृति धारणासु
कोऽनुसहते दुरपचारान् द्रोहिभिर्विहितांश्च मानी ॥

In Public domain. Digitization Muthulakshmi Research Academy

११०. भारतीयाभारतीयैर्भारतोन्नतसंस्कृते:
आदरेविधिना कृते मतकलह कीला न ज्वलेयु: ॥

१११. क्रीतमतकैश्चोरमतकैर्धूर्तधृष्टोपल्पवैरपि
मद्यकोशैर्वञ्चनाभि: कलुषितं निर्वाचनं हि ॥

११२. खेटपल्लीग्रामनिश्चनिरक्षराननपामरालिम्
धूर्तधृष्टा वञ्चयन्तश्शासनाधिकृता भवन्ति ॥

११३. द्यूतमद्यव्यसनसक्तान् साक्षरानपि राक्षसानिव
दुष्प्रवृत्तान् हिसंतस्स्वकुटुम्बमधमान् दण्डयैतान् ॥

११४. के तु मतमादर्तुमिच्छतिराहुमतमादर्तुमिच्छति
हिन्दुमतमादर्तुमीर्ष्यत्यहह कुहनासाम्यवादी ॥

११५. कुटिलकुहना साम्यवादपयोमुख गरलकुम्भम्
भेत्तुमखिला हिन्दवस्संभूय शतशो विक्रमन्ते॥

११६. हिन्दुदेशे हिन्दुसंस्कृति सम्प्रदायद्रुहमारितम्
कुटिलकुहनालोकवादं हिन्दवोऽमी प्रतिघटन्ते ॥

११७. अर्थनिष्ठा राजनिष्ठा: काम्यनिष्ठा वर्गनिष्ठा:
स्वार्थनिष्ठा एव सर्वेऽप्युदयमेति कथं नु राष्ट्रम् ॥

११८. कूटशासन कोविदानां कूटविक्रय पारगानाम्
कूटनीतिविशारादानां चलति राज्यं साम्प्रतम् भुवि ॥

११९. अत्युदारं हिन्दुवादं परशुघातैश्छेत्तुमुद्यत-
मवमकुहनालोकवादं प्रतिघटन्ते हिन्दवोऽमी ॥

In Public domain. Digitization Muthulakshmi Research Academy

१२०. हिन्दुवर्गेऽहिन्दुवर्गे द्विमुख नीत्या विषमदृष्ट्या
व्यवहरद्भिश्शासकैरुप्तानि विषबीजानि बहुधा ॥

१२१. तुल्यनीतिस्तुल्यदण्डस्तुल्यशिक्षा तुल्यरक्षा
समविकासस्समपुरोगतिरेव शान्तिं कल्पयन्ति ॥

१२२. साम्यवर्गसमाजकुलमल्लोकवादवगुण्ठितैः
जनसमाजं वञ्चयन्तो नायकास्स्वैरं चरन्ति ॥

१२३. विमतधूर्तक्रीतदासा मारणायुध धारिणस्ते
वर्गवादच्छदमनाऽमी राष्र्टभङ्गायक्रमन्ते ॥

१२४. भूमिकाभिर्बहुविधाभिर्निर्भयं चौराश्चरन्तः
अप्रकाशं सुप्रकाशं राष्ट्र सम्पदमपहरन्ति ॥

१२५. हिन्दुमतविद्रोहनिरता हिन्दुविद्विण्मतसहायाः
भ्रष्टधर्मा ओतुकामा राष्ट्रभङ्गाय क्रमन्ते ॥

१२६. अर्थलुब्धाः कामदासा धर्महानिं कुर्वते ये
धर्महानौ सर्वहानिर्भवति ते तु न जानते ॥

१२७. धर्म एव सुरक्षितव्यो रक्षितो जनमवति धर्भः
हन्तिधर्मो हतो राष्ट्रं धर्मनिष्ठं भवतु राष्ट्रम् ॥

१२८. ईतिकरकाध्वस्तसस्यं चक्रवृद्धिव्यथितचित्तम्
विषमखरकरकर्शितं क्षुत्क्षामबहुपरिवारमगीतम् ॥

१२९. मशकमुखकृमिकीटदष्टं सस्ययोगक्षेमकृतिषु
अनुभवन्तं क्लेशजातं बहुविधान्नोत्पत्तिनिरतम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१३०. पङ्कमलिनपटच्चरं मस्तिष्कन्तपातपबाधितम्
पश्यतोहृदयेन कस्य न दीर्यते कृषकं वराकम् ॥

१३१. हललवित्रखनित्रतोत्रप्रभृतिकृषिपरिकरविभूषाः
सकललोकक्षुदपनोदाः कृषककृषिदेवा जयन्तु ॥

१३२. फालतलसिन्दूरतिलका वेष्टनाञ्चितकर्णनासाः
अंशुकेना बद्धमध्याः काचकङ्कणकलितहस्ताः॥

१३३. पाणिनिहित सबीजपिठरा जानुलम्बितफालवसनाः
श्रान्ति शक्ति सजीवमर्त्य इव कृषीवलदेवता इव ॥

१३४. भर्तुभिस्सीतासु बीजावापकर्मणि सिद्धहस्ताः
कृषिकमहिला धर्मजाललवलालिताङ्गस्ताः जयन्तु

१३५. विविधहोमस्तोमधूमविधूत वातावरणकलुषाः
ज्ञानयज्ञव्रतधुरीणा श्रौतिनो विप्रा जयन्तु ॥

१३६. राष्ट्रजनताभ्युदयपरमार्थोपयुक्त द्रव्यनिधयः
अर्थशुचयोधर्मनिरता विविधवणिजोऽमी जयन्तु ॥

१३७. भारतीयं धर्ममवितुं विक्रमतेच्छात्रशक्तिः
राष्ट्रियं सर्वस्वमवितुं प्राणहविषा सा जुहोतु ॥

१३८. विविधकर्मसु कर्मठा अन्योन्य सहयोगर्धिभाजः
विविधवर्गस्स्नेहितास्सहजीवनं कुर्वन्त्वाबाधम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१३९. विविधविज्ञानानुसन्धानैकदीक्षा सफलयत्नाः
बहुपुरोगतिसाधका विज्ञान सिद्धास्ते जयन्तु ॥

१४०. शीतवातातपहिमानीवृष्टिबाधा सहनशीलाः
सीमरक्षाकर्मदक्षास्त्रिविधयोधास्ते जयन्तु

१४१. शत्रुसैनिक वह्निगुलिका वृष्टिमपि मत्वा तृणाय
असुपणेन च देशरक्षाः त्रिविधयोधास्ते जयन्तु ॥

१४२. एकसूत्रे मणिगणा इव एकवृन्ते कदलिका इव
विविधवृत्तिषु सुस्थितास्संभूय जीवन्तु सर्वे ॥

१४३. अर्यमेन्द्र समीरपावकशमनसोममहीव्रतेषु
सिद्धहस्तं शासनं भुवि सुप्रतिष्ठितमधिकुरुष्व ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

कल्याणकामः

१. स त्रिविष्टपलोक एवास्ति किंवाद्य
घोरगम्भीरावसाद सीमायिता
सर्वता निश्शब्द परिवेषरुषिता
वैयाकुलीं प्रकृतिरुपयाति सौवरी ॥ .

२. अमरावती सापि किं भवेत् कारणं
लक्ष्यते न क्वापि सम्मोद लेशोपि
तच्चनन्दनमेव नहि तत्र संशीति
रत्रापि गीत्टगपि न श्रूयते ध्वनिः॥

३. उर्वशीलासकी मञ्जुमञ्जीरमणि
शिञ्जिकातारतर घल् घलारावोपि
रम्भाप्सरोमणी चञ्चच्चमत्कार
किंकिणीकिण किणात्कारोऽपि नैवास्ति॥

४. उल्लसन्मेरवला झंकृति, प्रस्फुरत्,
कञ्चुकाबन्ध स्फिरोरोभवोन्नति
चलच्चेल चञ्चच्चमत्कृत्यहो क्वापि
युवति गणिका गणो युवभिर्न दृश्यते ॥

५. चर्चरी षट्पदी द्विपदिका खण्डिका
गीतिका भङ्गिका न क्वापि वर्तते
सम्पद्यते क्वापि नैव वीणाक्वणो
न च मृदङ्ग क्वाण मधुरिमा स्वाद्यते ॥

In Public domain. Digitization Muthulakshmi Research Academy

६. जय जय स्वाराण्णमुचि सूदनेन्द्रेति
वन्दिमागध जन स्तुत्यार्भटीनापि
चामरग्रहिणी सुन्दरी भामिनी
रत्न कंकण झण ज्झङ्कृतिर्नोच्चलति

७. अत्यशनिशतपात सञ्जातवेपथु-
स्सुरवीरपालिता सैवामरावती
अम्बुधावधीरिता नैकार्थ भासुरा
सुकवि संस्कृतमहाकवितेव लक्ष्यते ॥

८. यत्रावलोकिते यत्रावकर्णिते
तारकासुरकृता देवतादुःस्थितिः
कर्षकालौ धरास्वामि दुश्शास्तिरिव
विकटं करोत्यट्टहासं समन्ततः ॥

९. अमरस्य कस्यचिद् वदने न वीक्ष्यते
सम्मोदमन्थरा कापि जीवनकला
मूर्तीभवच्छोकदेवता भातीव
अमरावती भोगभूमिरपि साधुना ॥

१०. क्वापि कोणे हस्तविन्यन्यस्तवदनाब्ज
इन्द्रोऽपि कातरो व्याकुलव्याकुलः
मक्षिकापातेऽपि बिभ्यत् सहस्रेण
दृग्भिर्निरूपयन् दीर्घदीर्घं श्वसिति ॥

In Public domain. Digitization Muthulakshmi Research Academy

११. निर्भिन्नशत्रुरप्यैरावणोधुना
व्यञ्जयत्यवमानमास्यपाण्डिम्ना च
पुरुहूत सैन्धवः कम्पमान इवास्ति
दृश्यते वज्रमपि कुठितारमिवाद्य ॥

१२. अष्टदिक्पालकास्तेजस्विनोऽप्यद्य
निहतायुधा दुरवमानावसादिनः
तान्ततान्तानना दुर्दैवपीडिता
दीर्घदीर्घं किमप्येकत्र पश्यन्ति ॥

१३. भोग भाग्याञ्चितप्राज्य त्रिदशराज्य
महिषी कुरङ्गी दृगङ्गीकृताज्ञा
शचीनिर्जस्त्रीशिरेरत्नमप्यद्य
बाष्पाकुलेक्षणा दीनानना चास्ति ॥

१४. आह पुञ्जीभूय दीनदीनाननं
चिन्तयन्तं देवनिवहं बृहस्पतिः ॥

१५. ऊरीकुरुध्वमिह भोस्सुरा मद्वचः
श्रद्दधत निर्जराश्रद्दधत मे वचसि ॥

१६. भो इन्द्र भो ज्वलन भोकाल भोदनुज
भोवरूणा भो पवन भोधनद भो रुद्र ॥

१७. अवधेहि मद्वचसि श्रद्धेहि मद्वचसि
उत्साहपरिपन्थि दैन्यं विमुञ्च भो ॥

In Public domain. Digitization Muthulakshmi Research Academy

१८. नेदं सुरा धीरपुरुषस्य लक्ष्णं
नेदं बुधाश्शूरपुरुषस्य लक्षणम् ॥

१९. दण्डनीतेरिदं कर्म नो सम्मतं
राजनीतिज्ञाः प्रशंसन्ति नादोपि ॥

२०. दुष्टदानवकृतां बाधा मयत्नेन
भवन्तस्सहन्ते स्म कियतानु कालेन ॥

२१. आनने स्वयमेव सिंहस्य सुप्तस्य
किं निष्पतन्ति वा हरिणका भो वदत ॥

२२. भो स्सुरा वैक्लब्यमुत्सृजत सत्वरं
धीरतामधिगच्छतोद्यमे सज्ञत ॥

२३. ध्रुवमुद्यमेनैव सिध्यन्ति कार्याणि
जगत्यामयत्नकृत् कथमेति तत्फलम् ॥

२४. शात्रवश्चतुराननावन्द्य वरलब्ध
बलशक्तिसाहसैरुज्जृम्भतेऽधुना ॥

२५. तत्प्रतीकाराय मनसा समालोच्य
जेतुं महाद्विषं मध्य माबध्नीत ॥

२६. उत्तिष्ठताधुनैवोत्तिष्ठताधुना
चतुराननं शरणमुपयात सत्वरम् ॥

२७. अलमलं तुच्छेन विक्लवेनानेन
वर्तितेनामरा नयनमुन्मीलयत ॥

In Public domain. Digitization Muthulakshmi Research Academy

२८. भोभो शुनाशीर भो भो सुराधीश
प्रार्थयस्वामरैस्साकमब्जासनम्

२९. गीष्पतेः परमार्थपेशलं संवाद-
मवगम्य सुरपतिर्बोधितोऽभूत् तदा ॥

३०. निर्जरास्सर्वेऽपि चैतंन्यमुपगता
जागृतेर्जनकेन धिषणस्य वचनेन ॥

३१. विहिताञ्जलिस्त्रिदशपरिवृढस्सामरः
प्रार्थयामा सैवमात्मभूस्वामिनम् ॥

३२. जय जय स्वर्लोकरक्षैक दीक्षोऽद्य
दक्षीण दाक्षिण्य सर्वक्षमाध्यक्ष॥

३३. जयजयाखिल लोकनिर्माणचातुरी
माधुरीमधुरीकृतान्तरात्मन् ! प्रभो !

३४. जय जय सुरज्येष्ठ ! बंहिष्ठ ! साधिष्ठ !
संतत श्रुतिपाठपरिपूतवदनाब्ज! ॥

३५. जय जय ब्रह्मर्षिरिञ्छोलि संस्तूय-
मान ! प्रभो ! अमन्दानन्द सन्दोह ॥

३६. जय भारतीमुग्धवदनारविन्दमक-
रन्दरस निष्यन्द माधुरीहृतचित
पाहि नः पाहि नो ब्रह्मन् प्रसीदात्
दर्शनं देहि नो दयमानवीक्षण ॥

In Public domain. Digitization Muthulakshmi Research Academy

३७. हे धर्मरक्षैक दीक्षा निविष्टान्त-
रङ्ग प्रभो देहि दर्शनं तत्क्षणम्
इति गद्गद स्वरेणाक्रन्दतां तदा
सुमनसां दृग्गोचरो भवद् विश्वसृट् ॥

३८. नत्वा विरिञ्चि प्रसन्नेक्षणं देव
मायातमब्रुवन् त्रिदशास्सगद्गदम्

३९. क्रूरेण तारकेणामरद्वेषिणा
निष्पीड्यते देवजनता समस्तापि ॥

४०. भारतीप्रिय धर्ममूर्ते शुष्यति श्रुतिभारती
क्षीयते निजसंस्कृतिर्भुवनजातं खिद्यते ॥

४१. सकल सत्पुरुषावली बाधिता भवति प्रभो
मुनिगणो नुदिनं बिधे दूयते सुरविद्विषा ॥

४२. हतशतारस्तेन रज्यच्युतो देव-
राडसौ तापसं वेषं दधाराद्य॥

४३. निष्प्रभो जातोऽद्य वीतिहोत्रः प्रभो
निष्प्राणशक्तिरिव पवनोऽद्य वर्तते ॥

४४. कुण्ठीकृतोद्दण्ड दण्डायुधोऽभवत्
रिपु भीकरोऽप्ययं धर्मराजोऽधुना ॥

४५. यक्षराडेषोऽपि लुण्ठितद्रविणकः
पदविच्युतिं देव प्रापितो विद्विषा ॥

In Public domain. Digitization Muthulakshmi Research Academy

४६. ईशानदेवश्च पाशायुधस्तथा
पदविच्युतिं देव प्रापितौ विद्विषा ॥

४७. आज्ञां विना तस्य दितिजस्य चतुरास्य
तृणमपि स्पन्दितुं लोके न शक्नोति ॥

४८. सौवदारात्मजान् स्थानानि चोत्सृज्य
प्राणावनायात् देवाः पलायन्त ॥

४९. तारकासुरराज कैतवोपद्रवं
सोढुं न शक्नुमस्सोढुं न शक्नुमः॥

५०. तारकासुरमारणोपयमात्मभू-
रस्मानमोघबलमनुकम्पया ब्रूहि ॥

५१. प्रार्थितस्स विरिञ्चिरेवं जगाद तान्
तारकेणार्दिता निन्दादि निर्जरान् ॥

५२. कष्टसाध्यं महाकष्टसाध्यं सुरा-
स्तारकासुरराजमारणं विश्वसित ॥

५३. केनापि वीरेण सोऽयं न हन्यते
शक्तिमान् तादृगापि दृश्यते नास्मासु ॥

५४. अस्त्युपायोऽथापि तस्य प्रमापणे
स च दुष्करोपीह कथ्यते श्रूयताम् ॥

५५. शिववीर्यजातेन भाविना स गुहेन
हन्येत नहि तत्र सन्देहगन्धोऽस्ति ॥

In Public domain. Digitization Muthulakshmi Research Academy

५६. किन्त्वद्य शङ्करस्संसारनिस्पृहः
जायावियोगादिवाप्तवान् मुनिकर्म ॥

५७. स सतीवियोग निर्लूनविषयाङ्कुरः
क्षणिकं जगन्मन्यमान इव तप्यते ॥

५८. नैव खादति किमपि नो पिबति पाथोऽपि
नैव पश्यति किमपि नैव जिघ्रति किमपि ॥

५९. अक्षिणी तु निमील्य साक्षिभास्यान्येव
वीक्षते किल सोऽयमक्षीणयोगेन ॥

६०. स समाधिनिर्मग्नचित्त एवानन्द-
माप्नुवान एवानुमोमुदीति कदापि॥

६१. ब्रह्माण्डनिर्भेदि चिटपटारावोऽपि
किञ्चिदपि दूषयति न समाधिमीशस्य ॥

६२. रति सुन्दरीरुपतलतलात्कारोपि
हन्नेतुमीशस्य विकृतिं न शक्नोति ॥

६३. एवं तपोविजितविश्वस्य भर्गस्य
कुर्यात्तपोभङ्गमिह को जिजीविषुः ॥

६४. अत्रागतेषु वै युष्मासु कश्चिदपि
मोहयितुमीश्वरं नैव शक्नोति भो ॥

६५. अमरकिन्नरयक्ष राक्षसप्रमुखेषु
मन्मथादन्तरा कोऽपि नेदं क्रियात् ॥

In Public domain. Digitization Muthulakshmi Research Academy

६६. स मरिष्यमाणमपि जीर्णमपि शीर्णमपि
स्त्रैण द्विषं वापि सद्यो विमोहयति ॥

६७. यन्महिम्ना ह्ययं संसार भूरुहः
पल्लवति कोरकति कुसमति च फलति च ॥

७०. प्राकृतिकसुख-दुःखभाग्यदौर्भाग्यादि
तदधीनमिति मिनुत तदधीनमिति मिनुत ॥

७१. तस्मात्तमेवाढ्यमुपगम्य याचत
तुष्टेन मदनेन साध्यते तद् ध्रुवम्॥

७२. गच्छन्तु मन्मथं शरणं त्वमेवेति
याचन्तु निर्जरा इष्टसिद्धिर्भवतु ॥

७३. इति हंसवाहनश्चतुराननस्तदा
कर्तव्यमुपदिश्य लिल्ये यथापुरम् ॥

७४. परमेष्ठिनाऽऽश्वाासितान्तरङ्गास्तदा
इन्द्रादयो हरित्परिपालका मुदा ॥

७५. विनिवर्त्य निर्जरान् स्वावासमाशु ते
मीन केतनमेव शरणं ययुस्ततः॥

७६. दिव्यगोपुर राजि विभ्राजमानं सु-
वर्ण नानावर्ण चित्रात्तभित्तिकम् ॥

७७. मन्दारमाकन्दकुन्दार विन्दादि
सुममालिकावलीलालितोपान्तकम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

७८. चित्रातिचित्रपटवासादिसौरभ्य
सुरभीकृतप्रान्तमुज्ज्वलप्राङ्गणम् ॥

७९. शुकशारिकाकोकिलालि हंसावली
कलतारकाकलीकल कलोदञ्चितम् ॥

८०. शिञ्जिका झणझणन्मञ्जीरघलघलत्
किङ्किणी किणकिणन्निक्वाण निचुलितम् ॥

८१. भूमिकासप्तकोद्दाममुद्धामाभि -
रामं सुरा मन्मथावासमाप्नुवन् ॥

८२. कोटिशारदकौमुदीभासुराकृतिं
कोटिशारद कौमुदीनाथ सन्निभम्

८३. अन्योन्यलासिनौ सुन्दरीसुन्दरौ
अद्राक्षुरुज्वलौ रतिमन्मथौ तत्र ॥

८४. आगतान् दूरतो निर्जरान् मदनोपि
अवलोक्य अभिगम्य व्याहरत्स्वागतम् ॥

८५. आस्यतान्दिक्पालका अत्र आस्यताम्
किं स्वस्ति को हेतुरागतावत्र वः॥

८६. एवं ब्रुवाणं तमिन्द्रोऽवदद् वीर
यदि दीयतेऽभयं वचनं वदामि ते ॥

८७. सत्यं ददामि भो, सत्यं ददामि भो
सिद्धिं करिष्यामि शक्त्यतीतामपि ॥

In Public domain. Digitization Muthulakshmi Research Academy

८८. मित्रोपमितमहः तातोपमितशौर्य
आभिजात्योचिततूक्तं त्वया शूर ॥

८९. षाड्गुण्य सम्पतिरस्तित्वयीत्येव
अस्माभिरागतं शरणं च याचितम् ॥

९०. तारकोपद्रवो दिनदिनं वर्धते
लोकस्य दीनता वक्तुं न शक्यते ॥

९१. निष्कासिताश्शूरराज्यपीठाद्वयं
कुण्ठिताजीवका जीवच्छवीकृताः॥

९२. अन्ये सुराघोरतारकात्त्रस्ताश्च
कान्दिशीका गता पर्वतारण्यानि ॥

९३. जेतुं न शक्नोति कोऽपि तं निर्जरः
शिववीर्य जाततस्तन्मृतिस्सम्भवति ॥

९४. इति वरं ब्रह्मणा दत्तमस्मै तेन
निर्भीक मानसः स्वैरं स विहरते ॥

९५. परमेश्वरोधुना विगलितैहिकधीः
एकाग्रमानसो घोरं तपस्तपति ॥

९६. निर्जिताखिललोक तस्मात्वयैवाद्य
उत्पादनीयः हृदि तस्य मोहः॥

९७. कर्तुमिदमस्मासु कोपि न प्रभवति
स्थातुमपि शक्नोति पुरतो न वा तस्य ॥

In Public domain. Digitization Muthulakshmi Research Academy

९८. श्रीमन् जगन्मोहनाकार साध्यते
नियतं त्वयैवेशसम्मोहनं ध्रुवम् ।।

९९. चतुराननेनापि एवमेवोदितं
अन्तरात्मापि नस्तथ्यमिति संवदति ।।

१००. विश्वाकल्याणाय नारायणात्मज
सम्मोहयेश्वरं साधय स्वेप्सितम् ।।

१०१. इति शक्रभाषिते सम्पूर्तिमगते हि
विलयकालाभीलपर्जन्यगर्जितात् ।।

१०२. त्रस्ता कुरङ्गीव वेषमानाकृतिः
रुद्धकण्ठा तदनु रतिरवोचत्प्रियम् ।।

१०३. माङ्गीकुरुप्रभो माङ्गीकुरु प्रभो
सुमकोमलाकर साहसं माकुरू ।।

१०४. मृत्युनैव प्रतिस्पर्धिना घोर विष
भक्षिणा सन्तताशीविषक्रीडिना ।।

१०५. नित्यश्मशानैकवासिना क्रूरेण
निटलतटदावाग्निभासिना शूलिना ।।

१०६. स्पर्धाऽनुखेलनं नोचितं तव नाथ
सुमकोमलाकार अत्याहितं भवेत् ।।

१०७. रौद्ररससेवधिः धृतशूलपाणिः क्व
शृङ्गारसन्निधिः सुमशरस्त्वम् क्व वा ।।

In Public domain. Digitization Muthulakshmi Research Academy

१०८. स स्वभावत एव रौद्रमयामानसः
तत्रापि घोरेण तपसा समुज्ज्वलति ॥

१०९. एकतो भुवनत्रयीजयो हृदयेश
एकतश्चेशान विजय इति विश्वसिहि॥

११०. अन्येषु शूरेषु सम्पद्यमानेषु
त्वत्प्रार्थना किमु सुराधीश्वारोचिता ॥

१११. स्मर एव शक्त इति चतुराननोक्तिमपि
सूक्ष्मया सम्विदा अनुचिन्तयात्मानि ॥

११२. येन केनापि वोपायेन रुचिराङ्ग
ज्ञाति वैरस्यैव निर्यातनायाद्य ॥

११३. तव सोदरेण परमेष्ठिना कुत्सितं
कर्मेदमाकल्पितं भवेत् ऋतमिदम्॥

११४. किमपि वा भवतु भो हृदयेश न त्वया
साहसं तत्कर्म कर्तव्यमादरात् ॥

११५. विहिताञ्जलिं तां निवारयन्ती रतिं
अनुनयन् सस्मितं मन्मथो निजगाद ॥

११६. भवदूहितो देवि तादृगर्थो नास्ति
देवतायाचिते चतुराननोदिते ॥

इति प्रथम उच्छवासः

In Public domain. Digitization Muthulakshmi Research Academy

११७. विश्वाकल्याणार्थमेवाहमुद्यतः
कल्याणि गर्वेण सन्नह्यते नात्र ॥

११८. इन्द्रादये देवि अभयदानं कृतं
अविगणय्याप्यसून् साधयिष्यामि तत् ॥

११९. शिवतपोभङ्गस्तु नोचितो यद्यपि
आवश्यकत्वेन कर्तुं तमिच्छामि ॥

१२०. अहमवश्यं देवि साधयिष्यामि तत्
मा कृथा मानसे अनुचितं त्वं भयम् ॥

१२१. प्राणान् विहायापि देवताभीप्सितम्
दुस्साधमपि साधु पूरयिष्याम्यहम् ॥

१२२. प्राणान् विहायापि देवताभीप्सितम्
दुस्साधमपि साधु पूरयिष्याम्यहम् ॥

१२३. प्राणान् परित्यक्तुमुत्सहे कर्तुमपि
न तु सत्यवाग्भङ्गमुत्सहे कर्तुमथ ॥

१२४ अनुपहत यत्नोहमचिरेण तं च्युतम्
कृत्वा गिरिसुतानुरक्तं करिष्यामि ॥

१२५. इदमेव मे व्रतम् एष मे नियमोऽपि
रोद्धुं न मां कोऽपि शक्नुयादमुष्मात् ॥

१२६. शङ्करो भवतु तज्जनयिता वा भवतु
सम्मोहनास्त्रं विजेतुं न शक्नोति ॥

In Public domain. Digitization Muthulakshmi Research Academy

१२७. नेदं महासाध्वि वीराङ्गनोचितम्
नेदं च शूरसति प्राज्ञानुशीलनम् ॥

१२८. दैवसाहाय्येन शितिकण्ठमुग्रमपि
जेष्यामि यदि कीर्तिरागमिष्यत्येव ॥

१२९. यदि मरिष्यामि वा त्वत्पतेश्चरितं तु
स्वर्णक्षरैरेव लेखिष्यते जगति ॥

१३०. शम्भुसम्मोहनं यद्वा भविष्यति
देवताभीप्सितं यद्वापि सेत्स्यति ॥

१३१. एतेन भवितव्यमिदमेव वाञ्छितम्
सौभग्यवतिमाविचिन्तयस्वेषदपि ॥

१३२. सर्वेश्वारामोघ करुणाकटाक्षेण
दिग्जयो भवतु नः तृप्यन्तु दिविषदः ॥

१३३. एतदनुयाचनं एतदनुशासनं
तवभर्तुरादरात् कल्याणि पालय ॥

१३४. इति मन्मथोदार गग्भीर वचनेन
अन्तर्भयापि सा कथमप्यनुमता च ॥

१३५. लोककल्याणार्थमुद्यताय प्रभो
स्वस्त्यस्तु विजयोऽस्तु तुभ्यमित्यब्रवीत् ॥

१३६. जय जय त्रैलोक्यरक्षैकदाक्षिण्य
सङ्क्षुब्धमादृक्षतापवारणदीक्ष ॥

In Public domain. Digitization Muthulakshmi Research Academy

१३७. स्वस्त्यस्तु विजयोऽस्तु तुभ्यमित्याशिषं
कृत्वा हरित्पालका निर्गतास्तदा ।।

१३८. ईशानसम्मोहनैकतानस्तदनु
शम्बरारिः श्वसनमेवं समादिशत् ।।

१३९. मलयमारुतवीर जैत्रप्रयाणाय
आयत्तसाधनं कुरु सैन्यमद्येति ।।

१४०. जेतुं महेशानमुज्ज्वलालङ्कृतिः
सन्नद्धपरिकरो मदनोऽप्यभूत्ततः।।

१४१. तत्र तुहिनद्रिजा वर्णिनमुपासितुं
ईश्वारीयाश्रमं मन्दिरात् प्रस्थिता ।।

१४२. सेयमेवगजा सागजैवैषका
प्रकृतिरिव पुरुषस्य सन्निधिं प्रतियाति ।।

१४३. निष्पादयति पादयुगली यदीया च
सञ्चरल्ललितारुणारविन्दभ्रमा ।।

१४४. चलञ्चेलाञ्चलो भात्युरुरसमेषु
जयकाञ्चनस्तम्भ इव पताकाञ्चिता ।।

१४५. मीनकेतन भुजा बिरुदालिफलकमिव
सुन्दरं यस्या नितम्बबिम्वं भाति ।।

१४६. तारुण्य परिपुष्ट पीनस्तनद्वया
यस्त इव मध्योतितनुरिवोद्भासते ।।

In Public domain. Digitization Muthulakshmi Research Academy

१४७. मेखला मणिरुचे रोमतिमिरावली
त्रस्ता प्रविष्टेव नाभिगिरिगह्वरम् ॥

१४८. नाभितस्तनसौधमधिरोढुमुज्ज्वला
रोमावली रूपमदनकारुमणेः
सोपानपङ्क्तरिव त्रिवली विभासते ॥

१४९. तारूण्यतरुवरं लावण्यसलिलेन
सेक्तुं झषाङ्केन कल्पितं कलशयुग-
मिवभाति कुचयुगम् ॥

१५०. उपरिपीनपयोधरापातिता शम्भु
विजिगीषया मदनराजेन विरचिता
पटकुटीवाभाति कञ्चुकी मृगदृशः ॥

१५१. आरूण्य मार्दव स्मयमान बिस किसल
दूषीव यद्बाहुलतिका युगं लसति ॥

१५२. रूप पारावार सञ्जानिर्मदनस्य
जय शंख इव भाति बन्धुरा कन्धरा ॥

१५३. अरविन्द चन्दिरावाननं हसतीव
नासिका तिलसूनमभिवन्तीवास्ति ॥

१५४. अधरोष्ठमभिभवति बिम्बं प्रवालं च
दशनालिरुपहसति कुन्देन्दुगौरवम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१५५. ईशान विजयाय निर्मितं नूतनं
नाराचयुग्ममिव भाति नेत्रद्वयम् ॥

१५६. भ्रूलते जनयतस्स्मरचापविभ्रमं
शष्कुली धिक्कृतिं श्रुतियुगं वितनेति ॥

१५७. जेतुं महेश्वरं विजयिना मदनेन
भ्रूलताचापसंयोजिता भल्लीव
कस्तूरि रेखा ललाटे विराजते ॥

१५८. कल्हार भासुरं केशजातं भाति
रक्तार्द्र शरपूर्ण कामतूणीरमिव ॥

१५९. शिवतर्जनाय वै मीकेतुकशेव
कचपङ्क्तिरुल्लसति पृष्टावलम्बिनी ॥

१६०. धगधगायमान तलतलायमान
निरवद्यरूपेण क्षणभङ्गुरां तटि-
ल्लतिकां हसन्तीव कनति यत्तनुलता ॥

१६१. कलहंस पिपठिषां गमनविद्याशिक्ष-
णायैव सायाति परमेश्वराश्रमम् ॥

१६२. त्रिपूरारिविजयाय मूर्ता मदनमोह
शक्तिरिव यान्ती विराजते सागजा ॥

१६३. आयुधाधानाय मन्मथस्येव सा
सुमकरण्डकमादधाना प्रयाति तम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१६४. तपसातिधीरेण दाक्षायणी नून-
माविर्भवन्तीव सा तत्र राजते
एकाग्रतामग्नशिवरूप पीयूष-
पानसक्तेव सानिष्पन्दमास्थिता ॥

१६५. मन्मथो निजसैन्य संयुतस्तदैव
सुरभिसुरभीकृतं तद्वनं प्राविशत् ॥

१६६. प्रचीनवाजि परिवर्तनायेव रवि-
रुत्तरस्यां दिशि प्रस्थितःशुनकैः ॥

१६७. मधुशिल्पिनिर्मितं वनदेवतागृहं
द्रष्टुकामो रवी रथवरम्मन्थरं
कृतवानिवाभाति ॥

१६८. वनेवतानाट्य रङ्ग इव भासते
मधुशिल्पिचित्रितः काननोपान्तोऽपि
तरुजनास्सर्वत्र विकिरन्ति कुसुमानि
आगतं परितश्च मधुराजशेखरम् ॥

१६९. पत्रचेलाञ्चलच्छन्नगुच्छस्तना
अरुणकोमल पल्लवाधरोष्ठश्रियः
वल्लरीकामिनीर्नम्रशाखाकरैः
परिरभन्तेऽनोकहाभीक तल्लजाः ॥

In Public domain. Digitization Muthulakshmi Research Academy

१७०. सुमश्रृङ्गजालकैः मकरन्दशम्बरं
आदाय वनभूमिकामिनीवदनानि
अलस वातकरेण स वसन्त कामुकः
सिञ्चन् यथेच्छं समुत्सुकः क्रीडति ॥

१७१. शुक शारिका हंस कूजितव्याजेन
सामन्तमाधवो जयजीवगीतिभिः
स्वागतं मदनाय व्याहरन्नवकुसुम-
फलरूप करनिकरमर्पयन्निव भाति ॥

१७२. मलयमारूत विटो मधुकामिटत्तानि
परिमलद्रव्याणि चार्पयति वनभुवि ॥

१७३. सहकार बन्धिता विकसिता माधवी
कुसुमस्मिता भाति स्वाधीनपतिकेव ॥

१७४. कुसुमभूषितमन्दिरात्मा वनस्थली
मधुवल्लभागमे भाति वासक-
सज्जिका नायिकेव सा ॥

१७५. पिक कुहू काहली ध्वानेषु परिजृम्भ-
माणेषु पथिकहृद्दलनकरवाल प्र-
बाल प्रसूनालि धनुरादिनोज्ज्वलः
शुकसप्तिमारुहन् स्मरराड्डुपागमत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१७६. मलयमारूत सैन्यनायको वाहिनी
व्यूहञ्च निर्ममौ शर्वाश्रमे तदा ॥

१७७. कोटिभास्करतुल्यतेजसं शान्तैक-
मूर्तिं दधानं विराजितं संविदा
तेजसा काननं परिभासयन्तं प्र-
शान्तिं वदन्तमिव अकलात्मनामपि ॥

१७८. पद्मासनस्थं सुपद्ममुद्राञ्चितं
दाक्षायणीध्यानयोगसंसक्तमिव
सत्समाधौ लीनमानसं ते शिवं
विजिगीषुरसमेषुरुद्यतो दृष्टवान् ॥

१७९. मौन क्रियायोग परिभासमानस्य
गिरिशस्य सुध्यान भञ्जनं नोचितम् ॥

१८०. इन्द्रादिदेवताभीप्सितोपेक्षापि
नोचिता मम चेह कतरदवलम्बेय ॥

१८१. येन निखिललोककल्याणसिद्धिस्तु
सम्भवेत् करवाणि तत्प्रयोजनमेव ॥

१८२. अलमलं स्वार्थस्य चिन्तया किन्तया
किमपि वा भवतु मे प्रथममेवाश्रये ॥

In Public domain. Digitization Muthulakshmi Research Academy

१८३. इत्येव निर्णीय समभियोद्धं शिवं
तत्पुरीयायिनो मन्मथस्योपरि
इन्द्रादयो निखिलदेवता पुष्पाणि
जय जीवगीतिभिस्सम्मुदा वाकिरन् ॥

१८४. सञ्जगुः किन्नरी किन्नरास्सम्मुदा
नृत्यमातेनिरे सुरवारयोषितः॥

१८५. डमडमड्डिण्डिमानकदुदुभिध्वनिः
ब्रह्माण्डमुद्भेदयन्निव प्रोदभूत्

१८६. तौ मिथस्पर्थिनौ शृंगारशान्तौ च
मूर्तिमन्ताविव स्मरचन्द्रशेखरौ
आश्रमे रेजिरे स्तिमितगम्भीरे च ॥

१८७. सेनार्भटी षदपि नैकाग्रवर्तिनं
चलयितुं शंकरं प्रबभुव किञ्चिदपि ॥

१८८. क्रुद्धस्तदा मीनकेतनो मौनिनं
विव्यधे तीक्ष्णेन मोहनेन शरेण ॥

१८९. चालितां तत्तनुं शोषणादिभिरस्त्र-
जालकैर्विव्यधे सकृदेव स च दृढम् ॥

१९०. स्मरघोर नाराच हतिजात सुध्यान
भङ्गस्स शंकरः क्रोधताम्रेक्षणः॥

In Public domain. Digitization Muthulakshmi Research Academy

१९१. विस्फोरयामास कल्पानलाभील
कीलाजटालाग्निविस्फुलिङ्गेक्षणम् ॥

१९२. हे प्रभो हे प्रभो संहर क्रोधमिति
यावत् सुराः प्रार्थनागिरं व्याहरन् ॥

१९३. तावच्चटच्चटन्निटलजोच्चिङ्ग्ट-
ज्वलनश्चकार तं भस्मावशोषिणम्

१९४. प्लुष्टं स्वभर्तारमवलोक्य सा रति
श्शोकाग्निदग्धेव सम्मूर्च्छिताऽपतत् ॥

१९५. मदनस्य तनुमेव दग्धुं शशाक सः
शक्तिं शाक न च तस्य सम्मोहिनीम् ॥

१९६. वेपमानां तटिद्वल्लरीमिव नतां
पार्श्वस्थितां शिवस्तामुमां दृष्टवान्

१९७. पार्वतीसौन्दर्यपीयूषधारया
शमितकोपानलश्शर्वोऽभवत् तदा ॥

१९८. ईशानमानसे प्रतिबिम्बिता शिवा
पार्वतीमानसे प्रतिबिम्बितश्शिवः॥

१९९. भावानुबन्धश्च कोऽपि तौ तत्क्षणं
व्याकरोदाविश्य तन्मयीभावनाम्
साधु साधु मार जगदेकसुकुमार
नस्त्वया भुवनैकवीरोपकृतमद्य ॥

In Public domain. Digitization Muthulakshmi Research Academy

२००. विश्वाकल्याणार्थमात्मबलिदानमपि
कृत्वा नयस्सौरचारितं नवीनताम् ॥

२०१. विश्वाविनुतचरित्र कोटिवर्षेष्वपि
तव ऋणं निर्जरा निर्यातयेयु र्न ॥

२०२. अविजेयशक्तिबल जेगीयमानगुण
साधितं वाञ्छितं धन्यीकृता वयम्

२०३. निर्जरा मन्मथं चानङ्गमभिनन्द्य
सप्रश्रयं शिवं प्रत्येवमब्रुवन् ॥

२०४. विश्वाकल्याणय ते तपोभङ्गस्स-
कर्तुं शिवागम्य दग्धोऽभवत् त्वया॥

२०५. न जिगीषयागतं न जिगीषयागतम्
कल्याणदृष्ट्यैव तेनेदमुत्कृतम् ॥

२०६. इय मेव सा सती, इयता हि कालेन
या मुमामधिकृत्य ध्यायसि प्रतिदिनम् ॥

२०७. एवं ब्रुवाणेषु तत्साहसोदन्त-
मिन्द्रादि देवेषु शङ्करे श्रृण्वति ॥

२०८. निर्जरीकृतशीतपरिचर्यया रतिः
कोलाहलेन वा लब्धसंज्ञा सती
आम्लानतनुलता अवलम्ब विरहिता
उपचीयमानाश्रुलोचना विललाप ॥

In Public domain. Digitization Muthulakshmi Research Academy

२०९. हा पते हानाथ जगदेकसुकुमार
जगदेकवीर हा प्रकृतिसौन्दर्यद-
देहिमे प्रतिवचस्सत्वरं पश्य मां
शरणहीनां देव निजवास मुन्नय ॥

२१०. घोरान्धकारैकबन्धुरं जीवितं
धारयितुमिह नाथ नैव शक्नोम्यहम् ॥

२११. प्रकृति रामामणेर्लावण्यमेवेह
सुषमाविहीनमिव दृग्गोचरीभवति ॥

२१२. स्वार्थपरिपूरिते मायाविवञ्चिते
अस्मिन् त्रिविष्टपे श्रमजीविदुःखदे ॥

२१३. त्वां विना शक्नोमि न हि धारयितुमार्य-
दुःखमयजीवितं क्षणमपि प्राणेश
प्राणान् विहायाहमधिगन्तुमिच्छामि
त्वत्सन्निधिं प्राणनाथाहमद्यैव ॥

२१४. इति विरुदतीमिमां मरणोद्यतां रतिं
पार्वती करूणाद्रमानसा बाष्पाम्बु
मोचमाना प्रियं स्वविलग्नचेतसं
तरूणेन्दुशेखरं व्यालोकयामास ॥

२१५. पार्वतीदुःखेन चकितचकिताकुल
स्वान्तोऽनुतप्त इव शङ्करो रतिमाह ॥

In Public domain. Digitization Muthulakshmi Research Academy

२१६. मासाहसं साध्वि कुरु ते प्रसन्नोऽस्मि
याचस्व वरमहं यच्छामि भामिनि ॥

२१७. यदि सुप्रसन्नोऽसि मत्पतिं शिवदेव
कुरु पुनर्जीविनं स्वाश्रितावननिरत ॥

२१८. हे कृपाजलनिधे दीनरक्षामणे
उज्जीव्य मत्प्रियं मां सनाथां कुरु ॥

२१९. अति शोक भारावरूद्ध कण्ठीमिमां
रतिमुवाद प्रसन्नाननश्शङ्करः॥

२२०. मदनसुन्दरि साध्वि दृङ्मात्रगोचर-
स्स्यात् यथा तव पतिस्सच तथा दीयते ॥

२२१. ईश्वरामोघवाङ्महिमतो रतिपती-
रतिमात्रगोचरः पुनरजीवत्तदा ॥

२२२. वनसुन्दरीव मधुदेवपुनरागमे
नूत्नशोभावती कुसुमस्मिता बभो
स्वपतिपुनरागमे रतिसुन्दरी सापि ॥

२२३. वनदेवतां तदा द्विजकूजितमिषेण
भूतेशनिग्रहनुग्रहा प्रावाण्य
गाधाप्रशस्तिकां सञ्जगौ सम्मुदा

२२४. सम्फुल्ललोचना प्रमुदिता पार्वती
साकूतवीक्षणं प्रासारयत् प्रिये ॥

In Public domain. Digitization Muthulakshmi Research Academy

२२५. सोऽपि तां तथैव वीक्षाञ्चकार तौ
रतिमन्मथौ तथैवा पश्यतां च तौ ॥

२२६. तत्रत्यसन्निवेशो दुष्कृतां हृदय-
शूलकृत् सत्कृतां मोदकृच्चाभवत् ॥

जय जय महादेव ! जय जय प्रद्युम्न !
जय जयोमाप्रीत ! जय जय रति प्रीत !

एवं स्तुवन् देवनिवहस्तदुपरि सं-
मोदमानस्सूनवर्षं ववर्ष च ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

कविसूक्तम्

अयि कवे जानाति को नाम नामानि
प्रतिकलं भिन्नानि तव रूपधेयानि
के नाम न पतन्ति भ्रान्ता वचोमयेन्द्र
जाले विमोहैकमन्दिरे तावके
मन्दं पदन्यासमाविष्करोषि समु
दीक्षसे परितोऽपि शब्दमाकर्षसि
बहुविधालंकारनिवहमाकांक्षसि
प्रत्यग्रनैकार्थ निचयं सुवर्णं च
धत्से रसान्तरस्थित भावजातमपि
दोषैकदृष्टि रसि चोरवन्ननु कवे ।
क्वापि देवोऽस्तीति युक्त्या निरूपयसि
अन्यतो नास्तीति तत्स्थितिं दूषयसि
प्रत्यक्षदृष्टमपि नास्तीति भाषसे
इदमिदं वस्त्विति ब्रूषे परोक्षमपि
एकतो हिंसाप्रवृत्तिमुद्बोधयसि
अन्यतो हाहन्तकारेण शोचसि
कण्टका लुण्टका हिंसका व्यसंका
आदर्शपुरुषन्ति कलमेव तव कवे

In Public domain. Digitization Muthulakshmi Research Academy

एकतस्साम्यवादाटोप कवितया
लोकं प्रलोभयन् जीवितं गमयसि

अन्यतस्साम्राज्यवादोपबृंहितै-
स्सूक्तैः प्रतारयसि शालीनमानसान्

एकतो राजकविरन्यतोऽसि प्रजा-
कवि राजिकविरसि प्रायोजकविरसि

क्रान्तिकवि शान्तिकवि भावकवि हावकवि
भुक्तकवि मुक्तिकव्यादिमैर्नामभिः

अन्तर्बहिर्भिन्न भिन्न प्रवृत्तिभिः
बहुभूमिकाधारमप्यतिक्रामसि

अर्थकामावेव अभ्यर्हिताविति
चिन्तयसि मेधावितिलकोऽसि यद्यपि

अमृतायते वचसि कामिनीलालापि
दुर्वासितं दुष्टमुखमम्बुजायते

रावणा रामन्ति रामा दशास्यन्ति
सीतान्ति ते वचसि वारङ्गना अपि

कतिपया नाभासवादानुपस्थाप्य
श्लाघितस्वोद्यमो हूहूसमूहेन

मुग्धानमायिकानुद्रेकिणोलसान्
लोभयन् वञ्चयन् स्वार्थं प्रपूरयसि

In Public domain. Digitization Muthulakshmi Research Academy

प्राज्यकविमात्मानमेकतः प्रकटयन्
अविदितातपतापलेशस्सुखान्येषि

छात्रहृदयान्तरे दुष्टा निकृष्टा नि-
लीनाः प्रसुप्ता बलान्मूलवृत्तीश्च

उद्रेचयसि दुष्टभावानुगुणवाद-
मेदुराक्रोशमय मोहमय गीतिभिः

नियत जीवन सरणिरात्मसुख हाहिणी
यदि तदा साऽधुना नार्हेति निन्दसि

आत्मभोगास्पदं यद् यद् भवेन्निन्द्य-
मप्युपादेयमिति युक्त्या समर्थयसि

मूढगीतं किमपि कवयसे ननु कवे
गूढवादं बलात् स्पन्दयितुमीहसे

आदर्शवाद इति जनसाम्यवाद इति
निजसहजवाद इति अधिसहजवाद इति

केवलानर्थकैः कामवादैरेव
मोहयन् वञ्चयसि युवसमाजं कवे ।

कतिपयैश्शब्दमयराक्षसैः प्रेरितै-
श्शालीनचेतांसि बाधयन् गल्भसे

आवेशभूतावलीढ इव वितनोषि
असम्बद्धप्रलापापलापान्तराण्यपि

In Public domain. Digitization Muthulakshmi Research Academy

कामिनीलम्पटो व्याहरस्येकमपि
काञ्चनग्रस्तेन चेतसाऽन्यल्लपसि

मधुमत्तचित्तेन यत् किमपि जल्पसि
व्याक्रोशसे तदा मधु यदा नाप्नोषि

व्यक्ति रेवाग्रणीरित्येकतो वदसि
सत्यं समाज इति व्यक्तिं विदूषयसि

कुलवर्ग भेदादिमेकतो निन्दंश्च
श्रमजीविमतिजीविकुलगणान् कल्पयसि ।।

.....

In Public domain. Digitization Muthulakshmi Research Academy

कौलेयसूक्तम्

अयि वीर शत्रुघ्नकार्यीभिलाषुकः
यो नाम नृपसभाद्वारे प्रतीक्षते
तस्याभियोगं विदित्वा समायाहि
सत्वरं याहीति रामस्तमादिशत्

शिरसा धृतादोशसुममालिकस्सोय-
मभितोपि नृपसभाद्वारं परीक्ष्य सः
अज्ञातकार्यार्थिगन्धः परावर्त्य
श्रीराममब्रवीत् धर्मावतारस्य

भवतः कथं नाम राज्येभियोगस्य
वार्ता भवेद्राम वार्ता भवेद् देव
त्वमपि लक्ष्मण सभाद्वरदेश स्थितं
कार्यार्थिनं दीन मन्तः प्रवेशय

आज्ञापयत् तदनु तं रामभूपतिः
परितो दृशं किरन् कार्यार्थिनं कमपि
लक्ष्मणो ज्ञासीत् न गोपुरं यातोपि
निजगाद स निवर्त्य नरपालकुलमणिम्

धर्मावतारस्य भगवतस्तव देव
राज्योभियोगस्य वार्ता कथं भवति

In Public domain. Digitization Muthulakshmi Research Academy

विस्मेरवदनेषु सभ्येषु सर्वेषु
पुरतः स्थितं भरतमवनिपो निजगाद

को नाम दीनानो राजदर्शिनं
काङ्क्षन् प्रतीक्षते द्वार देशे स्थितः

सानुकम्पं दीनमादाय कार्यिणं
भरत त्वमायाहि भरत त्वमायाहि

रामस्य शासनं शिरसि कृत्वा सोऽपि
द्वार देशं गतो नृपसभाभवनस्य

कार्यार्थिनं कमपि नालक्षयामास
अभियोगिनं कमपि नालक्षयामास

प्रवृत्तिर्विचित्राद्या रामस्य वर्तते
''कार्यार्थिनं जनं सदसि प्रवेशय''

इत्यनुजशासनेऽभिप्रैति किं नाम
किं मनसि वर्तते रामभद्रस्यास्य

इतिशिरो धूनयन् बहुधा विचिन्तयन्
गोपुरप्रान्त माकलय दभितः पुनः

एकतो बाष्पाकुलेक्षणो निस्सरत्-
क्षतजधारास्विन्न सन्नाकृतिः कोऽपि

अस्थिचर्मावशिष्टाकृतिर्भग्नाङ्घ्रि-
रुपगतक्लेशको विस्त्रसापरवशः

In Public domain. Digitization Muthulakshmi Research Academy

दीनदीनानश्शीर्णशीर्णाङ्गकः
सारमेयस्तस्य लोचनातिथिरभूत्

सारमेयं कथं कार्यार्थिनं ब्रुवे
देवस्य सन्निधौ वेदनीयं कथम्

ध्यात्वा क्षणं पुना रामस्य सन्निधौ
गत्वा न्यवेदयत् स च कुक्कुरस्थितिम्

प्रभुरादिदेश तं शीघ्रं प्रवेश्यतां
सारमेयस्त्वया शरणागतो भरत

भरतस्तमुपगम्य सारमेयमुवाद
धन्योसि रघुमणिस्त्वां द्रष्टुमीहते ॥

कुक्कुरकुलोत्तंस नृपसभामन्दिरं
प्रविश रामनृपालदर्शनेन पुनीष्व

आत्मानमात्म प्रवृत्तिं निवेदय
श्रीरामसन्निधौ गुणवतां सन्निधौ

इति वदन्तं भरतमब्रवीत् भषकस्स-
मास्मवादीः प्रभो ! मास्मवादीः प्रभो !

क्वाहमधमाधमः क्व च स पुरूषोत्तमः
नागलोकः क्व नु क्व नु जम्बुकः प्रभो

गौतामत्रि-वशिष्ठ-भृगु-भरध्वाजदि
परमर्षयस्सभाभवनं पुनन्ति यत्

In Public domain. Digitization Muthulakshmi Research Academy

वेदवादावदातात्मकास्स्मृतिशास्त्र
पारगाः कुर्वन्ति यामलं संसदम्

सकललोकोपकृतिशालिनस्सुचरित्र
दीप्तिभिस्संसदं नीराजयन्ति याम्

तत्र संसदि भरत ! किं प्रवेष्टुं नीच
नीचजन्मा जन्तु रय मर्हति ब्रूहि

वध्यान्निहन्तुमनवद्यान् जनानवितु-
मपनेतुमवनिभरमवततार स्वयम्

योवाव बालकः कौशिकस्याध्वरम्
यस्याङ्घ्रिरेणुतः पूर्वरूपं शिला

प्रापत् वभञ्ज शिवचापं जहार भृगु
रामस्य गर्वमपि तातस्य शासनम्

यो जुगोप, जघान खरदूषणादिमं
क्रव्याद कुलमेक एव सङ्गरतले

यश्चकारातिथिं यमपुरस्येन्द्रजं
रावणादीन् लोककण्टकान् निजघान

आसादयामास शबरीं परन्धाम
अल्पमपि चिक्रोडमुपनिनाय च दिवम्

परमस्य पुरुषस्य तस्य रघुरामस्य
पदपांसुपूतं सभामन्दिराङ्गणम्

In Public domain. Digitization Muthulakshmi Research Academy

स्प्रष्टुमपि नार्हामि वेस्टुमपि नार्हामि
द्रष्टुमपि नार्हामि नीचः नीचः प्रभो ।

स्वव्रतं स्मारय स्वोदितं श्रीराम-
चन्द्रप्रभुं याहि तुभ्यं नमो भरतम् ।

इति वदन् विरराम कुक्कुरो भरतोऽपि
कुक्कुरोदितमनूवाद तस्यान्तिके

विस्मितिस्सर्वेऽपि भरतस्य वदनेन
श्रुतया च भषकस्य वाचा सभाङ्गताः

कोऽसावयं प्रभो प्राज्ञ इव भाषते
साधारणोऽयं न सारमेयो भवति

देवातात्मा कोऽपि गूढमास्त शुनो
वपुषि, शापात् भषकरूपं दधार किम्

देव एव स्वयं जानाति भषकस्य
वृत्तं निबोधयतु देव एवास्मान्नु

इति समभ्यर्थितो मुनिवरैः प्रभुवरो
हनुमन्मुखेन तं कुक्कुरं कथमपि

आकारयामास सारमेयस्सोऽपि
चकित इव भीत इव कम्प्र इव दूरतः

सदसि तस्थौ नतस् सप्रश्रयं तदा
दीनाननं श्वाानमवदन्नृपालकः

In Public domain. Digitization Muthulakshmi Research Academy

निर्भयं ब्रूहि मे क्षतकारणं तव
कष्टां दशां कोऽन्वलम्भयत्त्वामये

सारमेय विषादकारणं ब्रुहि मे
अभयं ददामि ते सर्वभूतेभ्योऽपि

कौलेयकुलतिलक ! निर्भयं ब्रुहि मे
निर्भयं ब्रूहि मे कौलेयकुलतिलक !

अतिबुभुक्षाकृशं गन्तुमप्यक्षमं
विस्त्रशापरवशं शिथिलाङ्ग सन्धिकम्

वीथिपार्श्वे क्वापि सम्पिण्डिताकृतिं
अधिशयानं तन्द्रिताक्षं महीश ! माम्

पञ्चषैः कर्मन्दिभिर्युतो मस्करी
कोऽप्यवाच्यैरेव वचनैर्विगर्हयन्

ताडयत मारयत खण्डयत भञ्जयत
कुक्कुराधममिमं सहचरान् प्रेरयन्

आः पाप-पुण्यजनसेवितं परिसरं
न घ्रातुमर्हसि द्रष्टुमपि नार्हसि

निर्भयं स्वपिषि तव शतधोत्तमाङ्कं
दारयामीति स्वदण्ड प्रहारेण

रक्तसिक्ताङ्कं क्रुद्धोऽकरोत् प्रभो
वृद्धमपि शीर्णमपि विवशमपिनिर्दयम्

In Public domain. Digitization Muthulakshmi Research Academy

मूर्छितः कथमपि प्राप्तसंज्ञः प्रभो
अगतेस्तु नृप एव गतिरस्ति नियतमिति
मत्वा तवान्तिके वेदयितुमागमं
भगवन् प्रसीद में व्यथितदीनशरण्य !
नाविदितमस्ति ते विदितवेदितव्य
देवः प्रमाणमिति विरराम कुक्करः
व्यथितस्य भषकस्य परिकथामवगम्य
क्षणमिव ध्यात्वा स रामोऽवनीपतिः
भषकाभिवर्णिताकृतिलक्षणं नगर
वीथीचरं परिव्राजं सहानुगम्
सदसि प्रवेशये त्याजिज्ञिपत् भटं
तेन प्रवेशितं कर्मान्दिनं सपदि
सादरं मस्करिन् ! कुक्कुटं दर्शयन्
अपिदृष्टपूर्वोऽयमपि सत्यमस्योक्त
मार्य तत्त्वं ब्रूहि इत्यब्रवीत् प्रभुः
क्षुद्रोऽनु जन्तुः क्व लोकसम्पूजितः
मस्करी क्नु बुधः किं वदामि प्रभो !
मार्गेऽवरोधाय भषकश्शायानोय
मटतामकल्पतास्माकं तपस्विनाम्
सर्वथा गर्हितेऽनुचित प्रवृत्ते च

In Public domain. Digitization Muthulakshmi Research Academy

भषकाधमे मया दण्डनं पातितं
कोऽत्र दोषः प्रभो कोऽपवादः प्रभो
न्यायाय कल्पते किं कुक्कुराधमः
विमृश मनसा प्रभो पाहि धर्मं प्रभो

इति वदन्तं रामभूपतिस्तमुवाद
चेष्टितं तव साधुवादमर्हति नैव
अपकृतं भषकेण किं नाम मस्करिन्
अमुना वराकेण दीनेन जीर्णेन

नापराद्धं कुक्कुरेण तेनानेन
यतिनैव कुपितेन भवतापराद्धं हि
क्रोधो हि कारणं सर्वस्य पापस्य
क्रोधो हि हेतु रवपातस्य विविधस्य

क्रोधो हि निरयस्य मूलं समस्तस्य
क्रोधं विना कोऽनु रिपुरस्ति विष्टपे
दण्डनमदण्ड्यस्य पापाय कल्पते
दण्ड्याविदण्डनं निरयाय कल्पते

अविजितक्रोधेन किं नाम जितमस्ति
कर्मन्दिनम्मन्य भवताभिमानिना
धर्मावलम्बिभिस्सभ्यैर्विधीयतां
दण्डोऽयमर्हत्यहितकृन्मस्करी

In Public domain. Digitization Muthulakshmi Research Academy

धर्मसूक्ष्मं वेत्ति नृपते भवानेव
यमयमर्हति दण्डमाविस्करोतु तम्

इति मुनिप्रवरेषु कृतपरामर्शेषु
उक्तवत्स्ववनिपो भषकं बभाण तम्

सरमासुतोत्तंस विहितापचार मिम
मग्रवर्णं येन दण्डेन योजयसि

दण्डं विधेहि तं निश्शंकमिति राम
भूमिपेनार्थितो भषको बभाषे च

श्रीराम ! सुगुणाभिराम ! जलदश्याम !
धरणीपतिलिलाम ! रविकुलाम्बुधिसोम !

अधिकृतान् देवालयाधिकृतपीठेषु
तानिमान् कुरु दण्डयितुमीहसे यदि

इति कुक्कुरस्योक्तिमाकलय्य समेऽपि
विस्मिताः कथमेतदिति राममब्रुवन्

अस्य तत्वं वदति भषक एव स्वयं
अवहितैः श्रूयतां तं वदेत्यादिशत्

पूर्वजन्मन्यहं वयुनाधिपोऽभवम्
तत्प्रभावादेव कुक्कुरो जातोऽस्मि ॥

एषोऽपि वयुनाधिकरप्रमादतो
भषककर्मक्लेशफलमनुभविष्यति ॥

In Public domain. Digitization Muthulakshmi Research Academy

भवभावभेदतो देवालयो द्विधा
विद्यालया वैद्याशालास्तथा सार्व-
जनिकसंस्थाश्शासकीयप्रतिष्ठान
सहकारसंस्थादयो लोकसेवादि-
संस्था भवन्ति भव देवालयाद्याः

भक्तिभावाञ्चिता देवालयादयो
भावदेवालया, उभयेऽपि जीवने
धारकास्तारकाः प्रभवन्ति, तत्राप-
चारिणो भषकादि नीचयोनिषु नून-
मुद्भवन्तीमांस्तु भवभावसंज्ञेषु
देवालयेषु कुर्वधिकृतान् राजन्य !

इति विरतवाचि शुनि रामभूपालकः
अकृत पश्चात्तापमाकलय्य च यतिं
वयुनधिकारपदमारोपयत् सपदि
अधिकृताः कुक्कुरोपाख्यानमवगम्य

विनताननाः केऽपि विस्मितास्याः केऽपि
अवसन्नमानसास्सदसि जाताः केऽपि
प्रशशंसुरवनिपं सर्वयोगक्षेम
तत्परं भषकं च मुनयोऽभ्युन्नदयन् ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

अनुशीलनम्

१. परिप्लुष्टं राष्ट्रं कुलमत विरोधाग्निशकलैः
कृतभ्रेषैः क्षुब्धा निजपदपरित्राणकुशलैः
प्रजामात्याभासैः प्रतरणचणैः नैत्रपशदै-
स्समन्तात्सौहार्दं गमितमधुनास्तं भुविनृणाम् ॥

२. समन्तादातङ्कज्वलन कबलीकृतजनैः
प्रजामारीभूतैः कतिपयदलैः स्वार्थनिरतैः
भयभ्रान्तं राष्ट्रं विकलविकलं साम्प्रतमहो
कथङ्कारं नृणां प्रभवति सुखं शान्तिरथवा ॥

३. ध्रुवं प्राज्यं राज्यं विविधबलिदानैरधिगतं
स्वतन्त्रं राष्ट्रं वा विफलितमहो नेत्रपशदैः
मिथो द्विड्भिर्वर्गैः प्रगतिमधुनास्तं च गमितं
भयग्रस्तस्सर्वोऽप्यभिलषति परित्राणमभितः ॥

४. स्ववृत्तीनां धर्मान् नियमनियतान् तूर्णमखिलान्
तृणीकृत्य स्वैरं चरति विविधोद्योगिनिवहः
नवा शास्ता तां स्तान्नियमयतिवा दण्डयति वा
प्रजाराज्यं नूनं विफलमभितो जातमधुना ॥

५. लुलाया वेशान्तानिव जनपदान् नेत्रपशदा
वितन्वन्ति प्रायः कलुपिततमान् दुष्प्रचरितैः
सुभाद्यं पल्लीनामतिविमल वातावृतिमयं
विलुप्तं, नृणां च प्रलयभयवज्जीवनमपि ॥

In Public domain. Digitization Muthulakshmi Research Academy

६. वणिग्वर्गो राष्ट्रप्रगतिमनपेक्ष्यैव बहुधा
स्वलाभव्यासक्ते शतगुणितमाचिन्वति धनम्
प्रभुत्वं तत्क्रीतो व्यवहरति दासोऽप्युत यथा
महामूल्यै रोदित्यनधिकृतसाधारणजनः ॥

७. विनोत्कोचं कार्यं न फलति किमप्यल्पमलघु
प्रभुत्वं सर्वत्र प्रसभमविनीतिं द्रढयति
क्रियावाचोर्नूनं न किमपि च बान्धव्यमधुना
व्यवस्था दुष्टैषा कथमपि समैक्यं द्युति नृणाम् ॥

८. उपाध्याये शिक्षेतरकृतिषु सक्ते कुपथगे
प्रशिक्षा छात्राणां कथमिव फलं दास्यति भृशम्
च्युते न्यायाधीशे मुहुरनुतसाक्ष्यैकशरणे
खले वाक्कीले वा जयति कुटिला न्यायसरणिः ॥

९. धनैर्मद्यैः क्रीतैर्बहुलमतदानैर्निजजनै
दुराक्रान्तैरद्धा बहुमतमधिप्राप्तमिति च
दलानां नेतार स्वविजयमनुशंसंति पुरतो
ध्रुवं खिन्ते निर्वाचनसरणि दुर्नीतिरधुना ॥

१०. कुलानां बाहुल्यं स्वपरजनविद्वेषविवशं
स्वसङ्घानां नेतृत्वमपि वृकगोमायु विहितम्
सदस्यानां धार्ष्ट्यं बहुजन जुगुप्सावहमहो
प्रभुत्वस्यास्थानीं वशयति महाधूर्तसमितिः ॥

In Public domain. Digitization Muthulakshmi Research Academy

१२. क्वचित् प्रान्तो भाषा क्वचिदपि कुलं वर्गविभिदा
क्वचिद्वा नेतृत्वं कुहचिदपि मन्त्रित्वमितिवा
पदस्यार्थे धूर्तैः कुटिलमतिभिर्नेत्रपशदैः
समान्तादुत्क्षिप्तः प्रबलकलहाग्निस्सकलतः ॥

१३. शतायुश्चारित्रं दलमपि कलंकाक्तचरितैः
परिभ्रष्टाचारैर्निजसुखरतैर्नेत्रपशदैः
परीवादप्रीतैर्बहुमुखमृषावादविबुधै-
रधोलोकं नीतं, निरयमपि राष्ट्रं च गमितम् ॥

१४. कुलानां वर्गाणां लघुगुरुमतानां च विभिदां
तथा भाषासीम्नामननुगतिमुद्दिश्य कलहम्
बहोः कालात् वंशक्रमिकपरिवृढं पालकदलं
स्वनेतृत्वास्यार्थे सृजति च समैक्यस्य विपदम् ॥

१५. कुलानां विद्वेषे कथमिव भवेत्सख्यमसमं
मतानां विद्रोहे विलसति कथं प्रेममधुरम्
दलानां सङ्क्षोभे कथमिव समैक्यं भुवि नृणा-
मपाकर्तुं मूलात्सपदि यतनीयं च विकृतीः ॥

१६. मतादानव्याजात्बहुजनसमाजञ्च तृणवद्
विधायाद्धानल्पेतर जनवितानं बहुवरैः
दलानां नेतारो मुहरनुनयन्त्याप्तसुवरो
जनोऽप्यल्पस्स्वैरं चरति तदसंख्यान् तुदति च ॥

In Public domain. Digitization Muthulakshmi Research Academy

१७. बहूद्रेकोन्निद्रैर्विविधकुल विद्वेषजनकै-
स्समस्याश्चिन्वानैरविनयमयैः क्रौर्यनिलयैः
प्रताराढ्यैर्गीतैस्सुवति कवयो विप्लवरता
अशान्तिं हिं सोपद्रवभयमयं राष्ट्रमभितः ॥

१८. अशान्तिज्वालाभिः कुमतकुलवात्याभिरनिशं
नृहिंसादंस्ट्राभिः प्रतरणमयैः फूत्कृतशतैः
जनोम्लानं म्लानं सकलमपि राष्ट्रं भययुतं
समुल्लाघैस्सुस्थं कलयतु विधेयैस्सुचरितैः ॥

१९. व्यष्टौ व्यष्टौ बहुमुखफला स्फूर्तिरिन्धां समस्ते-
स्सापि व्यष्टिं नुदतु पुरतस्तारतम्यं विहाय
अज्ञं विज्ञोपलपति न वा पालितं पालकोपि
श्रेयोराज्यं नयतु जनता स्वस्ववृत्तौ प्रवृत्ता ॥

२०. कर्तव्यं किं ममास्तीति किं मया कृतमित्यपि
आत्मोक्तं क्रियते चेति सर्वोऽप्यात्मानमामृशेत्

२१. अनन्तचैतन्यसमुज्ज्वलस्य
महासमाजस्य समग्रशक्तेः
आविर्भवार्थं कवयो विधिज्ञा
मेधाविनश्शास्त्रविदो यतन्ताम् ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

परिवादिनी

१. महेश! शम्भो ! महेश ! शम्भो ! महेश ! हर ह ! महेश! शम्भो !
त्रिलोकनायक, हर हर । शम्भो । जगन्नियामक । हर हर शम्भो ॥

२. पवित्रवाराणसीश ! शम्भो ! नमो नमो विश्वानाथ ! शम्भो !
सदान्नपूर्णासनाथ ! शम्भो विशालनयनासनाथ शम्भो ॥

३. करालकाकोदरस्थिमालाविभूतिभूषितसिताङ्ग ! शम्भो !
सुधांशुमौले ! सुपर्वमौले ! सुधारणां मयि कुरुष्व शम्भो ॥

४. कपालपाणे ! कृपाणपाणे ! पिनाकपाणे ! त्रिशूलपाणे !
गजासुरारे पुरासुरारे हतामरारे ! जय स्मरारे ॥

५. विरिञ्चिविष्टवविकारविप्लव विषण्णवित्तमविषमविषादम् ।
निरन्तरं लघुनिवारयितुमपि मिटोललोचन ! निरीक्षसे त्वम् ॥

६. समूलघातं विरोधियूधं निहत्यधीरं जगन्ति रक्षसि !
तपस्विनामपि मनस्विनां हृदि विभासि विद्युन्मयेन वपुषा ॥

७. करालभौतिकविकारसञ्ज्वरविशीर्णसेविदि मदीयचेतसि ।
उदारकरुणासुधासुधाराप्रवाहमीश ! प्रवाहयारम् ॥

८. विभासियस्यानिशं मतौ त्वं प्रजायते काप्युदात्तकविता ।
मुखारविन्दान्मरन्दमधुरा नवैव तस्य प्रभावतस्ते ॥

९. महेश ! यस्मिन् प्रसारयसि निजकृपारसं स तु दरिद्रकोऽपि ।
कुबेरपदवीं महेन्द्रपदवीं ततोऽपि परमामुपैति पदवीम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१०. समस्तसुमतिप्रशस्तरसनाऽवनौ तवैव स्तुतिर्विभाति ।
चकास्ति कवितामयी कला ते स्वभावनायां कवीश्वराणाम् ॥

११. चलेऽत्र तृणमपि विना तवाज्ञां विशालविश्वे कदाऽपि कुहवा
समस्तवस्तुषु तवैव शक्तिर्विभासते स्फुटमनन्तशक्ते ॥

१२. पुराणपूरुषमनादिनिधनं जगन्निदानं जगन्निधानम् ।
अशेषसुषमानिषेव्यमाणं स्तुवे भवन्तं सदा महेशम् ॥

१३. स एव जनिमा स एव मरिमा स एव भरिमा स एव हरिमा ।
अवेत्य सुतरामपीह मूढा असद्विचारैर्नरन्ति कालम् ॥

१४. बिभेति मृत्योर्नरो नितान्तं यमो विभीतं जहाति किं वा ।
अजातमेव स्पृशेन्न शमनोऽप्यजन्मने वा न कोऽपि यतते ॥

१५. निमज्जतो मे भवाम्बुराशौ करावलम्बं प्रदेहि बन्धो ।
उपेक्षसे किं स्मरन्तमवितुं विषण्णमेनं महेश ! नूनम् ॥

१६. उपेक्षयाऽलं परीक्षमे मां विवेकहीने परीक्षया किम् ।
निरीक्षणां ते करोमि नितराम् अपेक्षमाणं समीक्षसे किम् ॥

१७. विचिन्तया ते नयामि कालं विलम्बमधुना सहे न तेऽहम् ।
असुधामयीं ते दयां समीहे सुधारणां मे कुरुष्व कृपया ॥

१८. विरोधिबाधादुराधितप्तं तिरस्करोषि प्रभो ! कुतो माम् !
मयाऽपराद्धं महेश ! किं ते विदण्डयसि मां कुतोऽनुबन्धो॥

१९. उमामहेश्वर ! पदारविन्दं शरण्यमेति त्वदीयमेव ।
महान्धकारे भ्रमन्तमेनं प्रदेशमुन्नय महोमयं ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

२०. लुनूहि पाशं प्रभो ! मदीयं मुहूर्तमपि नो सहेय बाधाम् ।
उपेक्षसे किं रुदन्तमेनं दया कुतस्ते न जायतेऽस्मिन् ॥

२१. मृकण्डुसूनौ कृता परा सा कृपालुता ते क्व वा गता भो ।
सुरेषु विहिता प्रसन्नता सा क्व वा गता ते कुतो ह्युदास्से ॥

२२. करालशार्वरविकारनिकरैः परीतमेतन्मनो मदीयम् ।
जहाति नूनं विवेकममलं यथाभिलाषं चरत्यनीश्वर ॥

२३. निरोद्धुमेतद्यते बलादपि न शक्यते हृन्मया निरोद्धुम् ।
यथा यथा मे प्रयाति हृदयं तथा तथाऽहं प्रयामि बन्धो ॥

२४. वदामि कं वा ममाथ बाधां श्रृणोति कोवा ममेह रुदितम्
निवारयति को ममानुतापं विना भवन्तं विपन्नबन्धो ॥

२५. दुरन्तसङ्कटशतानि भिन्दन्नवस्वशरणागतं प्रभो ! माम् !
निधाय भारं त्वयीह सर्वं मदीयमधनिर्विचारमस्मि ॥

२६. स्तुवन्ति दिविजा भवन्तमेव स्मरन्ति दनुजा भवन्तमेव ।
नमन्ति मनुजा भवन्तमेव त्वमेव जगतामधीश एकः ॥
भवन्तमाधारवारिजाते सुवर्णवर्णं भ्रुवोश्च मध्ये ।
वलक्षमणिसंन्निभं हृदब्जे प्रबालरुचिरं भजन्ति मुनयः ॥

२७. विचित्रवेषैरशेषजीवैर्नटेश ! विजरीहरीषि विश्वे !
स्वभावसिद्धां स्वकीयमायां न कोऽप्यवेया दमेयशक्ते ॥

२८. पयोधरा इव विशालगगने तरङ्गभङ्गास्समुद्र इव भो !
अजाण्डगोलास्त्वदीय उदरे पुरोभवन्त्यपि तिरोभवन्त्यपि ॥

In Public domain. Digitization Muthulakshmi Research Academy

३०. प्रमोदजाम्भःपरीतलोचनमुपात्तगद्गदमुदीतकम्पम् ।
विलोक्य संविद्दृशा भवन्तं महर्षयो मुदमवाप्नुवन्ति ॥

३१. ददं शुभानां दधं दयानां दहं पुराणां हनं रिपूणाम् ।
पिबं विषस्य प्रभुं जगत्यास्स्तवीमि भक्त्या भवन्तमनिशम् ॥

३२. तवाभिधातुं स्वसूपमीश ! स्मृतिर्न शक्ता श्रुतिर्न शक्ता !
वयं समर्थाः कथं नु नवितुं वचोदुरापं मनोदुरापम् ॥

३३. अवाप्य करुणातरीमुदारां तरन्ति यमिनो भवाम्बुराशिम् ।
तवैव कृपया सदाप्रमोदामृतप्रवाहे प्रभो ! प्लवन्ते ॥

३४. तव प्रियां मतिसतीमुदात्तां तुदन्तमेनं विदह्य कामम् ।
तदीयभस्मानुलेपनं कुरु शरीरमभितस्स्वकं स्मरारे ॥

३५. अकारणादपि विवेकहीना विरोधगरलं वमन्ति केचन ।
तव प्रसादात् सुधायते तद् विषं ममापितु कृते महेश्वर ॥

३६. अधःफणामवनमय्य दूरादपैति भीत्या द्विजिह्ववर्गः ।
दिदंक्षुरपि मां तव प्रसादादहैतुकाविष्कृतात् परात्परम् ॥

३७. कलासु विद्यावलीषु सुमनोमनस्सु यमिनां तपस्सु बहुधा ।
कवीश्वराणां वचस्सु नूनं तवैव भूतिर्विभात्युदारा ॥

३८. अधीश्वाराणामधीश्वरस्त्वं कवीश्वाराणां कवीश्वरोऽसि ।
मुनीश्वराणां मुनीश्वरस्त्वं न कोऽपि तुल्यस्तवास्ति लोके ॥

३९. मिनोमि मिहिरं महस्सुधांशुं यशस्समीरं सहः, कुबेरम् ।
प्रसाद-मन्तकममर्षमब्धिं कृपामपर्णां तवैव शक्तिम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

४०. मसारमञ्जुलमनोज्ञसुषमाप्रवाहयमुनीकृतार्धभागम् ।
सुधांशुसुषमाप्रवाहगंगीकृतान्यभागं भजे भवन्तम् ॥

४१. निजापराधं निगीर्य नितरां भवन्तमेवाक्षिपामि नूनम् ।
स्वदौष्ट्यमाविष्करोति मूढो द्विषत् सुधीजनमकारणं हि ॥

४२. स्वजीवितं त्वं सुधारयस्वेत्यदा मतिं मे वचोऽप्यदा मे ।
मतिं वचोऽहं तृणाय मत्वा यथाभिलाषं प्रभो ! प्रवर्ते ॥

४३. इदं सरोजं न विन्दते किल विकासमद्याप्यहो महोमय !
इदं सरोजं विकासयितुमपि महोनिधिर्वा न चापि यतते ॥

४४. न दुग्धपाथोविभागकलनाविदग्धतां पुनरिहापि विन्दति ।
अयं तु हंसस्तदर्हशक्तिं परे न तस्यानुकल्पयन्ति ॥

४५. असी पिको वलिभूगारटीति व समाश्रितोऽपि प्रभो ! रसालम्।
न शास्ति मधुरं स्वरं किसाले रसालसालोऽप्ययं पिकं वा ॥

४६. अयं चकोरो निजानुतापं जहाति न तरां विधूदयेऽपि ।
प्रमोदयत्ययमहो सुधांशुर्नवाऽपि दीनं चकोरमेनम् ॥

४७. वराक इन्दिन्दिरोऽयमीश्वर विकस्वरं सुन्दरारविन्दम् ।
मरन्दमधुरं विहाय निस्सारमेव मदनं समाश्रयति भो ॥

४८. परात्परामप्रकृष्टतारकमनूपदेशं महेश! कुर्वन् ।
श्रुतौ परासून् मकिल्पिपानप्यवापयसि तत्परंपदं त्वम् ॥

४९. गिरीश ! रामस्त्वदात्मलिङ्गप्रतिष्ठितिं भुवि चकार सोऽपि ।
मिथो विभेदो न किञ्चिदपि वां विभेददृष्ट्या चरन्ति केचन ॥

In Public domain. Digitization Muthulakshmi Research Academy

५०. ऋतं मनोज्ञं शिवं स्वरूपं जगज्जनीनं तथाऽऽत्मनीनम् ।
विवेकदृष्ट्याऽनवेत्यमूढा विरुद्धवादैर्नयन्ति कालम् ॥

५१. ऋतम्भरा तच्छ्रुतानुमानेतराऽवदाता सदोन्मिषन्ती ।
परात्मतत्त्वप्रदर्शनी मे विभातु संवित्कला हृदीश्वर ॥

५२. महेश्वरे यो जगत्समस्तं निपश्यतीदं समस्तविश्वे ।
महेश्वरं वा स एव विष्णोरुपैति परमं पदं विमुक्तः ॥

५३. अबान्धवानपि करोषि बन्धून् दवीयसो मम करोषि सख्युः ।
अनेकवेश्मसु दधासि वसतिं सभाजनैरपि सभाजयसि माम् ॥

५४. कठोरदीक्षाप्रवीण एव प्रसादमर्हति नरः प्रभो ! ते
कठोरदीक्षोचिता मतिर्मे न चास्ति चपले मयि प्रसीद ॥

५५. प्रभो दुराशामरीचिकाभिर्विमोह्यमानं नितान्ततान्तम् ।
महाजवंजव मरुस्थले मां भ्रमन्तमुन्नय सुधाप्रवाहम् ॥

५६. मनःपयोमुचि सहस्रविद्युत्तङ्गभरङ्गान् प्रसर्पयेश्वर !
मनःपयोधरमुदारसंवित्कला सुधारसनिपूरितं कुरु ॥

५७. तमोमये मे मनोनिवेशे महोनिधे ! चित्प्रभां प्रभासय ।
मनोमये मे कृषिप्रदेशे सभावसस्ये सुधां प्रवाहय ॥

५८. नितान्तनिशितत्रिशूलधाराहताहितामरविरोधियूधम् ।
लयोज्ज्वलानलकरालकीलानिषेवितालिकदृशं भजे त्वाम् ॥

५९. प्रकाण्डताण्डवसमड्डुढक्कानिनादमेदुरदिगन्तरालम् ।
झणन् झणन्मणि मनोज्ञनूपुरानिशिञ्जिताञ्जितपदाब्जमीडे ॥

In Public domain. Digitization Muthulakshmi Research Academy

६०. अधा अनन्तं प्रभो ! पुनर्मामपीदमर्हति तवात्मलीलाम् ।
अदोऽपि पात्रं कदाऽपि रिक्तं करोषि सुधया कदाऽपि पूर्णम् ॥

६१. विकस्वरस्वरतरङ्गमेदुरनिनादपीवरमुदारडमरुम् ।
वनानि गहनान्यनेकशो गिरिदरीश्च नीत्वा निनादयसि भुवि ॥

६२. मरन्दरहितं सुगन्धरहितं लतान्तमिदमपि गृहण मनसा ।
मुधा पतिष्यत्यदोऽधबाऽधो रजस्तले वा तमस्तले वा ॥

६३. समुत्सहे स्वं समर्पयितुमपि तवैव सुन्दरपदारविन्दे ।
विडम्बनेयं कदाऽपि न भवति विडम्बयसि मां त्वमेव नूनम् ॥

६४. कठोरनियमैर्निबन्धुमपि मां समुत्सहन्ते सखाय एते ।
विहाय दूरादिमानरीनिव भवन्तमेवाश्रयामि बन्धो ॥

६५. बधीरयन्त्याग्रहेण केचन विमूढ इति मामशक्त इति माम् ।
विगर्हणमपि तृणाय मत्वा सुधारकं त्वामुपैमि शरणम् ॥

६६. तमःकवाटं पिधाय मोहो दुराशया सह हृदीह रमते ।
तमःकवाटं विभिद्य मोहं तिरय्य मत्या रमस्व हृदये ॥

६७. सुशीलनलिनं मनस्सरोवरमुदारमनिशं विलोडयन्तम् ।
मदावलिप्तं विमोहहस्तिनमरं विदारय गजासुरारे ॥

६८. मनःपयोनिधिसमुद्भवं दुर्विमोहविषमपि निपीय सुतराम् ।
नितान्तनिर्मलचिदिन्दुरेखां निरालमौलौ निधेहि तूर्णम् ॥

६९. सुभक्तिसुदतीमतीव दष्टुं दुरुद्यतानहिविभूष ! जोषम् ।
मदाभ्यसूयाक्रुधापृदाकून् तवोपहारा निवार्पयामि ॥

In Public domain. Digitization Muthulakshmi Research Academy

७०. महेश ! कोऽहं कथं समभवं कुतस्समभवं किमर्थमभवम् ।
उपेयमपि किं ममेति चिन्ता तुदत्यसौ मां नितान्तमीश्वर ॥

७१. न चास्ति कस्मिन्नपीह कर्मणि तवेषदपि शिव ! मयोपयोगः ।
तथाऽप्ययुक्ते स्वजीवितेऽस्मिन् तवैव गीतिस्वरो विगुञ्जति ॥

७२. उदात्तरागेण गायसि त्वं महाकवे ! केन वा नितान्तम् ।
त्वदीयगानप्रभावमग्नो महेश ! निष्पन्दमेवमस्मि ॥

७३. उशामि गातुं तथैव किमपि न पदं स्वकण्ठाद् विनिस्सरति भो।
अनेकथा साधयाम्यधापि प्रभो ! न कोऽपि स्वरो विराजति॥

७४. अनेकरूपैरनेकनामभिरनेकरीतिभिरुपासते त्वाम् ।
निषेवमाणाननेकधा त्वं धिनोषि शम्भो ! तथैव लोकान् ॥

७५. सुजातिमल्लीसुमालतीमञ्जरीपरीमलझरीव सर्पतु ।
अमन्दमन्दाकिनीतरङ्गावलीव मां चित्कला पुनातु ॥

७६. निरन्तरोमोपगूढदेहं निरन्तरश्रीविराजमानम् ॥
निरन्तराभासभासमानं निरन्तरं मन्महे महेशम् ॥

७७. पिनाकहेवाककार्मुकज्यारवैकभिन्नाभियातिहृदयम् ।
कटक्षमात्रामरेश्वरीकृतमहादरिद्रं स्तुवे भवन्तम् ॥

७८. शरत्सुधाकरसहस्रकोटिप्रकाशभास्वरविकस्वरास्यम् ।
सहस्रकोटिप्रभाकरद्युतिपरीतवक्त्रं भजे भवन्तम् ॥

७९. गजस्य कृतिं वसानममलं विभूतिरेखाविराजमानम् ।
निटालनयनं तमन्धकारिं वृषेन्द्रवाहं भजे भवन्तम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

८०. त्वदीयजगतीसमागमात् प्राक् कवित्वगर्वो ममाधिकोऽभूत् ।
त्वदीयजगतीसमागमान्मे मदोऽपि सर्वोप्यपागमद् भो ॥

८१. त्वदीयजगतीसभाप्रवेशार्हता न किञ्चिन्ममेति मन्ये ।
महाकवीनामिहस्थितानां न षोडशीं वा कलामुपेयाम् ॥

८२. सदावतप्रभाशतावृतमहःप्रवाहं सुधाप्रवाहम् ॥
समस्तसम्पत्समावलम्बं शिवावलम्बं भजेऽवलम्बम् ॥

८३. विषं सुधायां सुधां विषेऽपि व्यधाः किमर्थं मुधाविनोदम् ।
मिथोविरूद्धं निपश्यतो मे नितान्तमुन्माद्यतीव चित्तम् ॥

८४. उमागृहीतोऽनूमागृहीतो भवोऽपि भगवन् ! भवातिवर्ती ।
सदापि भिक्षुस्समस्तसम्पत्प्रदायकोऽसि त्वमेव शम्भो ॥

८५. अनेकवाङ्मयनिकेतनान्तःप्रतिष्ठितैकस्वरूपरूपम् ।
अनन्तवीर्यप्रमोदशक्तिप्रभावपूर्णं भजे भवन्तम् ॥

८६. जटाटवीधृतधियद्धनीकं निबर्हितामरविरोद्ध्यनीकम् ।
अपाकृताश्रितविपन्नभीकं सशेमुषीकं भजे भवन्तम् ॥

८७. निधाय कण्ठे विषं कपर्दे वियद्धुनीमधललाटफलके ।
ज्वलल्लयाग्निं चराचरोपद्रवानपास्यसि शिव ! त्वमेव ॥

८८. तवानुकम्पालवेन सर्वे सुखानि सर्वाण्यवाप्नुवन्ति ।
महेश सावधि जगत्समस्तं तवावधिर्न ह्यनुग्रहस्य ॥

८९. प्रमोदपूर्णः परात्परस्त्वं प्रमोदपूर्णात् त्वदेव विश्वम् ।
उदेति पूर्णं भवेन्न शून्यं किमप्यशेषं त्वयैव पूर्णम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

९०. यदस्ति लोके पदार्थजातं समस्तमेतन्न कस्यचित्स्वम् ।
त्वदीयमिति हृदि विभाव्य पूरुषोऽफलाभिसन्धि स्वकर्म कुर्यात्॥

९१. परास्तकामोस्यवाप्तकामोस्यनन्तसम्पत्प्रदायकोऽप्यसि ।
तथापि तपसे तपः किमाप्तुं तवापि लोपो जगत्पतेः किम् ॥

९२. भवन्ति शाखाश्शतं श्रुतीनां समाश्रयेयं शिवाधुना काम् ।
नितान्तमुन्मादयन्ति नूनं मतान्यमून्यपि जगत्पते माम् ॥

९३. असीति नासीत्यनेकधा त्वां वदन्ति सुधियोऽधुनापि शम्भो ।
विवादमेषां परिष्करोषि त्वमप्यहोऽद्यावधीश ! नैव ॥

९४. धिनोषि सम्प्रति वैरैरनेकैर्यथापुरं किं प्रभो न भक्तान् ।
इमेऽपि भस्मासुरा न किं स्युर्भुवीत्यो वै बिभेषि किं भो ॥

९५. निरुद्धमपि मे मनो विमुञ्चति न चञ्चलं तन्निजस्वभावम् ।
अनेकयत्नैर्निरुद्धमपि तज्जहाति नैव स्वनिष्ठुरत्वम् ॥

९६. शिवाहमीहे कियत्प्रशान्तिं करोति तत्तावतीमशान्तिम् ।
कियच्चिकीर्षे सुकर्म चाहं करोति तावत्कुकर्म हृदयम् ॥

९७. क्षणाद्विमुह्यति मृगीदृशा तत् फलं न पश्यति सुदूरदृष्ट्या ।
परप्रबोधं करोति सुतरां स्वकामुकत्वं जहाति न तराम् ॥

९८. मनो वितण्डां सभासु कुरुते परस्य नोरीकरोति वादम् ।
कदाऽपि रमते न च प्रपन्नैस्सदैव लगति स्वदुष्टकर्मसु ॥

In Public domain. Digitization Muthulakshmi Research Academy

९९. परस्य निन्दति मतं यथेच्छं
स्वकं प्रशंसति मतं सभासु ।
मनोऽभिनन्दति न शास्त्रमतमपि
कदाऽपि विन्दति न चात्महितमपि ॥

१००. मदान्धदुर्जनगुणस्तवेन च सकल्मषाऽभून्मदीय स्सना ।
परप्रतारणरतालिसविधे शिरोऽपि नतिभिर्विशीर्यते मे ॥

१०१. मया तु माचीकरश्शिरोनतिमसाधुदुर्मजनाढ्यमध्ये ।
आकिञ्चनं मा कृधाःकदापीत्यहं भवन्तं महेश ! याचे ॥

१०२. करालकालप्रभावतस्ते दयाऽपि लुप्ता किमस्मदादिषु ।
अनारतं जाग्रती कृपा ते किमीश ! सुप्ता मदर्थमेव ॥

१०३. महेश ! विविधैर्जगत्यनन्ते जनैर्विजेगीय्यते कृपा ते ।
ममैव दुरितं विलोक्य किं सा घृणात् एव प्रधीश ! सुप्ता ॥

१०४ विना यमादीन् चरेयमथवा समस्तविषयेष्वधीश ! किमहम् ।
ममैव बन्धाय एव बीजावली महेश स्वयं किमुप्ता ॥

१०५. पुरा त्वसंख्याः प्रभूतपापास्त्वयैव नोत्तारिताः प्रभो किम्
निहीनसन्तारणेऽपि किं ते कलौ युगे हा दयाऽपि तृप्ता ॥

१०६. चिराय पुनरारटीमि बहुधा महेश ! मे कन्धराऽध शुष्यति ।
त्वयीह विश्रम्भतो हि विबरीभरीमि बाधां चिरादिवाहम् ॥

१०७. अथापि करुणा न जायते ते शिलामयं ते किमीश ! हृदयम् ।
निराकृतेस्ते मनोऽपि किं स्यात् अहो विचित्रं तव स्वरूपम्॥

In Public domain. Digitization Muthulakshmi Research Academy

१०८. शमादिषट्कं महेश ! साधनचतुष्टयं वान चावलम्बे ।
शमादिषट्काद्युपार्जको यदि तव प्रसादं किमर्थमीहे ॥

१०९. मिनोषि यदि मां पशुं तदेश्वर ! सदा तमेवाधिरोहसि त्वम् ।
द्विजिह्वमपि यदि बिदूरयसि मां तमेव भूषणमधारयस्त्वम् ॥

११०. महेश ! गीतात्मनाऽऽविरासीन्ममैव हृद्वेदना त्वदग्रे ।
न तु स्वकविताविलाससौन्दर्यदर्शनार्थं कदाऽपि बन्धो ॥

१११. तवैव गीतेर्जिगासयाऽहं चिरादिहैव प्रभो ! वसामि ।
कुहापि किञ्चित् जगत्सभायां पदं प्रभो ! ते मयाऽपि लब्धम्॥

११२. अनेकपात्रं विमिश्रवृत्तं विभिन्नरसभावरीतिवृत्त्यपि ।
जगन्महारूपकं विधाय प्रदर्शयस्यस्मदादिभिस्त्वम् ॥

११३. विभिन्नभाण्डीरबीजमध्ये विलोक्यते किं वटप्ररोहः ।
तदेव बीजं समुप्तमवनौ वटस्वरूपं विशालमेति ॥

११४. सुसूक्ष्ममेवं दृगादिकरणैर्न गृह्यते परमितस्समस्तम् ।
महीमहोनिलपयोवियन्मयमुदेति जगदिति वदन्ति सन्तः ॥

११५. न जातु मुह्यसि न जातु रज्यसि
न जातु ताम्यसि न जातु तुष्यसि ।
न जातु शुष्यसि न जातु तृप्यस्य-
तश्श्रुतिस्त्वां शिवं ब्रवीति ॥

११६. सरस्वती त्वामजस्रमीट्टे समस्तशक्तीस्त्वमेव कंस्से ।
समाधिदीव्यत्तपस्विसंविन्मुखारविन्दं त्वमेव निंस्से ॥

In Public domain. Digitization Muthulakshmi Research Academy

११७. मनोजये सति वृधारिविजयो मनोऽजये सति वृधारिविजयः ।
शिवे प्रसन्ने मुधा समाधिश्शिवेऽप्रसन्ने मुधा समाधिः ॥

११८. य एव मायामवैति यं वा न वेत्तिमाया य एव मायाम् ।
प्रसौति यं वा न सौति माया हरिं हरं वा विधिं भजे तम् ॥

११९. तुषाररोचिस्तुषारघनसारहारपाण्डुरशरीर ! जय जय ।
नरामरासुरमसारकोटीररोचिरर्चितपदाब्ज ! जय जय ॥

१२०. परप्रतारणविशारदानां परोपपीडानिनिविष्टमानसाम् ।
परस्वहरणोल्लुटन्मतीनां प्रभुत्वमेव प्रवर्तते भो ॥

१२१. परप्रतारणमये युगेऽस्मिन् सतां हितानाममायिकानाम् ।
विषादभरितां दशां श्रमाढ्यां विलोकयेश्वर ! विलोकयेस्वर॥

१२२. उदात्तसंस्कृतकवीन्द्रकवितासुधाऽधुना शिव ! विषायते भुवि ।
स्वभारतीयप्रशस्तधर्मप्रशस्तिरधुना तृणायते भो ॥

१२३. महोन्नतस्थितिमवापयति या वदन्ति तां संस्कृतिं बुधा वै ।
महर्षिभिस्सा निरूपिता भुवि प्रभो ! विलुप्ताऽधुना जनेषु॥

१२४. अतीव वातावृतिः प्रशान्ताऽधुना जगत्यां विपर्यणंसीत् ।
परस्परेर्ष्याविरोधकलहैः परस्परं घ्रन्त्यमू प्रजा भुवि ॥

१२५. य एव विज्ञानसभ्यतादेर्महोन्नतं पदमवाप देशः ।
स एव देशः क्रमेण नितरामधोगतिं यात्यहो महेश्वर ॥

१२६. स एव देशोऽन्यदेशजनतां न केवलं धनमधीश ! याचते ।
अथापि विज्ञानसभ्यतादीन् अनेकविषयान् महेश!सम्प्रति ॥

In Public domain. Digitization Muthulakshmi Research Academy

१२७. अभारतीयाप्रशस्तमतवाग्विलासरीतिप्रभावपतिताः ।
स्वभारतीयास्स्वभारतीयं पवित्रमपि मलिनयन्ति चरितम् ॥

१२८. नितान्तमधुनातनस्सखा तत्समक्षमेव ब्रवीति सुहितम् ।
परोक्षमहितं करोति चैवं प्रतारयति भो सखायमीश्वर ॥

१२९. गुरुर्न शिष्यं प्रबोधयति सौमनस्यरीत्या गुरुं न शिष्यः ।
विधेयवृत्त्या प्रवर्तमानो निषेवतेऽस्मिन् युगे नवीने ॥

१३०. पतिर्न जायां पतिं न जाया पिता न पुत्रं सुतो न पितरम् ।
प्रभुर्न भृत्यं प्रभुं न भृत्यो मिथोऽनुरक्त्याऽनुरञ्जयति भो ॥

१३१. प्रशान्तजीवनविनिर्मलानि प्रविश्य पल्लीसरोवराणि ।
अतीव दूराजकीयमहिषाः प्रभो ! यथेच्छं विलोडयन्ति ॥

१३२. विजेतुकामाः प्रधानशक्तिं समुद्यतन्ते यथा यथा ते ।
तथा तथा सा निगूढरूपा सुदुर्गमत्वं व्रजत्यमीषाम् ॥

१३३. प्रसह्य मृत्युं निरोद्धुमपि ते समायतन्तेतमां महेश्वर !
प्रपञ्चसृष्टेः प्रतीह धातुं समुद्यतन्तेऽधुनातना भो ॥

१३४. प्रयातुमधुना समुत्सहन्ते सुधांशुमण्डलमुपग्रहैस्ते ।
प्रपञ्चसृष्टे रहस्यमधुनाऽवगन्तुमपि धीतपस्तपन्ति ॥

१३५. महेश ! भौतिकपदार्थविज्ञानशास्त्रमधुना विवर्धते भुवि ।
अनेकशाखोपशाखिकाभिर्नवीनमानवसुमेधयैव ॥

१३६. शतह्रदादीः प्रभूतशक्तीर्वशंवदा इव विधाय सुधियः ।
सृजन्ति चित्राण्यनेकवस्तून्यभूतपूर्वाण्युपज्ञया ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

१३७. प्रयान्ति यानैः प्रभूतशक्तिभिरतीतमारुततरोभिरधुना ।
प्रकृष्टशक्तिभिरनेकयन्त्रैर्विवर्तयितुमपि जगद् यतन्ते ॥

१३८. स्वनिर्मितैराणवास्त्रजालैर्विदेशविज्ञानशास्त्रनिपुणाः ।
परस्परस्पर्धयैव दग्धुं समुद्यतन्ते जगत् समस्तम् ॥

१३९. अकालविलयं विधातुमधुना समुद्यतान् तव समक्षमेव ।
विलोकयन्नपि तमामुदास्से कुतोन्वदग्ध्वा ललाटलोचन ॥

१४०. जगात्पिशाचैर्विनर्तितुं तैः किमुत्सहेथास्त्वमप्यधीश्वर !
विधातुमिच्छन्त्यमी प्रबुद्धा जगत् समस्तं श्मशानवाटीम् ॥

१४१. गभीरसंसारवारिराशौ विरुद्धविज्ञानवायुरधुना ।
प्रवाति विपरीतमेव जीविततरी नितान्तं विदोलते भो ॥

१४२. विवेक एव क्षमो निरोद्धुं मनुष्यहृत्तलजरद्विमोहम् ।
निहन्तुमन्धं तमो नु कृत्स्नं विना समर्थो दिवाकरे कः ॥

१४३. तव प्रभावं तपस्समेधितनिजात्मशक्तिस्सुधीरवैति ।
अवैतुमीष्टे पिकोऽयमेकः रसालपल्लवरसैकसारम् ॥

१४४. गुणा महान्तोऽप्युदात्तचरितं विना न भान्ति प्रभो ! जनस्य ।
कथं लसेयुस्स्त्रियो विलासा विहाय यौवनविकासरेखाः ॥

१४५. जनस्य दोषो यथा विभाति स्फुटं तथा नहि गुणो महानपि ।
कलङ्क एव स्फुटं हिमांशोर्विभाति न तथा पुनः प्रसादः ॥

१४६. विधातृसृष्टे रहस्यतत्त्वं विरक्तेवावगच्छतीश्वर !
उदात्तजाति प्रसूनसौरभमवैति नासा न दृक्कदाऽपि ॥

In Public domain. Digitization Muthulakshmi Research Academy

१४७. न नास्तिकानां समागमेऽपि त्वदेकतानो जहाति भक्तिम् ।
न काकसङ्गतिमुपेयिवानपि पिको जहीते स्वरं स्वकीयम् ॥

१४८. महाशयानामतीव विशदीकरोति सुगुणान् महेच्छ एव ।
हरित्सु नूनं समीर एव प्रसूनसौरभमुपस्करोति ॥

१४९. विदूषणं यः करोति भवतो विदूषणं तत्र तस्य किं स्यात्
विहायसोपरि रजो विकीर्णं स्वमस्त एवप्रभो ! पतेत्तत् ॥

१५०. वरैरनेकैः प्रमोदयसि मां जयैरनेकैस्तनोषि महितम् ।
अपायरहितं भयादिरहितं व्यथादिरहितं करोषि मां त्वम् ॥

१५१. त्वमुत्तमर्णो ममानवरतं तवाधमर्णो महेश्वराहम् ।
ऋणं स्वकीयं प्रतिग्रहीतुं न पीडयसि मां कदाऽपि शम्भो ॥

१५२. अनादिकालादनेकवेश्मसु अनेकविषयेष्वनेकधा त्वम् ।
तथाऽपि कुरुषे बहूपकारान् शिवाधुनाऽपि प्रतिक्षणं मे ॥

१५३. कुरुष्व हृदयं समाहितं मे कुरुष्व हृदयं समुन्नतं मे ।
कुरुष्व हृदयं किस्वरं मे विभास्वरं मे कुरुष्व हृदयम् ॥

१५४. प्रमोदपूर्णं स्वजीवितं कुरु समस्तसम्पत्सुखास्पदं कुरु ।
प्रभावभरितं स्वजीवितं कुरु स्वजीवितं कुरु सदानपायम् ॥

१५५. मनस्समाविश वचस्समाविश वपुस्समाविश महस्समाविश ।
विवेकमाविशविधानमाविशममाखिलस्वं समाविश त्वम् ॥

१५६. विराजमाना विशुद्धवपुषा विभासमाना विशिष्टवचसा ।
विमोदमाना विरक्तमनसा विवेकिनस्ते प्रिया भवन्ति ॥

In Public domain. Digitization Muthulakshmi Research Academy

१५७. गुणक्रियामूर्त्युपाधिरहितो गुणक्रियामूर्त्युपाधिसहितः ।
मिथोविरूद्धैः क्रियागुणैर्भुवि विना भवन्तं प्रवर्तते कः ॥

१५८. अनन्तशक्तिभिरनन्तमूर्तिभिरनन्तवृत्तिभिरधीश ! राजसि ।
अनन्तभूतिभिरनन्तवीतिभिरनन्तरीतिभिरुपास्यसे त्वम् ॥

१५९. तवैव रोचिस्समावृणीते समाहितं मां तवैव रोचिः ।
दृशैर्निषीदति मुखे विनृत्यति विभासते हृदि तवैव रोचिः ॥

१६०. त्वदीय रोचिर्मरीचिवीचीपरीतमिदमपि जगद् विराजति ।
विभाति दहरे विभाति संविदि विभाति वदने तवैव रोचिः ॥

१६१. अपार रोचिर्मयप्रवाहे तरङ्गवन्मम विभाति रोचिः ।
तटावुभावपि विदारितौ भवदुदाररोचिःप्रवाहतरसा ॥

१६२. स्थिरा मनोज्ञा तवैव सुषमा मुखे विनृत्यतु सदोन्मिषन्ती ।
त्वदीयसुषमातलात्कृतेश्शिव ! ममापि चेतो विलालसी तु ॥

१६३. महेश गुञ्जसि मदीयहृदयारविन्दकोशे मिलिन्दवत् किम् ।
पिपाससि त्वं मरन्दमधुना मुकुन्द ! कीदृक् वद प्रभो !मे ॥

१६४. निवादयति मे मनोविपञ्चीमुदात्तसंवित्सतीमतल्ली ।
विकस्वरस्वरतङ्गभङ्गा मिथो विकीर्णा नदन्ति बहुधा ॥

१६५. सुगीयतामिति यदादिशस्त्वं तदा मुदा मम हृदा विदीर्णम् ।
दृगश्रुभरिता वपुस्सवेपथु सगद्गदं मम वचोऽपि जातम् ॥

१६६. अनादिकालादनन्तजन्मसु सितासिंत यत् समार्जितं तत् ।
समस्तकर्म स्वयंद्रुतं सत् रसस्वरूपं दरीधरीति ॥

In Public domain. Digitization Muthulakshmi Research Academy

१६७. ममापि गीतिर्जहात्यलङ्कृतिरतिं तव स्तुतिपरिष्कृतात्मा ।
न डम्बरालङ्क्रियामदोऽपि स्पृशेत् कदाऽपि त्वदीय सविधे ॥

१६८. अलङ्कृतिस्साकरोति विघ्नं हठान्निपतिता त्वदीयमिलने ।
तदारभट्या निगीर्यते ते वचोऽपि सुतरामतीव मन्ये ॥

१६९. मदीयकविता जहाति गर्वं क्रमेण भगवन् ! तवोपकण्ठे ।
गृहीतमधुना पदं शरण्यं मया त्वदीयं महाकवीश्वर! ॥

१७०. पदार्थगरुतौ विधूनयन्ती स्वसाधना सवदुपास्तिरूपा ।
अमन्दसम्मदसुधाप्रवाहे महेश! विजरीहरीति सम्प्रति ॥

१७१. उदात्तगीत्या किमीश ! शक्तस्तवान्घ्रिसविधे महेश! वस्तुम् ।
स्वगीतिरियमपि मनः प्रमोदं श्रवःप्रमोदं प्रसौति किं ते ॥

१७२. दुरापमेव त्वदीयचरणं स्वगीतिगरुदञ्चलेन नूनम् ।
उपास्तिरेषा स्पृशत्यजस्रं प्रमोदभरिते विलीयते त्वयि ॥

१७३. महेश ! गानप्रमोदमतस्तरामहं विस्मरामि सर्वम् ।
सखेति रागात् भवन्तमधुना वयस्य इति संब्रवीति चित्तम् ॥

१७४. स्वबान्धवा इति वदन्ति ये ये त एव बन्धनविमोचनात् प्रति ।
दृढं हि बध्नन्त्यहो स्वयं मां विमोहपाशैर्विलोकयेश्वर ॥

१७५. य एव बन्धात् विमोचयेल्लघु नरं स एव स्वबान्धवस्स्यात् ।
यथार्थबन्धुस्त्वमेव शम्भो ! यतो हि बन्धान्मुमोचयिषसे ॥

१७६. श्रितावने ध्रुवमधीश्वर ! त्वद्यते न कोऽपि प्रपञ्च अस्मिन् ।
विमुक्तकण्ठं ब्रवीमि कोऽप्यध न मद्ये दुष्कृतादिविषयम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१७७. स्थलेषु विविधेष्वहंमत्वं निपातयति मय्यसावविद्या ।
ततो हि रागादयो यथेच्छं प्रकुर्वते मन्मनोधिकारम् ॥

१७८. ऋणार्णवृत्या नयामि कालं नयामि जीवनमशान्तवृत्त्या ।
प्रतिग्रहेण हि विशीर्यते मे करोषि बहुधा बहुत्र बन्धो ॥

१७९. ऋणात् तृणादपि निकृष्टमिव मां वधीरयन्ति प्रधीश ! केचन ।
ऋणानुतापं सहे न बन्धो ! द्रुतं प्रभो ! मामृणाद्विमोचय ॥

१८०. किमप्यतीव प्रभो ! भयं मे प्रविश्य चेतस्तुदत्यजस्रम् ।
हिनस्ति काऽपि व्यथा मनो मे दयस्व बन्धो दयस्व बन्धो ॥

१८१. ऋणातिदाहो हिनस्त्यजस्रं प्रशान्तता मे ततो विलुप्यति ।
निगूढमेवं नयामि कालं न जायते मयि कुतो दया ते ॥

१८२. अहंत्वबुद्ध्या त्वगस्थिशोणितवसादिपिण्डे ममत्वबुद्धया ।
गृहात्मजादिष्विह प्रवृत्तो बहूनि दुरितान्यधीश कुर्वे ॥

१८३. पथा नु केन प्रयामि कुह वा प्रयामि नाद्यावधीश जाने ।
अहं तु तदिदं वतानुकम्पां कुतो न कुरुषे न वेद्मि बन्धो॥

१८४. विधेर्विलासं किलातिगन्तुं न कोऽपि धरणा बलं भवेदिति ।
यदेव कर्म त्वया कृतं तत् त्वमश्नुया इति किमीश वदसि॥

१८५. वशंवदस्त्वं विधेर्भवेर्वा वशंवदस्ते विधिर्भवेद्वा ।
वशंवदस्त्वं विधेर्भवेद् यदि तदा न च स्यात् प्रधानता ते ॥

१८६. वशंवदस्ते विधिर्भवेद् यदि विधेर्विलासं निरुन्धि शीघ्रम्
अजस्रमनयोरुरीकरोषि प्रधीश कतरद् वदाधुना मे ॥

In Public domain, Digitization Muthulakshmi Research Academy

१८७. अहन्त्वरहितो ममत्वहितः फलाभिलाषं विहाय विद्वान् ।
महेश्वर ! त्वन्मयस्य जगतस्सदैव कर्तुं यतेत सेवाम् ॥

१८८. त्रिभिः प्रमाणेर्जगत्स्वरूपं निजस्वरूपं परस्वरूपम् ।
बुधो विदित्वा विमृश्य सारं परं गृहीत्वा भजेद् विमुक्तिम् ॥

१८९. जडे निजात्मप्रथां विषादे सुखोपलब्धिं दुरर्थराशौ ।
सदर्थधिषणामनित्यवस्तुषु करोत्यविद्वान् स्थिरत्वबुद्धिम् ॥

१९०. त्वगस्थिमज्ञावसास्त्रभेदः पुरीषराशौ करोति मूढः ।
अहम्मतिं, तद्विलक्षणं स्वस्वरूपतत्त्वं बुधोऽवगच्छति ॥

१९१. प्रमादरोगालसत्वसंशयविमोहमिथ्याग्रहादयोऽमी ।
त्वदाप्तिविषये महान्तराया भवन्ति विक्षेपवृत्तयो नः ॥

१९२. यथाऽपकृष्टं पृथङ् न तिष्ठति जले तु शैवलमसावविद्या ।
तथाऽऽवृणोति द्रुतं पराङ्मुखमपीह सुधियं क्षणप्रमादात् ॥

१९३. परात्मसाक्षात्कृतौ प्रपन्नः कदापि नैव क्रियात् प्रमादम् ।
प्रमादमेव ब्रवीति मृत्युं सचेतसां किल सनत्कुमारः ॥

१९४. विकारविषयप्रवृत्तमात्रं विलोक्य दिव्यस्वरूपमिदमपि ।
निजात्मविस्मृतिरपीत्वरीव प्रतारयेत्तं क्षणप्रमादात् ॥

१९५. पुमान् विरक्तस्समाधिमर्हति समाहितोऽर्हति दृढप्रबोधम् ।
प्रबुद्ध एव स्वबन्धमुक्तिं विमुक्त एव स्थिरं प्रमोदम् ॥

१९६. बहिर्निषेधे मनः प्रसादः मनः प्रसादे परावलोकः ।
परावलोके स्वबन्धनाशः स्वबन्धनाशे भवेद् विमुक्तिः ॥

In Public domain. Digitization Muthulakshmi Research Academy

१९७. विराग मय्या कृपाणलतया य एव विषयग्रहं निहन्ति ।
स एव पारं भवाम्बुराशेरविघ्नमेति प्रभोऽनपायम् ॥

१९८. विषादहेतुं नितान्तकलुषा मनात्मचिन्तां विहाय विद्वान् ।
विमुक्तिमूलं विचिन्तयति सम्प्रमोदपूर्णं परात्मतत्त्वम् ॥

१९९. परात्मनि त्वयि विशुद्धसम्मदसुधासमुद्रे जगत्तरङ्गाः ।
अनादिमायामरुत्प्रकोपात् पुरोभवन्त्यपि तिरोभवन्त्यपि ॥

२००. करालविषयोरगैर्विदष्टं विमूर्च्छितं लेलिहानभूषण ।
कृपादृगञ्चलसुधातरङ्गैररं समुज्जीवय प्रभो माम् ॥

२०१. कदाऽपि लोकायतप्रचारं करोति शम्भो ! मनो मदीयम् ।
कदाऽपि वैभाषिकं मनो मे कदाऽपि सौत्रान्तिकं व्यनक्ति॥

२०२. कदाऽपि विज्ञानवादमीट्टे कदाऽपि शून्यं वृणोति शम्भो ।
कदाऽपि रत्नत्रयं स्तवीति प्रभो ! जिनीयं मनो मदीयम् ॥

२०३. प्रधानमेव प्रधानमिति मे बहुत्र वादं मतिः करोति ।
जगन्निमित्तं प्रभो ! भवन्तं तथाऽनुमेयं ब्रवीति चित्तम् ॥

२०४. न चेश्वरस्य प्रधानतेति व्यनक्ति कर्मैव च प्रधानम् ।
शरण्यमिति तत् समाश्रयन्त्विति जनान् मनो मे प्रबोधयत्यपि॥

२०५. कदाऽपि ब्रह्मा ब्रवीति सत्यं जगत्तु मिथ्येत्यसौ मनीषा ।
कदाऽपि चिदचिच्छरीरकत्वं हरेः परत्वं क्वचिद् ब्रवीति ॥

२०६. कदाऽपि पञ्चकमिदोपलब्धिं विमुक्तिहेतुं मनो मिनोति ।
रसाग्नितत्त्वप्रपञ्चमुररीकरोति बुद्धिः प्रभो ! मदीया ॥

In Public domain. Digitization Muthulakshmi Research Academy

२०७. कदाऽपि शक्तिप्रधानतामपि विवृण्वती सा विनोदमेति ।
कदाऽपि सोऽहं प्रतीतिमनुबोभवीति धिषणा प्रभो मदीया ॥

२०८. सदेति दासोऽहमीश! मनुते ममान्तरात्मा कदाऽपि बन्धो ।
इतीव चित्रप्रतीति भूम्ना विलालसीति प्रभो मनीषा ॥

२०९. स्थलानि षड्वा न वेद्मि शम्भो ! न लिङ्गमङ्गं न चापि जाने ।
अनाद्यविद्यावशंवदोऽहं यते न तत्त्वं कदाप्यवैतुम् ॥

२१०. विमोहरज्ज्वा निबद्धमेनं पशुं कदा वा विमोचयसि भो ।
न वीरभावं न दिव्यभावं समीहितुं त्वां भजे शरण्यम् ॥

२११. विमर्शतत्त्वं प्रकाशतत्त्वं न वेद्मि बन्धो ! न सामरस्यम् ।
न कौलतत्त्वं क्रियाद्युपायान् न वेद्मि दीनं महेश ! पाहि ॥

२१२. न कारणं वा त्रिधा विभिन्नं न वेद्मि कार्यं द्विधा न योगम् ।
विधिं न जाने न चापि दुःखान्तमीश! तत्त्वं निबोधय त्वम् ॥

२१३. पिधेहि मोहं प्रदेहि कान्तिं निदेहि दान्तिं विधेहि शान्तिम् ।
लुनीहितृष्णां पुनीहिधिषणां जहीहि कोपं जहीहि मा माम् ॥

२१४. हरानुतापं किरानुकम्पां स्मरात्मदासं चराग्रतो मे ।
त्यजान्यभावं सृजात्मशक्तिं व्रजात्मबन्धुं प्रजाहितैषिन् ॥

२१५. निरालमानस मरालकर्बुरकराल ! पेशलमृणालमञ्जुल ।
अहीनकङ्कणदहीनमण्डन ! शशीनलोचन ! निहीनपालन ॥

In Public domain. Digitization Muthulakshmi Research Academy

२१६. सहोरकोकिलसहारमर्दितशतेर ! वर्दितपतेर ! जय जय ।
उदारमञ्जुलमदाररञ्जित ! कठेरसञ्जित कुठेर जय जय ॥

२१७. अवाप्तगरिमा समात्तलघिमा समृद्धमहिमा समञ्चदणिमा ।
अनन्तभूमा मनोज्ञधामा पृदाकुदामा विभातु कोऽपि ॥

२१८. जगच्छरण्यं जगद्रमण्यं जगद्भरण्यं जगद्वरेण्यम् ।
जगत्कलत्रं जगत्पवित्रं जगत्तनुत्रं भवन्तमीडे ॥

२१९. हरेण गङ्गाधरेण करुणाकरेण यमिनां वरेण गुरुणा ।
परेण सदसत्परेण चिन्मे परात्परेण च रमेत भवता ॥

२२०. ऋतेन सुजनाद्रुतेन धिषणायुतेन निगमस्तुतेन महताम् ।
मतेन सुमनोरतेन दिविषन्नुतेन भवता रमेत चिन्मे ॥

२२१. शिवाय लालितशिवाय गिरिजाधवाय नतमाधवाय कवये ।
भवाय भावितभवाय सुमनोभवाय भवते नमो नमोऽस्तु ॥

२२२. जयाय मृत्युञ्जयाय शत्रुञ्जयाय चेतोजयाय विधये ।
मयाय चिदचिन्मयाय करुणामयाय भवते नमो नमोऽस्तु ॥

२२३. चराचरात् कृतचरचरात् भृतचराचरात् हृतचराचरादपि ।
मुदाकरात् धृतसुधाकरादहमुपैमि शरणं कदाऽपि न परम् ॥

२२४. मनोहरान्मुनिमनोहरात् श्रुतिमनोहरात् स्मृतिमनोहरादपि ।
शिवङ्करादरिभयङ्करादहमुपैमि शरणं कदाऽपि न परम् ॥

२२५. प्रियस्य जनताप्रियस्य सुमनःप्रियस्य विनतप्रियस्य नित्यम् ।
लयस्य जगदालयस्य कल्पितलयस्य दास्यं तवैव कुर्वे ॥

In Public domain. Digitization Muthulakshmi Research Academy

२२६. मनीषिणामपि मनीषिणो जनहितैषिणामपि हितैषिणोऽहम् ।
मनस्विनामपि मनस्विनस्ते पदाब्जदास्यं सदा करोमि ॥

२२७. त्रिलोकपाले कलालवाले कृशानुफाले कृपाविलोले ।
अनन्तलीले यशोविशाले भवत्यधीना रमेत चिन्मे ॥

२२८. उमाभिरामे गुणाभिरामे जगद्धिरामे विरोधिभीमे ।
परास्तकामे नताब्धिसोमे भवत्यधीना रमेत चिन्मे ॥

२२९. उदात्तकवितापटुत्वशक्तिं दिशत्वजस्त्रं सरस्वती मे ।
ददातु लक्ष्मीश्श्रियं सदा मे सभासु विजयं ददातु दुर्गा ॥

२३०. विपत्सु रक्षतु तव त्रिशूलं दिश त्वजगवं समस्तविजयान् ।
गजाननस्स्यतु विभिन्नविघ्नान् षडाननो मे ददातु शक्तिम् ॥

२३१. तिरस्करिण्या कदाऽपि चान्तर्हितात्ममूर्तिर्भवान् विभाति ।
महेश ! मृदुरेखयैव मेचक पयोदपिहितो यथंऽशुमाली ॥

२३२. क्षमस्व सर्वान् ममापराधान् रमस्व संविद्विलासवत्या ।
हृदंवुजान्तर्हितस्वरूपः प्रवर्तयत्वं शुभे च कर्मणि ॥

२३३. पवित्र वाराणसीश ! शम्भो ! नमो नमो विश्वनाथ ! शम्भो ।
सदान्नपूर्णासनाथ ! शम्भो ! प्रसीद गङ्गाधरात्मबन्धो ॥

२३४. वारणसीविश्वनाथविभूतिपरिवादिनी ।
कल्पतां सम्मुदे नृणां कृतिर्विजयसारथेः ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

नमोवाकः

१. कोदण्डराम रघुराम गुणाभिराम
साकेतराम शिवराम मनोभिराम
भद्राद्रिराम जितिवीरकुठारराम
श्रीबल्सुकोण्ड रघुराम नमो नमस्ते ॥

२. राकासुधाकरविजित्वरसुन्दरास्य
राजीवलोचन नमज्जनपारिजात
सीतासतीविमलमानसराजहंस
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

३. यस्मादिदं जगदुदेत्यनुपाति यस्तु
यस्मिन् लयं समुपयाति समस्तमेतत्
तस्मै यजाय चिदचिन्मयविग्रहाय
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

४. वेदा वदन्ति यमधीश्वरमेकमेव
यस्मै च शासति नमश्चतुराननाद्याः
तस्मै यजाय चिदचिन्मयविग्रहाय
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

५. यन्नाभिपङ्कजजनिजगतां विधाता
जातो यदङ्घ्रिजनितां यरितं दधार
शर्वः पुराणपुषाय परात्पराय
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

६. यत्पादपङ्कजरजःप्रसृतेश्शिलाऽपि
स्त्रीरूपमाप शबरी त्वमरी बभूव
यस्य प्रसादबलतः परमाय तस्मै
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

७. मूकं करोति धिषणं विदधाति पङ्गुं
जङ्घालमावितनुते धनहीनमिन्द्रम्
यस्य प्रसादमधुरा दृगजाय तस्मै
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

८. यन्नाममन्त्रमहिमोपगतात्मविद्या-
स्त्यागादयो महितकीर्तय एव मुक्ताः
त्वामेव तं प्रतिदिनं हृदिभावयेऽहम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

९. यत्सत्कृपारसविशेषत एव
पोतराडान्ध्रवाचि परभागवतानुवादम्
कृत्वा यशोवपुरवाप तवान्तिकञ्च
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

१०. नामामृतं तव निपीय समस्तलोको
द्राक्षासुधामधुरिमाणमधःकरोति
सत्यं ब्रवीमि न हि कोऽपि समस्तवेति
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

११. वल्मीकजप्रभृतिभिः कतिभिः कवीन्द्रै-
राकल्पिता तवकथा कतिधापि रम्या
आकर्णिताऽपि पठिताऽपि नवेव भाति
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१२. भक्तानुतापशमने परिशुद्धसत्त्वे
ज्ञानादि षड्गुणयुते रमणीयरूपे
भक्तिर्भवत्यमलिनाऽव्यभिचारिणी स्यात्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ।

१३. सत्यात्मदर्शनमिति त्वदधीनदिव्य
प्रेमप्रवाह इति यां कथयन्ति विज्ञाः
भक्तिर्नियच्छतु परा हृदयं मदीयं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ।।

१४. कामेतरा सततचित्तरसस्त्रवन्ती
सर्वक्रियाफलविहानसमेधमाना
सविन्ममास्तु भगवन् भवदेकताना
इल्लन्दकुण्ट रघुराम नमो नमस्ते ।।

In Public Domain. Digitization by Muthulakshmi Research Academy

१५. नाथ त्वदन्यविषयेष्वरतिर्नितान्तं
त्वय्येव दिव्यरतिरस्तु निरन्तरं मे
नातःपरं किमपि वस्तु कदाऽपि याचे
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१६. विश्वाकृतेस्तबहृदा वपुषाच वाचा
पूजादिषु प्रणिहितामनुरागरूपाम्
दिव्यां मतिं परम भक्तिमयीं प्रदेहि
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१७. मन्दारसौरभमयं मकरन्दपूर्णं
हय्यङ्गवीनसदृशं घनसारगौरम्
चेतो मदीयमुपदीकृतवानहं ते
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१८. ज्योतिर्मयैरविहतद्युतिभिर्मुदाऽहं
नीराजयामि निजचिन्मयदापकैस्त्वाम्
प्रीत्या गृहण मम नाथ रमासनाथ
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१९. लक्ष्यस्य सिद्धिरभवन्न ममाधुनाऽपि
नानाजनीर्गतवतोऽपि तपः कृतोऽपि
पापस्य कस्य हि फलं न च मां जहाति
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

२०. जीवो यदा स्वपरिरक्षणयत्नचिन्तां
जह्यात् तदैव तमवेदित वक्ति शास्त्रम्
कस्याप्यसौ भुवि भवेत्परिपक्कबुद्धिः
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

२१. नैवार्थपञ्चकविवेचनमेकदाऽपि
कृत्वाऽऽर्यसम्तमतं समुपाश्रयेऽहम्
मामीदृशं कथमवापयसि स्वधाम
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

२२. योगादिसाधनविधौ न मम प्रवेशः
नैवास्ति शास्त्रवितते मयि वासनाऽपि
यद्यप्यकिञ्चनममुं परिपाहि मूढम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

२३. स्वेच्छाविहारनिरतं विषयप्रवृत्तं
दोषोपरक्तचरितं कुमतानुरक्तम्
उन्मत्तचित्तमव मामगतिं विमूढम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

२४. चेतोऽविचार्य सदसत्कुरूते यथेच्छं
बुद्ध्या निरुद्धमपि यत्नशतैरजस्त्रम्
नास्तिक्यमेव जयति स्वयमास्तिकत्वं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain - Digitization Muthulakshmi Research Academy

२५. [illegible] हृदयाधिराज्य-
माक्रम्य भाषयति मां परुषाक्षराणि
पापे प्रवर्तयति पीडयते यथेच्छं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

२६. पश्यन्तमप्यहरहः पुनरेव मां त्वां
नैवेक्षते बत जगन्मयमेष मूढः
ज्योतिर्मयीं वितर मे दृशमात्मनीनां
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

२७. त्वद्दत्तमेव सकलं मदुपार्जित चे -
त्यौद्धत्यमावहति पामर एष नूनम्
कस्मादुपागमदियं ममता न जाने
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

२८. अश्नामि तत्तदखिलं भवतैदंत्तं
त्वद्दत्तमेव न हि दातुमुरीकरोति
विश्वासघातुकमिदं हृदयं कृतघ्नं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

२९. अन्तर्बहिस्सकलवस्तुषु सञ्चरन्त -
मन्तः प्रविश्य विदुषां मतिमीरयन्तम्
अन्तारमारतमयेय कदा भवन्तं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

३०. कोटीर्जनीर्गतवतो मम तारणाय
नानाजनूंषि गतवानपि मे तथाऽपि
संवित्प्रकास्तिरूदभून्मयि नैव पश्य
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

३१. त्वत्कल्पितान्यपि परं विमुखीभवन्ति
वागादिकानि करणानि तव स्तवादौ
अज्ञानमेषु कथमापतितं न विन्दे
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

३२. श्रेयोविरेधिन इमे विषयेन्द्रियेषु
रागादयो दुरधिकारकृतश्चरन्ति
अन्धं मनोभवति देहि सदात्मशक्तिं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

३३. आशामरुस्थलमरीचिकयाऽवकृष्टं
निस्सारसंसृतिमरुं परितो भ्रमन्तम्
दीनं नयैनमचिरादमृतप्रवाहम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

३४. दुष्टा इमा विषमभौतिकवासना मां
विभ्रामयन्ति परितो हरितो, हरन्ति
ज्ञानं, प्रमत्तमवशं दययाऽव देव
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

३५. स्वामिन्मनोमुकुरविस्फुटभासमाना
In Public domain. Digitization Muthulakshmi Research Academy
मात्मानुभूतिमपिधाय तिरस्करिण्या
रोधं चितो विकुरुते भववासनाऽसौ
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

३६. मायाशारावपिहितो निजचित्प्रदीपो
नो भाति भासयति नैव पदार्थजातम्
भग्नावृति प्रकटयाशु निजं स्वरूपम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥३६॥

३७. स्वामिन्ननेकजनितो भववासनाऽसा
वाविश्यमां न विजहात्यपि चिन्तयन्तम्
त्वामेव माधव दयस्व मयि प्रपन्ने
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

३८. अल्पं त्वधीतमथ भावितमल्पमेव
तत्राल्पमाचरितमप्यहमेव सर्वम्
वेद्मीति भावयति माद्यति चायमात्मा
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

३९. निस्सारसंसरणदुस्तरकर्दमान्तर्मग्नं
सुदुस्सहरुजादि निपीड्यमानम्
दीनातिदीनमगतिं दृतमुद्धरैनम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

४०. दौर्बल्यसंकसुतालसतादिरोगतापाः
क्षणादिव हि मां ग्रसितुं यतन्ते
त्रायस्व मामगतिकं बहुमोहपात्रम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

४१. मायां विनैव विजयस्य यथावदात्मरूपं
प्रदर्श्य परितुष्टिमधा यथा त्वम्
सन्दर्शयेश्वर तथैव ममापि रूपं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

४२. निष्कामकर्मनिरतास्तव सन्निधानं
यान्तीति वैष्णवशिखामणयो भणन्ति
इच्छावशंवदममुं कथमेति संवित्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

४३. संवित्रयीमपहरन्तममुं विमोह -
सोमासुरं विदलयन्नवजीलोकम्
पाठीनरूपपरिबृंहितकेवलात्मन्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

४४. प्राप्तुं प्रमोदममृतं दृढयोगवार्धिं
ज्ञानाचलेन धृतिवासुकिनाऽयमात्मा
मथ्नाति निर्वह तदीश्वर मूर्मरूपिन्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

४५. [illegible]वनिं [illegible] विधाय काम -
हेमाक्षदैत्यदयितस्तिमिराम्बुराशौ
सम्पातयत्यहह शाधि तमादिघोणिन्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

४६. मात्सर्यं हेमकशिपुं समदं प्रपन्न -
प्रह्लादपीडनपरं परिजृम्भाणम्
वक्षो विदार्य शमयोग्रनृसिंहमूर्ते
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

४७. लोभाह्वयं बलिनिशाचरसार्वभौम-
माशोद्धतं सुमनसः परिपीडयन्तम्
पाताललोकमधिपातय वामन त्वं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

४८. स्वेच्छाविधानमवलम्ब्य निरंकुशं हृद् -
राज्यं प्रशासति च काममुखारिभूपाः
संहृत्य तानवजगन्ति कुठारराम
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

४९. अज्ञानशाम्भवधनुर्लघुखण्डयित्वा
संविन्मयीं जनकजा तप आचरन्तीम्
तामुद्वह स्मरवसन्तजयन्तकान्त
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

५०. आत्मानुभूतिमिथिलावनिपालपुत्रीं
दुर्वारगर्वमयरावणराक्षसेशः
उद्वेजयत्यहह शाधि तमाशु राम
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

५१. देवादिदेव चिरकालवियोगतप्तामेतां
नितान्तरुदितां जगतीं स्वराधाम्
पाहि प्रभो मुरलिमोहन कृष्णमूर्ते
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

५२. स्वामिन् सखे हृदयकालिय एष वैर -
हालाहलं परिवमन् विधुनोति सर्वम्
आरुह्य तन्मदमपाकुरु बालकृष्ण
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

५३. कामादिकौरवनिपीडितमाप्तमित्रं
ज्ञानादिपाण्डवचयो विमलस्वभावम्
कर्तव्यकर्मणि निवेशय कृष्णमूर्ते
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

५४. पापं मनस्सुमनसां परिपीडनेन
नित्यं प्रहृष्यति विवेकपथं विहाय
बौद्धं प्रबोधमुपकल्पय बुद्धमूर्ते
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

५५. शेते सुखं श्रुतिहितार्य विघातभारं
निक्षिप्य दुर्मदजनेषु कलिर्दुरात्मा
हा हा सहेमहि न तत्कलिपुत्रपीडाम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

५६. उन्मत्तदुर्मत्महोद्धतदुष्टजाति -
रार्यान्निपीडयति तत्कलिकल्पितेयम्
निर्मूल्य तत्बलमिलामव कल्किमूर्ते
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

५७. स्वामिन् मिथः प्रकृतिपूरुषयोर्महाजि -
स्सम्पद्यतेऽथ कतरस्यजया भवेन्नु
लोके परिस्थितरतीव सुदुस्साहास्ति
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

५८. मिथ्योपचार कुशला अनृतप्रवृत्ता
आक्रान्ततत्तदधिकारपदाः प्रजालिम्
मायाविनः कतिपये परिपीडयन्ति
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

५९. संस्थापयन्ति भुवि रावणराज्यमेते
श्रीरामराज्यमभिधाय कलङ्कयन्ति
त्वन्नामधेयमहाहा किमुपेक्षसे भो
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

६०. अत्युन्नतिस्थितिमतिप्रगतिप्रदात्री
गीर्वाणवाङ् निखिलमानवकल्पवल्ली
प्रक्षीयते प्रतिदिनं परिवर्धयेश
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

६१. गीर्वाणवाक्कवितयाह्यसमर्थजीव-
यात्रामयं कुरूत इत्यवधीरयन्ति
स्वीयाः किमत्र करवाणि भवान् ब्रवीतु
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

६२. देहात्मभोगनिकरं परिहाय दूरा -
दारोग्यमप्यविगणय्य तदुद्यतं माम्
नैकोऽपि पृच्छति विनिन्दति केवलं भो
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

६३. निन्दावमानतनुतापदरिद्रतादीन्
सोढ्वाऽपि संस्कृतसमुद्धरणप्रचारम्
कुर्वन्तमीश कुरु मां सफलेप्सितार्थं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

६४. स्वामिन् परस्परविरोधविजृम्भमाणा
भावाः प्रभूय मन आकुलयन्ति भूयः
तद्घर्षणं शमय कल्पय चित्तशान्तिं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥६४॥

In Public domain, Digitization Muthulakshmi Research Academy

६५. मानावमानसुखदुःखसमानबुद्धेः
वश्येन्द्रियस्य सकलात्मविभावनस्य
वश्योऽसि तादृशदशां दिश देव मह्यं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

६६. द्वारणि तानि च नियम्य मनो निरुध्य
चेतस्यसून शिरसि साधु निधाय योगी
आनन्दमेति बत तत् किमुवेत्ति मूढः
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

६७. एतन्मदीयमिदमस्तु ममापि चेति
कांक्षत्यहो मम मनः क्षणसौख्यमेव
इच्छत्यनश्वरपदं न कदाऽपि मौढ्यात्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

६८. कीदृक्तपःकृतवती शबराङ्गना या
स्वोच्छिष्टमप्यमृतवन्मनसोपभोज्य
सद्यः परम्पदमवाप तव प्रसादात्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

६९. रागादिदोषरहिता अपि तापसास्ते
सम्मोहनाकृतिमवेक्ष्य तवाङ्गनावत्
मोहं गताः किल विभो मम काकथेह
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

७०. मायामनुष्यतनुमेत्य विशुद्धमेक -
पत्नीव्रतं त्वनुचरन् हितकर्म कुर्वन्
आदर्शधर्ममुपदर्शितवान्नराणाम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

७१. साधारणोऽपि शुनको भवदीयराज्ये
कर्मन्दि दुर्नय परिष्कृतिमेत्य सद्यः
सम्मानितो नयविदा भवता विधिज्ञ
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

७२. साधारणस्य रजकस्य मृषापवाद-
मादृत्य शुद्धचरितामपि जानकीं ताम्
लोकानुरञ्जनकृते वनमापयस्त्वं
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

७३. तातस्य सत्यवचसः परिपालनार्थं
राज्यं विहाय गतवानटवीं मुदैव
कोनूत्तमोऽस्त्यथ भवादृगिह प्रपञ्चे
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

७४. वर्ते न चेद्विमलकर्मसु तेषु तेषु
मन्मार्गमेव जनताश्रयते तदेति
मत्वाऽऽचरः किल कृतीर्जनसङ्ग्रहार्थम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

७५. यद्यत्समाचरति लोक इहोत्तमात्मा
तत्तत्समाचरितुमिच्छति लोक एषः
तद्भासि तत्तदवतारशतैस्त्रिलोक्याम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

७६. लोकानुतापशमनाय मनुष्यमूर्त्या
भान्तं भवन्तमतिमानुषशक्तिमीशम्
मिन्वन्ति मानवधिया कुधियो महेश
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

७७. ब्रह्मेश्वरादय इमे भवदंशलेशाः
कस्मिन्नपि स्फुटममीषु न पूर्णतास्ति
तत्तक्रियाकुशलतामददास्तथाऽपि
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

७८. लोकं प्रवर्तयितुमेव निजांशशर्व -
लिङ्गप्रतिष्ठितिविधौ त्वमभेदबुद्ध्या
प्रावर्तथाः किल शिवप्रियदेवदेव
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

७९. स्वामिन्नणोरपि भवान् विलसत्यणीयान्
मेरोस्ततोऽपि महतोऽपि भवान्महीयान्
स्पर्धेत कोऽनु भवता जगदीश्वरेण
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

८०. तत्तद्रसोचितकथोचितपात्रजात -
माकल्य्य जागतिकनाटकमादरेण
लोकेश नाटयसि जीवनटव्रजेन
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

८१. प्रारब्धवान् जगमिदं क्व नु वा कदा वा
क्वेयन्ति वोपकरणानि कदाऽर्जितानि
कीदृग्प्रयोजनमतस्तव वर्तते भो
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

८२. दुःखान्तरूपकमिदं प्रविधाय नूनं
पाश्चात्यपद्धतिमुपाक्षियवान् प्रभो त्वम्
किं प्राच्यपद्धतिरियं स्वदते न तेऽपि
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

८३. प्रख्यातजीवितमिदं किल नाठकं ते
जीवास्तु तत्र नटकास्त्वमिहोपदेष्टा
भोक्ताऽत्र कः खलु भवेद्वद तद्यथार्थम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ।

८४. विश्वं यदि त्वमसि तर्हि कुतो हि न स्यु-
स्तत्तद्विकारविदशा ननु कोऽनु भुङ्क्ते
चित्रं ह्ययोमयमिदं प्रतिभाति मे तत्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

८५. तं तं पदार्थमभिविश्य विराजसे त्वम्
स्पर्शेऽपि तस्य सुतरां न निभाससे त्वम्
चित्रातिचित्रचरितं किमु वर्ण्यते ते
इळन्दकुण्ट रघुराम नमो नमस्ते ॥

८६. ध्यानेन कश्चन निरीक्षत आत्मनि त्वां
ज्ञानने कश्चन निपश्यति भक्तियोगात्
साक्षात्करोति भजति द्विविधप्रपत्त्या
इळन्दकुण्ट रघुराम नमो नमस्ते ॥

८७. मूढाः परामनवगम्य विशिष्टवाचं
मिथ्योक्तिकूपपतिताः स्वयमेव मुक्तेः
दूरीभवन्ति कृपयोद्धरतान्मुकुन्द
इळन्दकुण्ट रघुराम नमो नमस्ते ॥

८८. संसारबन्धरहिता विमलास्त्वदीय -
कैङ्कर्यभोगमुपयन्ति सदैव नित्याः
देहाभिमाननिरता निरयं व्रजन्ति
इळन्दकुण्ट रघुराम नमो नमस्ते ॥

८९. मन्त्रार्थसारमवगम्य गुरोः प्रसादा-
न्नारायणार्चितमना नर एति मुक्तिम्
श्रीवैष्णवा उपदिशन्ति परत्वमेवम्
इळन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

९०. मिथ्याजगन्निखिलमित्यभिभाव्य चात्म-
रामानुभूतिरसिको नर एति मुक्तम्
अद्वैतिनः प्रणिगदन्ति मतं स्वकीयम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

९१. सर्वेश्वरः प्रभुरहं पुनरस्य दास
इत्यात्मनैच्यनिभृतो नर एति मुक्तिम्
माध्वा वदन्ति भगवन् परामार्थमेवम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

९२. रामानुजार्यकथितं मतमाश्रयेयं
किं शङ्करोक्तमथवा समुपाचरेयम्
मध्वप्रबोधितमथस्वमतं वदेश
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

९३. माभूत द्विषन्नुपकृती मम कोऽपि लोके
कस्यापि विद्विडिह मास्म कदाऽपि भूवम्
इत्यामिनोमि तदहं न तु साधयामि
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

९४. सत्यं शिवं मह इदं रुचिरं स्वरूपं
विज्ञाय सम्यगुपयन्त्यमृतत्वमार्यः
पश्यन्ति नैव कुधियो निपतन्ति
कूपे इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

९५. रामेश्वरः परमभागवतप्रपन्नः
राधात्मना परिणतश्शिव एव वेत्ति
प्रेमामृतस्य परमस्य रहस्यसारम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

९६. पूर्णः पुराणपुरुषः पुरुषोत्तमोऽसि
पूर्णात् त्वदेव समुदेति जगन्निपूर्णम्
पूर्णस्य पूर्णमुपदाय विभाति पूर्णम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

९७. यत्किञ्च विश्वमिदमप्यखिलं त्वदेका-
वास्यं न कस्य च धनं भवतीदमद्धा
कुर्वीत कर्म भवदर्पणपूर्णबुद्ध्या
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

९८. अश्नाति यद्दिशति यत्कुरूते जुहोति
यद्यत् तपस्यति महापुरूषः प्रपन्नः ।
तत्तत्समर्पयति तुभ्यमधीश्वराय
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

९९. स्वामिन्नहंकृतिमनेकविकारहेतुं
निर्मूलयत्यचिरमेव सचेतसां या ।
तद्भोग्यतैकनिरता परमाऽस्तु भक्तिः
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

१००. षड्विंशतिर्वरगुणाः परिपूर्णरूपा
यस्मिन् लसन्ति पदमेति परं स एव ।
नैकोऽपि मेऽस्त्यगतिके मयि संप्रसीद
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१०१. त्वद्दासचरणाम्बुजरेणुरूप-
मारोप्य यापयति कालमयं त्वदीयः ।
तद्रेणुभावमपि कल्पय भक्तवश्य
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१०२. कान्तारकण्टकपदेष्वटतोः पदोस्ते
तापः कियानुदभवन्मृदुलौ प्रभो तौ ।
संवाहयामि मम दर्शय चारूमूर्ते
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१०३. वीणां स्वमानसमयीमनुवादयन्ती
वाणी विकस्वपिकस्वरमञ्जुवाचम् ।
जिह्वांऽगणे कृतपदास्तुतिमादधातु
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१०४. मायोपगूहनसुखेन तवालमीश
किं वा न चालयति तत्परिरम्भसौख्यम् ।
वद्धोपगूहनमियन्मधुरं भवेत् किम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

१०५. दारिद्र्यदानवपति र्विकटाट्टहासं
कुर्वन् विनृत्यति समस्तगन्निवेशे ।
तत्पादमर्दनवशात् बहवो म्रियन्ते
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१०६. अस्पृष्टचापमकरो र्जमदग्निसूनुं
सत्क्षत्रियोऽप्युपगतस्त्वमिहाश्मरूपम् ।
क्षत्रं द्विजं भुवि विनाऽवति को नु धर्मम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ।

१०७. दारिद्र्यरोगपरितापशतानितूर्णम्
निर्मूल्य लौकिकसुखानि बहूनि दत्वा ।
अन्ते तवान्तिकमवापय मां स्वदासम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१०८. रूपं पयोमुचि दृशं रुचिरारविन्दे
तेजो रवौ भवत आननमिन्दुबिम्बे ।
पश्यन्विनोदमुपयाति ममायमात्मा
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१०९. मद्भावनाविरचितं मधुरं प्रपञ्चं
स्वामिन्नुपेहि विहराव यथाभिलाषम् ।
तत्रावरोधनलवो न हि चावयोस्स्यात्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

११०. स्वामिन्ननन्यशरणं शरणार्थिनीं
चिल्लक्ष्मीं मनस्सरसिजां मधुरस्वभावाम् ।
अङ्गीकुरुष्व दयितामुपभुङ्क्ष्व देव
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१११. चित्सुन्दरीमणिरियं परिरम्भरम्य-
स्वप्नावलोकन शतानि विलोकमाना ।
किं वाऽऽलपत्यहरहः किमुपेक्षसे भो
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

११२. स्वामिन् त्वदीयदयिता सततानुरक्ता
चित्सुन्दरी विहरे भवतैव नित्यम् ।
श्रृङ्गारिणी स्वशवर्तिधवेव देव
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

११३. आत्मानमात्मसुमनश्शयनीयशालां
संस्कृत्य रागकलिता तन सङ्गमेऽसौ ।
चित्सुन्दरी लसति वासकसज्जिकेव
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

११४. संकेतितं पदमवाप्य ततोऽप्यदृष्टे
हृन्नायके त्वयि विषीदति वञ्चितेति ।
चित्सुन्दरीह नितारामिव विप्रलब्धा
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

११५. मायाविलासललनापरिभोगाचिह्ना
न्यालोक्य भर्तरि भवत्यभिमानयुक्तता ।
चित्सुन्दरी विवदते कटु खण्डितेव
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

११६. दुर्दैवकल्पितभवद्विरहाग्नितप्तचित्ता
भवन्तमनिशं हृदि चितयन्ती ।
देशान्तरोषितधवेव चिदद्य खिन्ते
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

११७. त्वां पक्षपातयुत इत्यवधीर्य पश्चात्ता-
पान्विता विलपति स्वकृतापराधम् ।
ज्ञात्वा चिदद्य कलहान्तरितेव देव
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

११८. त्वां प्रत्यणु प्रतिभवं परिमार्गमाणा
दिव्यानुरागमधुरा तव सन्निधानम् ।
चित्सुन्दरीयमनुयात्यभिसारिकेव
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

११९. स्वामिन् सखे विमलशारदचन्द्रिकाऽहं
ज्योत्स्नायुतस्त्वमसि शारदपूर्णचन्द्रः ।
स्वामिन्नहं विमलदीधितिरर्यमा त्वम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

१२०. स्वामिन् प्रसुप्ततनुसन्तुटितास्मितादि
क्लेशैकहेतुरियमेव भवेदविद्या ।
तन्मोचनात् परमुपैति तवैव धाम
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१२१. क्लेशा इमे पृथु विषादकरा अविद्या-
हङ्काररागममताभिनिवेशमुख्याः ।
संयोगमस्यकरणं च भवेदविद्या
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१२२. बन्धं पुनः प्रकृतिपूरूषयोः निज-
स्वरूपोपलब्धिजनकं निगदन्ति विज्ञाः ।
संयोगमस्यकरणं च भवेदविद्या
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१२३. संयोगसंक्षयवशादमला विवेक
ख्यातिस्स्फुरत्यविहता निरुपद्रवा च ।
जन्मादिहानमियमेव करोति पुंसाम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

१२४. देहाद्यनात्मविषयेषु सदात्मतादि
सभावनां विनिगदन्ति बुधा अविद्याम् ।
बन्धा भवन्ति निखिला अनयैव पुंसाम्
इल्लन्दकुण्ट रघुराम नमो नमस्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

१२५. क्लेशादिकर्मपरिपाक दुराशयाद्यैः
न स्पृश्यते प्रकृतिमप्यतिवर्तते च ।
योऽयम् स ईश्वर इति प्रथितः परात्मा
इळन्दकुण्ट रघुराम नमो नमस्ते ॥

१२६. सिद्ध्यष्टकं सपदि भूतजयेन पुंसाम्
सिद्ध्येत् तदा स्वतनुसम्पदवाप्यते च ।
न स्यात्कदापि किल भौतिकधर्मबाधा
इळन्दकुण्ट रघुराम नमो नमस्ते ॥

१२७. सत्त्वात्मभेदकसबीजसमाधिभाजां
सञ्जायते सकलभाव गणेशितृत्वम् ।
सर्वज्ञता विलसतीतरदुर्लभा च
इळन्दकुण्ट रघुराम नमो नमस्ते ॥

१२८. स्वीयान्यदुः खसुखसम्पदवेक्षणेन
कारुण्यसौहृदविमोदविभावनातः ।
चेतःप्रसादविशदं भवति प्रजानाम्
इळन्दकुण्ट रघुराम नमो नमस्ते ॥

१२९. श्रीदेवदेवीपरिकर्मितोरस्स्थलं सदानन्दसुधाप्रवाहम् ।
संविन्महेलारसकेलिलोलं श्रीरामचन्द्रं शरणं प्रपद्ये ॥

१३०. षाड्गुण्यजुष्टं शतकोटिभास्वत्प्रभासमानं परवासुदेवम् ।
सर्वेश्वरं सर्वजगन्निवासं श्रीरामचन्द्रं शरणं प्रपद्ये ॥

In Public domain. Digitization Muthulakshmi Research Academy

१३१. अचक्रविभ्रान्तिमदण्डयोगां निरन्तरं जीवघटालिसृष्टिम्
कुर्वाणमाद्यं महसां निधानं श्रीरामचन्द्रं शरणं प्रपद्ये ॥

१३२. यस्सर्वभूतानि तदन्तरात्मा विभ्रामयन् राजति माययैव
परात्परं तं प्रणिधानगम्यं श्रीरामचन्द्रं शरणं प्रपद्ये ॥

१३३. यन्माययैवाजशिवादयोऽपि बद्धाश्चरन्तीह यदाज्ञया च
भूतानि सर्वाणि सदा चलन्ति श्रीरामचन्द्रं शरणं प्रपद्ये ॥

१३४. यस्सर्वावित् सर्वचरः परात्मा योगेश्वरो योगविदा वरिष्ठः
संविन्मयं तं चिदचिच्छरीरं श्रीरामचन्द्रं शरणं प्रपद्ये ॥

१३५. यस्सत्यकामोऽवितथप्रयत्नो यस्सत्यसङ्कल्प उदारबुद्धिः
नारायणं साधुपरायणं तं श्रीरामचन्द्रं शरणं प्रपद्ये ॥

१३६. नित्यानुभूता अपि नित्यनूत्ना अनन्तकल्याण गुणास्त्वदीयाः
मुहुर्मुहुर्मामलसं पुनन्तु सीतापते दाशरथे नमस्ते ॥

१३७. दासास्तु जीवास्स्वत एव विष्णोस्सर्वेश्वरस्येति वदन्ति वेदाः
मिन्वन्ति केचित् स्वयमीश्वरत्वं सीतापते दाशरथे नमस्ते ॥

१३८. प्रपन्नतापक्षपणैकदक्षः क्रव्यादशिक्षैकधुरीणधारः
त्वन्नन्दको मामवतादपायात् सीतापते दाशरथे नमस्ते ॥

१३९. यज्ज्यानिनदात् द्विषतां करेभ्यः भ्रश्यन्ति शस्त्राणि धनुर्वरेण्यम्
शाङ्र्गं त्वदीयं तदवेत्सदा मां सीतापते दाशरथे नमस्ते ॥

In Public domain: Digitization Muthulakshmi Research Academy

१४०. रामानुजस्सर्वमहान् महात्मा जगद्गुरुस्तत्त्वविदां वरिष्ठः
सदा मदीये हृदि सन्निधत्तां सीतापते दाशरथे नमस्ते ॥

१४१. मनस्विमान्यो महितप्रभावः प्रपत्तियोगप्रगतात्मशक्तिः
प्रसीदतान् मे भरतो महात्मा सीतापते दाशरथे नमस्ते ॥

१४२. निरुद्धबाह्यान्तररातिबाधः महामहस्कः प्रणवार्थवेत्ता
शत्रुघ्न एषोऽस्तु मम प्रसन्नः सीतापते दाशरथे नमस्ते ॥

१४३. त्रिलोककल्याणविधानदक्षः प्रकृष्टशक्तिः परतत्ववेत्ता
गुरूर्हनूमान् दयतां सदा मे सीतापते दाशरथे नमस्ते ॥

१४४. संश्लेषविश्लेषणयोर्जनानां नेतृत्वयोगैकनिमग्नचित्ता
सर्वेश्वरी मय्यनुकम्पतां श्रीः श्रीरामचन्द्र प्रियवल्लभा ते ॥

१४५. निरन्तरं मामुपगम्य दीनं माभीः कुमारेत्यभयप्रदानम्
कृत्वाऽवतु त्वत्करुणामयी सा श्रीरामचन्द्र प्रियवल्लभा ते ॥

१४६. वात्सल्यदृष्ट्या समुपेत्य बद्धान् दासान्नयन्ती तव सन्निधानम्
प्रसीदतान्मय्यपि देवदेवी श्रीरामचन्द्र प्रियवल्लभा ते ॥

१४७. क्षान्त्या सहस्वाक्षितदासदोषानिति प्रसादं तव कल्पयन्ती
प्रसीदतान्मय्यपि लोकमाता श्रीरामचन्द्र प्रियवल्लभा ते ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

तारावली

१. श्रीदेवीगरुडावुभावुभयतः स्थित्वा समभ्यर्हतो
नित्या द्वादश सूरयो यमनिशं दिव्यैस्स्तुवन्ति स्तवैः ।
आत्मानं चरितार्थयन्ति विबुधा यस्यैव कैङ्कर्यतो
ब्रह्माद्याः कलये परात्परमिमं श्रीवेङ्कटेशं प्रभुम् ॥

२. शश्वद्विश्वमहोदयस्थितिलयक्रीडाकरः कार्यतो
ब्रह्माम्भोरुहनाभभूतपतितामन्वेती यस्स्वेच्छया ।
शान्ता योगसमाहिता अपि महो यस्येक्षितुं न क्षमा
ईशे त्वां जडधीः कथं नु नवितुं श्रीवेङ्कटेश! प्रभो ॥

३. स्तोतुं न क्षमते चराचरसृडप्यास्यैश्चतुर्भिस्स्वयं
वैदिक्योऽपि न शक्नुवन्ति परमा वेत्तुं गिरो यन्महः ।
ईशानोऽपि दरीधरीति शिरसा यस्यैव पादामृतं
वन्दे वाङ्मनसातिगं तमनिशं श्रीवेङ्कटेशं प्रभुम् ॥

४. भारं योऽभिबरीभरीति सकलं सम्यक् प्रपन्नात्मनां
भक्तेभ्यो वितरीति विविधान् भोगानभीष्टन् सदा ।
आसक्तोऽपजरीहरीति सुधियां कष्टान्यरिष्टानि तं
सेवे निर्भरभक्तियोगसुलभं श्रीवेङ्कटेशं प्रभुम् ॥

५. कासारे शुचिवीचिकावलिरिव व्योम्नीव मेघच्छटा
भानौ दीधितिमालिकेव शशिनि ज्योत्स्नेव यस्मिन् चिरात् ।
वारं वारमुदेति नश्यति जगत्येषा तमेवाश्रये
कल्याणैकनिधानमादिपुरुषं श्रीवेङ्कटेशं प्रभुम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

६. यस्मिन् बुद्बुदसङ्कुलन्ति कुहचित् ब्रह्माण्डभाण्डान्यपि
क्वापि क्वापि पयःकणन्ति विबुधा ब्रह्मेन्द्ररुद्रादयः ।
संविच्छक्तिरनन्तलोकजननी वीचीयते क्वापि तं
सम्मोदामृतसागरं हृदि भजे श्रीवेङ्कटेशं प्रभुम् ॥

७. यो नीलोत्पलचारिमाञ्चितवपुर्ज्योत्स्नावदातद्युतौ
क्षीराम्भोनिधिपुण्डरीकपुटके माद्यन्मिलिन्देन्द्रति
वृन्दारा भ्रमरन्ति चासवति यत्पादारविन्दद्रव-
न्मन्दाकिन्यपि तं स्तवीमि वरदं श्रीवेङ्कटेशं प्रभुम् ॥

८. गुप्तास्ताश्श्रुतयस्त्वया गिरिवरः पृष्ठे घृतोऽधोद्धृता
क्ष्मा, क्रव्यान्निहतो नखैर्बलिरधो सद्मोपनीतं, स्थिरा ।
अक्षत्रा, क्षपितः पुलस्त्यतनयो धर्मोऽवितो द्वापरे
हिंसाऽस्तङ्गमिता, क्षमाप्ययवना श्रीवेङ्कटेश! प्रभो ॥

९. वेमव्यापृतिकर्मरीणमतुरीस्पर्शं तथा तन्तुस-
न्धानायासविशेषशून्यमसकृद्दुश्शासनेनासता ।
आकृष्टाम्बरताविपन्नमनसश्श्रीयाज्ञसेन्याः कृते
निर्माणं बहुवाससां त्वमकरोश्श्रीवेङ्कटेश ! प्रभो ॥

१०. स्वानालोचितदत्तदिव्यवरतो दृप्ताज्जगत्कण्टकात्
स्वस्मिन्नेव वरप्रभावमुपयज्ज्ञानात्तु भस्मासुरात् ।
सन्त्रस्तं शरणागतं परशिवं तस्य द्विषः प्लोषणात्
योऽगोप्सीत् निजमायया हृदि नुयां श्रीवेङ्कटेशं प्रभुम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

११. वोढुं गारुडभावमाकलयते स्तोतुं त्रिविद्यात्मता
माध्यातुं रिपुहृद्विदारणपरं श्रीपाञ्चजन्याकृतिम् ।
श्रीराधात्मकतापरिष्कृतिमसौ श्रीराजराजेश्वरो
रन्तुं येन तमाश्रये प्रियतमं श्रीवेङ्कटेशं प्रभुम् ॥

१२. ब्रह्माण्डावरणान्तवारिव परं, व्यूहं पयोराशिव-
द्यान्तर्यामिमयं स्वरूपममलं भूम्यन्तरं बूपमम् ।
उद्दामान् विभवान् प्रवाहतुलितान् अर्चावतारान्नदी-
वेशन्तानिव भावयन्ति विबुधाश्श्रीवेङ्कटेश प्रभो ॥

१३. व्यक्तास्ते स्वयमेव भान्ति महिताश्श्रीरङ्गदेशादिषु
प्रोक्ताः कास्तु महर्षिभिर्जनहितैराजन्ति गिर्यादिषु ।
भक्तैर्भिन्नरुचिप्रजैकसुलभा नैकाः प्रतिष्ठापिता
अर्चार्हाःप्रतिमा बहुत्र भगवन् ! श्रीवेङ्कटेश प्रभो ॥

१४. ब्रह्माण्डप्रततेः करोषि भगवन् ! सृष्टिं चतुर्थां तथा
रक्षां संहरणं परात्पर ! निमित्तोपादानमात्मेच्छया ।
वर्तेथास्त्वमभिन्नमद्भुतचरित्रं वेत्ति को वा तव
ब्रह्मेन्द्रादय एव विस्मितमुखास्त्वन्मायया वञ्चिताः ॥

१५. ऐश्वर्यादिगुणैस्त्वमेव भगवन् ! पूर्णोऽसि सुप्ता नृणां
शक्तीरात्मसु बोधयस्वविदिता, निर्मूलयन् धीमताम् ।
अज्ञानावरणं त्वदेकमनसामाविष्करोऽप्यात्मनो
भूतिं, त्वामखिलेश्वरेश्वर इति व्याख्यान्ति वेदाः प्रभो ॥

In Public domain. Digitization Muthulakshmi Research Academy

१६. द्वात्रिंशद्भयदानवोग्रवपुषे कल्पान्तकोटिज्वलज्
ज्वालोल्काकणदग्धसाल्वशरभप्रत्यर्थिरिञ्छोलये ।
चन्द्रार्धाञ्चितमौलयेऽलिकदृशे शूलं पिनाकं गदां
शार्ङ्गं चक्रमसिं दरं धृतवते पुंसे परस्मै नमः ॥

१७. सर्वत्रास्ति शिशो ! यदि हरिः स्तम्भे तमालोकये
त्याचक्षणममुं हिरण्यकशिपुं प्रह्लादरक्षातुरः ।
आविर्भूय निवेश्य चोरुयुगले वक्षो विदार्य क्षणात्
तीक्ष्णैस्त्वं नखैरैस्स रक्षसि जगत् श्रीवेङ्कटेश प्रभो ॥

१८. पञ्चास्यं प्रतिवक्त्रदृक्त्रययुतं कालाग्निकोटिप्रभम्
शत्रोरात्रन्धरं भुजैश्च दशभिश्शंखाक्षमाले गदाम् ।
खड्गं बाणदरारिशूलमुसलाम्भोजानि संविभ्रतं
मृत्युव्याधिहरं महोग्रवपुषं लक्ष्मीनृसिंहं भजे ॥

१९. ज्योतिर्मण्डलदीप्रदीप्रमहसं, ग्लौमण्डलान्तस्स्रवज्-
ज्योत्स्नापूरमनन्तपण्डलमहारोचिःप्रवाहम् सदा ।
नीलाम्भोधरमण्डलोन्मिषदुदारेरम्मदज्योतिषं
भास्वन्मण्डलदुर्निरीक्षवपुषं श्रीवेङ्कटेशं भजे ॥

२०. देवानामपि दुर्लभोऽसि सुलभस्त्या मे हरे ! त्वं कथं
चित्तं माधव ! शक्नुयामतिचलं रोद्धुं कथं प्रीणये !
त्वां वा त्वां निकषा वसेयमपि ते कारुण्यपात्रं कथं
भूयासं भगवन्निति प्रबलचिन्ताव्याकुलोऽस्मि प्रभो ॥

In Public domain. Digitization Muthulakshmi Research Academy

२१. मायान्धौ पतितं समुद्धर हरे नैकान्यतीतानि मे
जन्मान्येकमपि त्वदीयपदसेवार्थं मया नार्पितम् ।
जानेऽहं निरयाय पापमिति दुःखायानृतं सूनृतं
सौख्याय त्रिदशालयाय विमलं पुण्यं तथाऽपि प्रभो ॥

२२. सर्वेषामपि जन्मिनां तव हरे ! क्षेत्राणि देहा अपि
क्षेत्रेशोऽसि कृषीवलास्तनुभृतस्सीराणि खानि प्रभो ।
प्रारब्धानि कृषेः फलानि बहुधा स्फायत्प्ररोहास्पदं
बीजावापमनाहतं कुरु नृणां चेतस्सु भक्तेस्सिफरम् ॥

२३. ब्रह्माण्डान्यखिलानि यस्य भवतो जातानि रोम्णो विधि
र्नाभीवारिभवादजायत महालक्ष्मीः कलत्रं दृशौ ।
सूर्याचन्द्रमसौ पुराणपुरूषं यं विन्दते योगिनो
नाम्ना यस्य च वर्तते जगति संकल्पस्तमेव स्तुवे ॥

२४. त्वद्रूपस्सकलः पदार्थनिवहो नामानि शब्दास्समे
तीर्थान्यप्यखिलानि ते चरणयोः पाथांसि, दासास्तव ।
जीवास्सर्वफलान्यनुग्रहलवास्सर्वाणि कर्माणि ते
कैङ्कर्यं, परमं पदं जगदिदं मन्ये वृषाद्रीश्वर ॥

२५. चेतः कामयते निराकृति महो द्रष्टुं भवन्तं प्रभो
जिह्वा भोक्तुमभीहते प्रसदनं स्प्रष्टुं पदे वाञ्छतः ।
दिव्यं ज्योतिरवेक्षितुं मम दृशा वाकांक्षतश्श्रद्धया
पादौ त्वामभितः परिक्रमितुमद्धा विश्वरूपं हरे ॥

In Public domain. Digitization Muthulakshmi Research Academy

२६. आर्तानां सुहृदां सदा त्वमगदङ्कारोऽसि, तार्क्ष्यध्वज-
स्संसारोग्रपृदाकुदष्टमनसां त्वं सूर्यनारायणः ।
मोहध्वान्तजटाच्छटावृतदृशां, गङ्गापगायाः पिता
दारिद्र्योग्रदवाग्निदग्धसुधियां श्रीवेङ्कटेशप्रभो ॥

२७. श्रेयो नस्सृजतात् चराचरजगत्कल्याणभूमा पर
न्धामेरम्मदकोटिकर्मसुषमासीमोन्मिषन्मज्ञिमा ।
प्रेम्णोज्ञीवितजीवजालभरिमाऽपास्तामृतान्धोद्विष-
त्थामाऽतीतहरित्प्रदेशहरिमा श्रीवेङ्कटेशप्रभुः ॥

तारावलीं श्रीनिवास ! वेङ्कटाद्रिनिकेतन ।
समार्पित् तवोपान्ते भक्त्या विजयसारथिः ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

पुराणप्रशस्तिः

१. वेदव्यासमहर्षिरुग्रतमसा कृत्वा विभागं श्रुते-
स्तासां मन्त्रगिरां समाधिसुलभं गाढं निगूढं परम्
तत्त्वं बोदयितुं पुराणनिगमान् अष्टादशाख्यानकैः
गाथाभिस्सहितांश्च शुद्धिभिरसौ चक्रे नृणां श्रेयसे ॥

२. यत् तत्त्वं निगमेषु गूढमुदितं यच्च स्मृतिष्वाहितं
स्वाख्यानैर्विवृतं पुराणनिगमैर्नैकैस्तदेव स्फुटम् ।
साक्षाद् व्यासमहर्षिणा त्रिविधया चौद्दिष्टया भाषया
योगक्षेमवहे पुराणनिगमे न श्रद्दधातीह कः ॥

३. एकस्यैव परात्परस्य विविधा ब्रह्मादिका भूमिकाः
तत्तत्कल्पयुगेतिहासविषया, नृणां समुद्धारिकाः ।
लीला, स्सम्यगुदीरिता भगवतो रूपं स्वरूपं गुण-
स्तत्त्वं धामनिरूपितञ्च बहुधा स्पष्टं पुराणाकरे ॥

४. वेदेषु द्विज एव यात्यधिकृतिं तत्रापि वर्ण्येव च
स्त्रीशूद्रान्त्यजनाः पुराणनिगमे सर्वेऽधिकारं गताः ।
वेदैर्वाङ्गनसातिगम्य भगवान् प्रोक्तः पुराणैरसौ
सर्वेषामपि दृष्टिगोचरतया सम्यक् प्रतिष्ठापितः ॥

५. आख्यानैर्विविधैर्विभिन्नविषयैरुच्चावचैः पात्रकैः
गाधाभिर्बहुशुद्धिभिर्बहुमुखैस्संवादसूक्तैरपि ।
नीति शिक्षितुमुन्नतोन्नतपदं प्राप्तुं फलं जन्मनो
भव्यं साधयितुं पुराणमपहायान्यन्नृणामस्ति किम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

६. श्रीविष्णुर्भगवान् शिवो भगवती विघ्नेश्वरो भास्करः
पञ्चोपास्यतया प्रपन्नसुलभास्सम्भाविता देवताः ।
पञ्चोपासनसिद्धितो मतिमतां मुक्तिःक्रमाज्ञायते
विद्या भूतिजयौ निरामयदशेत्युक्तं पुराणेष्विदम् ।।

७. धर्माधर्मविवेचनं जनिमतां संसारचक्रभ्रमो
नक्षत्रग्रहतारकास्थितिगती संवत्सराणां फलम् ।
क्षोभारिष्टरुजेतितापविषयास्तच्छान्तयः प्राणिनां
कर्तव्यं नतिरुन्नतिश्च विवृतास्स्पष्टं पुराणाकरे ।।

८. धर्मार्थौ नृपनीतिरीति विषयान् सामाजिकीं सुस्थितिं
कामं मोक्षमुदात्तसंस्कृतिमभिज्ञातुं पुराणाज्ञनः ।
शक्नोत्येव विभिन्नदर्शनपरिज्ञानं भृशं विन्दते
शिक्षामाचरणं स्वजीवितफलं प्राप्तुं विशिष्यार्हति ।।

९. तुल्यालोचनरक्तभावनदृशा वर्णाश्रमाणां व्यवस्था
क्लृप्तैवं महितोपदेशविषये नोच्चावचा वा मतिः ।
प्रत्येकं परिकल्पिते व्रतविधौ वर्णानुरोधादपि
प्रेम्णोपस्थितितुष्टिपुष्टिसमता ग्राह्या पुराणाकरे ।।

१०. भूमीगोलभगोलकस्थितिगती ब्रह्माण्डसृष्टिक्रमो
द्वीपानाञ्च परिस्थितिः क्षितिभृतां राज्यव्यवस्था परा ।
क्षेत्राणां च नदीनदवनग्रव्णां महत्तां तथा
नानायोनिजवृत्तमप्यभिहितं स्पष्टं पुराणाकरे ।।

In Public domain. Digitization Muthulakshmi Research Academy

११. सर्वत्रापि विलोकितुं भगवतो रूपञ्च लब्धुं वरान्
शक्येतेति जनैर्वनानि तरवः क्षेत्राणि तीर्थानि च ।
ग्रावाणः पशवः खगा नृमहिला मासर्तुघस्त्रादिका
इत्येवं भगवन्मयं जगदिति प्रोक्तं पुराणेष्विदम् ॥

१२. विद्योद्वाहुसुसन्ततिस्थलगृहक्षेत्रायुरारोग्यसौ-
भाग्यादीन्यपि कामितानि विविधान्याप्तुं व्रतानि स्वयम् ।
अत्यन्तं सुलभानि पामरजनानुष्ठानयोग्योन्यहो
नैकानि प्रतिपादितान्यपि तपस्त्यक्त्वा पुराणाकरे ॥

१३. बालस्त्रीयुववृद्धपामरविपश्चिल्लोकचारित्रकं
सूक्ष्मस्थूलवृषानुशीलनमहो वर्णाश्रमाणां स्थितिः ।
कर्मज्ञानविरागभक्तिपुरुषार्थानां स्वरूपं परं-
धामाप्तिश्च निरूपिता बहुविधाख्यानैः पुराणाकरे ॥

१४. सप्ताधो भुवनान्यधोपरि विराण्नाभीसरोजात् समु-
द्भूतानीति विभाग एष तमसस्सत्त्वस्य हेतोरभूत् ।
ऊर्ध्वेषु क्रमशः पुनर्भगवतस्संवित्कलाज्ञानमु-
त्रेषोन्मे भृशमुत्तरोत्तरमिति प्रोक्तं पुराणाकरे ॥

१५. भूलोकस्य चतुर्विधं विभजनं मृत्युवादिसम्भेदतो
जातं कामवपुष्मतां भुवि जना देवासुराणां नहि ।
कुर्युर्दर्शनमात्मखोन्मुखतया देवासुराणं भिदा
चोर्ध्वाधस्स्थितिरित्यसौ गमनिका क्लृप्ता पुराणाकरे ॥

In Public domain. Digitization Muthulakshmi Research Academy

१६. नूत्नं यत्तु पुरा पुरापि, पुरति प्राग्रे प्रयातीति वा,
पूर्वं प्राणिति वा, पुराभवमिति, प्रत्नं व्यनक्तीति वा ।
पूर्वं प्रापयतीति वा, कथयति प्रत्नान् तथाऽर्थानिति
व्युत्पत्तिर्भवतीति शब्दनिपुणा प्राहुः पुराणस्य च ॥

१७. तीव्रस्वादुयथार्थवाक्यभिदया वाक्यं त्रिधा सम्मतं
वेदेष्वेष्विव तत्पूराणनिगमे बुद्ध्वा तदर्थं धिया ।
कर्तव्येषु हितेषु कर्मसु च सश्रद्धं प्रवृत्तः पुमान्
श्रेयांस्यत्र परत्र विन्दति सुधीर्भूयांसि सौख्यान्यपि ॥

१८. सर्गाद्यैर्दशभिश्च पञ्चभिरिदं संयोजितं लक्षणै-
र्भिन्नं धार्मिकनायकादिति पुरावृत्तात् पुराणं विदुः ।
सृष्टिस्थे मलयांश्च सर्वजगतां मन्वन्तराणां क्रमं
वंशानां चरितं पुमर्थसरिणं व्याख्याति यद् भूरिशः ॥

१९. सन्तानाय वधूग्रहो मतिमतां, त्यागाय वित्तार्जनं
धर्मायैव च जीवनं निजफलन्यासाय कर्माण्यपि,
चेतश्शुद्धिकृते तपोजपविधिर्ज्ञानं परं श्रेयसे
चेत्येतां महितां पुराणनिगमो नीतिं नरान् शिक्षते ॥

२०. तिस्रोऽपि श्रुतयस्त्रिभिश्च गुणिता अङ्गैर्दशाष्टोत्तरा-
ष्षड्भिः, पर्वभिरष्टभिश्च दशभिर्विद्योतते भारतम् ।
मन्वादिस्मृतयो महर्षिरचिता अष्टादशत्वं गता
गीता भागवती विभिन्नविषयैरष्टादशाध्यायिनी ॥

In Public domain. Digitization Muthulakshmi Research Academy

२१. द्यावाद्याः क्रमशष्षडूर्मिगुणिता अष्टादशत्वं गताः
प्रायोष्टादश ऋत्विजो विधिरता यज्ञेषु सङ्कीर्तिताः ।
सेनाऽष्टादशभिर्भयानकरणे चाक्षौहिणीभिर्युता
कालेऽष्टादशवासरैरुपनते वृत्तं तदायोधनम् ॥

२२. सप्रणायतनानि संयमिवरैरष्टादशेति श्रुतं
क्षेत्रज्ञादिभिदा महर्षिकथिता चाष्टादशत्वं गता ।
यागे सप्तदशेष्टिका विगणिता संघात एकस्तथा
तन्मात्राः करणानि षोडश महच्चाहं तथैव द्विकम् ॥

२३. गायत्री वसुवर्णवत्यथ दशार्णाढ्या विराट् छन्दसी
चेत्यष्टादशता रहस्यमृषयः प्राहुः पुराणावलेः ।
वेदार्थानुपबृंहयन्ति विविधाख्यानैः पुराणानि, तद्-
वेदापेक्षितया पुराणनिगमे नृणां प्रवृत्तिः परा ॥

२४. शीर्षं ब्रह्म, परात्परस्य नृहरेः पद्मं मनो, वैष्णवं
शैवं बाहुयुगं, शकोद्गतमुरो, नाभिस्तथा नारदम्,
पादावग्निमृकण्डुपुत्रयुगलं जानू भविष्यं तथा
वैवर्तं, किटिलिङ्गके निगदिते गुल्फौ च, रोमावली ॥

२५. स्कन्दं, त्वक्किल वामनं, कमठकं पृष्ठं, तथा मत्स्यकं
मेदो, गारुडमीडितं भगवतो मज्ञा, तदस्थिच्छटा ।
ब्रह्माण्डं च, पुराणवाङ्मयमिदं विष्णोश्शरीरं स्मृतं
सर्वेशस्य पुराणवाङ्मयतनोः श्रेयःप्रदोपासना ॥

In Public domain. Digitization Muthulakshmi Research Academy

२६. स्रष्टा को नु किलेदमुत्तरयति ब्राह्मं, तदस्य स्थितिं
पाद्मं, मूलमधास्यवैष्णवमिदं, ज्ञानं च सृष्टेर्विधेः ।
शैवं, तत्र विलीनतत्त्वघटनां लिङ्गं, तथा गारुडं
जीवानां सदसद्गती, सुकृतितां तन्नारदं, धाम तत् ॥

२७. विष्णोर्भागवतं, सुकर्मफलमाग्नेयं, स्वविद्याप्तये
स्कान्दं, स्वास्थ्यविदे भविष्यममलं, नृणां च विघ्नच्छिदे ।
वैवर्तं च, मृकण्डुपुत्रकमिदं, मायामहत्तां, तथा
पाठीनं कमठं वराहमपरं लीलावतारैः पराम् ॥

२८. श्रीविष्णोश्शरणागतिं च, जगतां सृष्टेश्च तत्त्वं पुन-
र्ब्रह्माण्डं, परिपाटिका खलु पुराणानामियं बुद्ध्यताम् ।
वेदेषूपनिषत्सु यत् स्मृतिषु वा नोक्तं पुराणेषु तत्
विस्पष्टं विवृतं पुराणनिगमे नृणां प्रवृत्तिः परा ॥

२९. ताराचन्द्रमसोश्चराचरसृजो वाण्यास्तथा रेतस-
श्शम्भोश्चित्रकथान्तरेषु निहितं वैज्ञानिकं तात्त्विकम् ।
अर्थं वेत्तुमृतम्भरापरिधयो ह्येव क्षमन्ते बुधा
अश्लीलं तदमाननीयमिति वा मिन्वन्ति मूढाः परे ॥

३०. वेदैर्विग्रहपूजनं भगवतो निर्बाधमङ्गीकृतं
साकारस्य हि पूजनं भवति तत्साकारतोरीकृता ।
लोकानां तरणार्थमेष बहुधा तद्विग्रहार्चाविधि-
र्वेदव्यासमहर्षिणाऽपि विवृतस्तत्तत्पुराणेषु च ॥

In Public domain. Digitization Muthulakshmi Research Academy

३१. वर्णानां ध्वनिबोधनाय विबुधैराकाररेखा यथा
कल्प्यन्ते परमेश्वरस्य च तथा ता मूर्तयः कल्पिताः ।
रेखाणां परिमार्जनेऽपि न भवेत् भङ्गो ध्वनीनां यथा
मूर्तीनामपि भङ्गतोऽपि हि तथा विष्णोर्न काऽपि क्षतिः।।

३२. सर्वेशो निखिलेषु वस्तुषु परं व्याप्तोऽस्ति सत्यं त्विदं
तद्व्याप्तेष्वपि तण्डुलादिषु जनैर्भुक्तेषु तस्य क्षतिः ।
स्यात् किं तत्प्रतिमाक्षतौ भवन्ति किं भंगो भवत्यूह्यतां
वादैर्व्यर्थतमैः भ्रमैः किमिति भो कालो वृथा नीयते ।।

३३. यज्ञे सर्वमिदं प्रतिष्ठितमहो वेदाः प्रवृत्ता इमे
यज्ञार्थं दिविजा भवन्ति मुदिता वर्षेण तृप्ता नराः ।
यज्ञैरेव समस्तभौतिकगणा नैव प्रकुप्यन्ति च
श्रीविष्णुर्भगवान् स यज्ञपुरुषः यज्ञात् प्रसीदत्यपि ।।

३४. नायज्ञस्य परत्र चेह च शुभं पुण्यं यशो वर्तते
नायज्ञस्य सुखादिसम्पदपि वा तस्माद् यजेरन् प्रजाः ।
दम्भार्थं विधिमन्त्रवित्तपरमश्रद्धा विहायपि यो
यज्ञं कर्तुमभीहते स निरयं यात्येव घोरं जनः ।।

३५. संवित्सागरपोपुवा विमतदुर्वाग्वगुरायोयुवा
पापात्मावलिपोपुवा परिलसज्ज्योतिष्मती योयुवा
मायादुर्ग्रहदोधुवा श्रुतिशिरस्तत्त्वार्थविन्नोनुवा
कृत्तप्राकृतरौरवा विजयते वैयासिकी भारती ।।

In Public domain. Digitization Muthulakshmi Research Academy

३६. एकं सद् बहुधा वदन्ति निगमा इत्युक्तितात्पर्यतो
व्याख्यातीव परात्परस्य बहुधा नामानि रूपाणि च ।
लीलाश्शक्तिगुणस्वभावविभवाश्चर्याणि कर्माण्यपि
ब्रह्मेन्द्रादिचरित्रचित्रणमुखात् वैयासिकी भारती ॥

३७. क्षुद्राक्षुद्रनरामरोरगमृगग्रावापगानोकह-
क्षेत्रोपाधिषु सन्निलीय विविधैरंशैस्स्वकैरुर्जितैः ।
योगक्षेमपरम्परां स भगवान् वोढुं नृणां वत्सलो
जागर्तीति विवृण्वती विजयते वैयासिकी भारती ॥

३८. आम्नायान्तलतान्तसूक्तिसुषमासौवस्तिकी तत्त्ववि-
त्संवित्स्वागतिकी सनातनमतप्राभूतिकी सर्वदा ।
वेदाभ्युन्नतिकी श्रुतिस्मृतिपूराणद्वेषिमाशब्दिकी
कल्याणस्वरवल्लकी विजयते वैयासिकी भारती ॥

३९. विक्षेपादिविरुद्धवृत्ति विसरव्यघ्रावलीतर्जितं
दुस्ताथागतभूतवातनिहतं धूर्तासिपत्रार्दितम् ।
मायारण्यपरिभ्रमश्रमजुषं श्रेयो नयन्ती जनं
श्रीमद्व्याससरस्वती विजयते निर्वाणनिश्रेणिका ॥

४०. द्वीपेन्दुप्रमितानि वेदपरमाण्यद्धा पुराणान्यहो
सङ्ग्रथ्यापि शमन्तरामलभमानः पुराणो मुनिः ।
आम्नयोपनिषद्रहस्यमखिलं संगृह्य वीणामुनेः
श्रीमद्भागवतं प्रणीय परमं शान्तिं गतो बोधतः ॥

In Public domain. Digitization Muthulakshmi Research Academy

४१. साक्षाद् योगिशिखामणिः परतपस्तत्त्वैकतानश्शिवः
स्वात्मानन्दरसं प्रसादय सुरैरित्यर्थितो वत्सलः ।
कल्याणाय नृणां शुकर्षिवपुषा सम्भूय मुक्तिप्रदं
श्रीमद्भागवतामृतं परहितं प्रसीसदद् भूतले ॥

४२. श्रीविष्णोः प्रथमं स्वरूपममलं सूक्ष्मातिसूक्ष्मं परं
ब्रह्माण्डं सकलं चराचरमयं रूपं द्वितीयं हरेः ।
राष्ट्रं व्यष्टिसमूहसङ्कुलमिदं रूपं तृतीयं मतं
रूपं सङ्कुचितं चतुर्थमुदितं व्यष्ट्यात्मना सूचितम् ॥

४३. श्रीमद्भागवतं पुनर्भगवतो वैराजरूपं विदु-
र्यश्श्लोकैर्विधिवज्जुहोति निगमैस्सब्राह्मणैश्श्रद्धया ।
स श्रेयोऽभ्युदयं च विन्दति महाविष्णोः प्रसादात् ततः
कुर्याद् भागवतक्रतुं सुकृतधीस्सप्ताहदीक्षापरः ॥

४४. अद्वैतं परमे व्यनक्तिनिगमान्तार्थामृतैकास्पदं
श्रीमद्भागवतं परात्परमयं श्रीब्रह्मविद्यात्मकम् ।
कर्मज्ञानतपोविरागसवनप्रेमादियोगोज्ज्वलां
वेदव्यासमुखोद्गतं बहुविधश्रेयःप्रदं धीमताम् ॥

४५. पञ्चाब्बिन्दुरिति, स्तुवन्ति मुनयो नेत्रं तदूर्ध्वं कटिं
नाभिं वह्नि रथोदरं च निगमो, बाणो हृदंसौ, रसः ।
ग्रीवामास्यमृषिर्दुशावथवसुर्विष्णोः कपोलै, विधिः
भ्रूयुग्मं, खविधुश्शिरोऽध च मनो रुद्रस्तदात्मा रविः ॥

In Public domain. Digitization Muthulakshmi Research Academy

४६. एवं भागवतं यजेत मतिमान् मत्वा हरेराकृतिं
श्रीमद्भागवतक्रतोर्जपतपोज्ञानादिसिद्धिर्भवेत् ।
धर्मो हृष्यति सर्वथा नवविधा भक्तिस्समृद्ध्यत्यपि
क्षोभो नश्यति स प्रसीदति हरिः कल्याणमाढौकते ॥

४७. कृष्णे ब्रह्मणि पूर्णपूर्णतमयोरैश्वर्यमाधुर्ययो-
स्सामानाधिकरण्यमप्रतिहतं व्याख्याति वैयासिकम् ।
श्रीमद्भागवतं तथा जडजगत् शक्नोति चिज्ञागतं
कर्तुं भक्तिरसायनं भगवतस्साक्षात्कृतेर्दर्शनम् ॥

४८. कर्मज्ञानतपोजपादिषु महानुष्ठानदीक्षाविधि-
प्रस्फीतो नियमोऽस्ति तत्र न पुनस्सर्वेऽधिकारं गताः ।
भक्तेर्दुष्करता नवाऽपि नियमा घोरा न दीक्षाक्रमः
स्त्रीशूद्रादिभिदाऽपि केवलमियं स्वात्मोपहारार्पणम् ॥

४९. मर्यादानियतं पुमर्थनिरतं स्वात्मोन्मुखं योगिनं
ब्रह्मज्ञानपरं परार्थघटकं तत्त्वानुसन्धायिनम् ।
लोकाराधनतत्परं सुकृतिनं विक्षेपदूरं जनं
श्रीमद्भागवतं करोति परमश्वश्रेयसानन्ददम् ॥

५०. गम्भीराशयशोभिताऽमृतरसा पुण्यप्रचाराञ्चिता
शश्वत् सत्फलदायिनी जनिमतां सञ्जीवनाधायिनी ।
आर्तोपाश्रिततापवारणता हंसावलीसेविता
श्रीमद्भागवती पुनातु जगतीं भागीरथी भारती ॥

In Public domain. Digitization Muthulakshmi Research Academy

५१. आम्नाती निगमेषु साधुपठिती शास्त्रेष्वधीती कला-
स्विष्टी सत्स्वपि सप्ततन्तुषु महादानेषु पूर्ती सुधीः ।
श्रेयो नैव भजे दृते भगवतो भक्तेः प्रतिष्ठापकं
श्रीमद्भागवतं चतुर्थममृतं प्रस्थानमंहोपहम् ॥

५२. प्रस्थानत्रयभाष्यवत् श्रुतिशिरस्तत्त्वार्थदेदीपकै-
राचार्यास्स्वमतानुरोधरचितैर्गूढार्थविद्योतनैः ।
भाष्यैर्भागवतं पुराणतिलकं सभूषयन्तीत्यतः
श्रीमद्भागवतं तदाश्रयफलं तद् ब्रह्मविद्यां विदुः ॥

५३. गायत्रीपरमार्थमेव विवृणोत्यद्धा नवा केवलं
तत्तत्पात्रमुखेन भक्तिसरितं संसारयत्यञ्जसा ।
प्रस्थानत्रयमाकलय्य परमं सारामृतं वर्षति
श्रीमद्भागवतं चतुर्थमिति तत् प्रस्थानमुक्तं बुधैः ॥

५४. नैव व्यासकृतिं विमूढमतयो मिन्वन्ति केचिद् बुध-
म्मन्याः केचन बोपदेवरचितं दुर्भावयन्ति भ्रमात् ।
व्यासस्यैव निरूपयन्ति च कृतिं सद्धेतुभिस्तात्त्विकाः
श्रीमद्भागवतस्य किं नु महिमा दुर्वादतो हीयते ॥

५५. सर्वाचार्यसभाजितं भगवतो माधुर्यलीलास्पदं
सौलभ्यस्य निदर्शनं भवभुजङ्गपायतापापहम् ।
कर्मज्ञानविरागयोगमुकुरो भक्तेरनन्यस्मृतेः
प्रस्थानं शुकबोधितं विजयते श्रीमत्पुराणं महत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

५६. नानाशक्तिगुणाकृतेर्भगवतोऽनन्ता गुणाश्शक्तयः
वर्ण्यन्ते लवशो निजायुषि न सर्वज्ञेन केनापि वा ।
तस्माद् बुद्धिमता स्मृतिःस्तुतिनती कस्यापि नाम्नो जपः
कर्तव्यं परमास्थया प्रतिकलं सङ्कीर्तनं श्रेयसे ॥

५७. स्कन्धाच्चन्द्रमसः पदं भगवते दक्षं, परं लोचनात्
अग्नेर्हस्तयुगं श्रुते, रिषु रसाभ्यां जानुयुग्मं, वसोः ।
वक्षस्तस्य विधेः पराङ्मुखदृशैः साक्षात्कृते चोद्धृतो
हस्तोऽसौ शिवतो रवेश्च विहितं स्वामन्त्रणं भूभृता ॥

५८. श्रीमद्भागवतश्रुतिश्रवणतो निर्भीति निस्संशयं
स्वान्ते स्यात् परवासुदेवमयता तद्दर्शनं सर्वतः ।
सर्वत्रापि विहाय हेयमहितं विन्यस्य भारं हरौ
श्रीमद्भागवतं पठन्तु सुधियो मुक्तिं नयेदेव तत् ॥

५९. यद् ध्यानेन कृते भगवतो लब्धं द्वितीये युगे
यज्ञैर्यद् विधिपूर्वकैरुपगतं यद्वा तृतीये युगे ।
प्राप्तं सत्परिचर्यया फलमहो सङ्कीर्तनात् लक्ष्यते
पापेऽस्मिंस्तु कलौ परं पुनरितो नान्यत् कलेस्तारणम् ॥

६०. श्रीलीलापुरुषोत्तमस्य सुतरामप्राकृतं विग्रहं
द्रष्टुं भागवतं पठन्तु विबुधा नामस्वरूपात्मकम् ।
कर्मज्ञानपुरस्कृतां रसमयीं सप्ताङ्गपूर्णां परं
मुख्योपायतयाऽऽश्रयन्तु रसिका भक्तिं प्रियां श्रीहरेः ॥

In Public domain. Digitization Muthulakshmi Research Academy

६१. नामार्चेति बुधैर्द्विधा निगदितं विष्णोस्स्वरूपं तयो-
र्चासेवनमस्य नास्ति फलभाक् नामानुसेवां विना
चेतश्शुद्धिकृते सदा मतिमतो नामैव मुख्यं मतं
श्रीमद्भागवतं महत् भगवतो नामस्वरूपं स्मृतम् ॥

६२. श्रीमद्भागवते क्रमात् प्रकटिताश्शिष्याधिकारः परं
ज्ञानं सर्गविसर्जने स्थितिकला पुष्टिस्तथा वासना ।
धर्मोपास्तिनिरूपणं भगवतस्सेवा च भक्तिः परा
प्राप्तिर्द्वादशसु स्फुटं च मुनिना स्कन्धेषु सत्यात्मना ॥

६३. अध्यात्मादिविभेदतश्श्रुतिषु यत् तत्त्वं निगूढं स्थितं
तत् तत्त्वं त्रिविधार्थबोधनमुखे नाविष्कृतं विस्तृतम् ।
भङ्गीभेदमुपेत्य येन मुनिना तत्तत्पुराणेष्वपि
श्रीमद्व्यासमहर्षये नम इदं तस्मै पुराणर्षये ॥

पुराणानां पुराणर्षेः श्रीमद् भागवतस्य च ।
प्रशस्तिमकरोन्नृणां मुदे विजयसारथिः ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

द्रुतं प्रादुरेधि

अरविन्दकृतेः स्वेच्छानुवादः

१. महायोगिसंविन्मयाकाशराका
तुषारंशुरेखे ! विरूपाक्षि ! दुर्गे !
जगत्प्राणशक्ते ! जयानन्तशक्ते !
जयानन्तशक्तिप्रदे ! सिंहवाहे ! ॥

२. त्रिशूलोग्रधाराहताशेषरक्षः
पिशाचे ! महासिंहवाहे ! सुबाहे !
अपायादमुष्मात् परित्रातुमस्मान्
समाविर्भव त्वं पुनर्भारतेऽव ॥

३. पिशाताट्टहास स्फुटद्द्रोहिवक्षः
पुटे कण्ठमालीकृतद्विट्करोटे !
विमूकीकृतान् दुर्भयभ्रान्तचित्तान्
महासंकटान्नश्शिवे पातुमेहि ॥

४. भवच्छक्तिलेशांशजाता उदारे
वयं भारते प्रार्थनां कुर्महे ते
स्वधर्मे विधातुं रतान् मातरस्मान्
समाविर्भवत्वं पुनर्भारतेऽम्ब ॥

In Public domain. Digitization Muthulakshmi Research Academy

५. स्वराष्ट्रं विदीर्णं विशीर्णं विधातुं
यतन्ते द्विषन्तोऽन्तर्बहिः केऽपि गूढम्
सहोऽस्मासु दुर्गे महोऽस्मासु दुर्गे
द्विषस्तान् निहन्तुं प्रकामं प्रदेहि ॥

६. विभेदं विवादं प्रचण्डां वितण्डां
पुरोऽस्मासु कृत्वा ततो राष्ट्र भङ्गम्
प्रकर्तुं यतन्तेऽस्मदेकत्वबन्धे
प्रहाणं द्विषस्ते वितन्वन्ति दुर्गे ॥

७. महाप्राणरोचिः परीवाह भुग्नां
स्फुरद्रूप सौदामनीमीक्षितुं ते
समुत्कण्ठतेऽसौ जनः प्रणशक्ते
समाविर्भव त्वं पुन र्भारतेऽम्ब ॥

८. वयं दीक्षया देवि जाता इदानीं
स्वयं भारतेऽस्मिन् कृताविर्भवा त्वम्
कुरुष्वोपकारं भवत्किङ्कराणां
शिवेऽस्माकमीशप्रिये सिंहवाहे ॥

९. जगत्यां समिद्धाधुना भारतीया
प्रजैषान्धकारावृतात्मप्रभावा
व्यथा मेति दुर्गेऽधुना प्राचि कोटि
प्रभाभिर्विभाहि स्फुरन्तीभिरम्ब ॥

In Public domain, Digitization Muthulakshmi Research Academy

१०. विभूतिस्वरूपा महाभारतीवी
स्वशक्तिं पिधाय प्रसुप्ता कथञ्चित्
प्रबुद्धाधिवोढुं भुजे देवि सौवं
भरं दीक्षते त्वं तदन्तस्समिन्त्स्व ॥

११. त्वदल्पाल्परोचिर्महिम्ना प्रभातं
भवत्यम्ब सद्यः परास्तं तमोऽपि
प्रकाशो यथात्मन्युदेति प्रकामं
तथा प्राचि भास्वत्प्रभाभिर्विभाहि ॥

१२. त्वयैव प्रसूतास्सुता बोभवीमो
वयं ते प्रसादाद्वयं ते प्रभावात्
महाकर्मणि व्यापृता योगसिद्ध्यै
प्रदीप्तां भजामो हृदि प्राणशक्तिम् ॥

१३. अतिस्वार्थबुद्धिं खलक्षुद्रभावं
शिवे दूरयास्मत्सकाशादपर्णे
समूढं भयं वा विदूरीकुरु त्वं
जडत्वं हर त्वं सुतानां स्वकानाम् ॥

१४. स्फुरत्कोटि विद्युल्लता स्निग्धमूर्ते
प्रकाशस्व भूम्नास्मदन्तश्शरीरम्
समाविष्कुरुष्व स्वयं नेतृशक्तिं
प्रजासु स्वयं कर्मसम्पूर्णसिद्धिम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१५. कमालास्थिमाले करालप्रणादे
प्रकाशस्व भूम्नास्मदन्तश्शरीरम्
निरस्यारिवर्गं समं साट्टहासं
विशुद्धान्तरङ्गान् कुरुष्वात्मपुत्रान् ॥

१६. मिथोद्रोहवैर प्रतारावलीढं
महाक्लेशशादातिमग्नं स्वाराष्ट्रम्
समुद्धर्तुमस्मान् उदारान् महेच्छान्
समर्थान् महासत्त्वदीप्रान् कुरुष्व ॥

१७. तवैवार्यजातौ विलुप्तं चरित्रं
विलुप्तात्मशक्तिर्विलुप्ता च मेधा
विलुप्ता तपस्या तथा ब्रह्मचर्यं
विलुप्ता च भक्तिर्विलुप्ता च संवित् ॥

१८. विलुप्तं समस्तं पुनर्दीपयन्ती
विकासं नयन्ती निजामार्यजातिम्
जगत्यां प्रतिष्ठां पुनः प्रापय त्वं
स्वकं भारतं दुर्गतिच्छिद् भवानि ॥

१९. जहि क्रूरमन्तर्बहिश्शत्रुवर्गं
व्यथामन्तरायान् हरन्तीच न स्त्वं
कुरुप्रेणपूर्णान् महासत्त्वदीप्तान्
सदैकात्मतायत्तसंवित्तरङ्गान् ॥

In Public domain. Digitization Muthulakshmi Research Academy

२०. समाविश्य दुर्गे समस्ताकृतौ नः
प्रकाशस्व योगज्ज्वलत्प्राणशक्त्या
निजेष्वायुधेषु प्रशस्तः प्रतीक्षणः
कृपाणो भवामो यथा नः कुरु त्वम् ॥

२१. महौजःप्रसारं कुरु प्राणशक्ते
करालं कृपाणं परिस्फोरयन्ती
स्फिरं ज्ञानदीपं समुद्द्योतयन्ती
समाविर्भवत्वं पुरोऽस्माकमम्ब ॥

२२. सदा सत्य सत्त्व प्रभा ज्ञानशिल्प
प्रथा साहिती चित्कलादर्शनेषु
महिष्ठा भवामो यथा देवि दुर्गे
तथास्मानुदारान् कुरु त्वं भवानि ॥

२३. कलाकेलिवन्यां वसन्तीभवामो
कलादिव्यधुन्यां प्रवाहीभवामः
कलाशैल शृङ्गे महोमञ्जुधारी
भवामो यथा, न स्तथा संस्कुरु त्वम् ॥

२४. तमोनाशनिष्ठः प्रदीपो भवामो
यथा, नः कुरुत्वं तथा देविदुर्गे
तनूजान् तवास्मान् प्रपूर्णाभिलाषान्
कुरु त्वं सदा भारतानम्ब धीरान् ॥

In Public domain. Digitization Muthulakshmi Research Academy

२५. अये वीरमार्गस्य सन्दर्शयित्रि
स्वयं शक्तिपूर्णं विधातु स्वराष्ट्रम्
उपेहि द्रुतं नस्सदा देशमातु-
स्सपर्याङ्कितं नस्समस्तं शरीरम् ॥

२६. सदा राष्ट्र भद्राङ्किता नः कृतिस्सताम्
सदा राष्ट्रसेवैकसक्तं मनोऽपि
समिद्धां समृद्धिं पुनस्स्त्रष्टुमम्ब
द्रुतं प्रादुरेधि ध्रुवं प्रादुरेधि ॥

.....

In Public domain. Digitization Muthulakshmi Research Academy

देहि मे देशाय

सम्पूर्णभावनास्वातन्त्र्य मयि देव !
देहि मे देशाय दीनजनबन्धो ! कारुण्यसिन्धो !
अन्योन्यनिष्पीडनायत्तमानसा यत्र प्रजा मिथो वैरायते नवा
आनन्दमयजीवितं यापयति नित्यमखिलप्रजावली नीरुजा राजते ।।सं।।
साम्राज्यवादिनो गोमुखव्याघ्रास्तु यत्र प्रजादेशनायका न भवन्ति
क्रूरताकल्पान्तदावानलच्छटा सुन्दरं संसारनन्दनं न विदहति
अविनीतिविषलताप्यधिकारिपोषिता साधुता वासितां जातिं न मूर्छयति
सदसद्विवेचनाशेमुषीजाह्नवीसंस्कारबीजानि तर्पयन्ती सदा
करुणानुरागसुच्छायाम्बुविरहिते दुर्मार्गमरुपदे संसारमन्दिहे
स्वपरत्वभेदघोरान्धकारावलिं निष्कासयन् ज्वलति तेजसा सन्ततम् ।।

-- स्वस्ति --

In Public domain. Digitization Muthulakshmi Research Academy

प्रशस्ति

वाचस्त्रचि पुरस्कार नियमावली के अंतर्गत गठित चयम समिति की संस्तुति पर श्री श्रीभाष्यम् विजयसारथि को उनको काव्य संकलन भारत भारती के लिए वर्ष १८८६ का वाचस्पति पुरस्कार भेंट करते हुए के.के.विडला फाउंडेशन, नई दिल्ली उनकी सुदीर्घ साहित्य-सृजनात्मकता की मंगलकामना करता है ।

श्री श्रीभाष्यम् विजयसारथि और भारतभारती

श्री श्रीभाष्यम् विजयसारथि का जन्म तेलंगाना श्रेत्र के करीमनगर जिले के चेगुर्ति ग्राम में हुआ जो अब आन्ध्र प्रदेश राज्य का एक भाग है ।

श्री विजयसारथि ने प्राच्य विद्या एवं समसामयिक विषयों पर अनेक ग्रन्थों की रचना की उनकी रचनाएँ देशभक्ति, राष्ट्रीयता, सामाजिकता, विश्वबन्धुत्व की भावनाओ से ओत-प्रोत हैं तथा मानव-काल्याण को प्रोत्साहन देती हैं । अतः उनकी रचनायें ऋषि सूक्त हैं ।

श्री विजयसारथि ऐसे कवि हैं जिन्होने प्राचीन परम्पर से सम्बद्ध रहकर आधुनिक परम्पर का निर्वाह किया है । और उनके काव्यों में इस प्रकार की समन्वयात्मक दृष्टि देखने को मिलती है । उनके काव्य खण्डिका में हमें केवल आधुनिक और प्रगतिशील काव्यत्व ही नहीं मिलता अपितु क्रान्तिकारी विचार भी प्राप्त होते हैं ।

श्री विजयसारथि ने संस्कृत साहित्य के मधुर भक्ति पर आधारित मन्दकिनि और रासकेली नामक गेय काव्यों की रचना की है ।

In Public domain. Digitization Muthulakshmi Research Academy
उनका रासकेली गेय काव्य रासलीला का ही अन्य रूप है। जिसकी मूल विषय-वस्तु महाभागवत से ली गयी हू। इस काव्य में गोपी नृत्य का वर्णनात्मक रूप और उच्चस्तरीय काव्य के दर्शन होते हैं। ऐवं जो भावात्मक उत्सुकता एवं प्रेम लिये हुएं है। रासकेली में समर्पित प्रेम का रूप देखने को मिलता है। उपर्युक्त दोनों गेय काव्यों में मधुर मात्रिक छन्दों का प्रयोग मिलसा है।

श्री विजयसारथि ने अल्प आयु से ही ग्रन्थ रचना का कार्य आरम्भ कर दिया था। ११ वर्ष की अवस्था में शारदापद किंकिणी, १६ वर्ष की आयु में शबरी परिदेवनम् तथा १८ वर्ष की आयु में आहुति, विषाद लहरी, सामवेद और अवहानम् आदि काव्यों की रचना की। उन्होंने केवल काव्यों की ही रचना नहीं की अपितु अपनी छात्रावस्था में ही 'मनोरमा' नामक उपान्यास भी लिखा। उन्होंने प्रहसन और प्रहेलिका पर भाष्य आदि भी रचे। स्तोत्र साहित्य में उन्होंने सुप्रभातम् और शतकों की भी रचना की। नाटकों के क्षेत्र में 'अमर संदेश' नामक नाटक लिखा। इसके अतिरिक्त रवीन्द्रनाथ टैगोर की गीतांजलि का अनुवाद भी किया। श्री विजयसारथि ने अपने वैदुष्य से संस्कृत के विभिन्न क्षेत्रों में अपना अमूल्य योगदान दिया। इस प्रकार श्री विजयसारथि बीसंवीं शाताब्दी के महान कवि के रूप में स्मरणीय हैं।

भारत भारती काव्य संग्रह में कवि प्रवर श्री श्रीभाष्यम् विजयसारथि के २४ खण्ड काव्य संग्रहीत हैं जिसमें ८ श्लोक से लेकर १७० श्लोक तक की रचनायें हैं। 'भारती सुप्रभातम्' में कवि ने भारतवर्ष के सौन्दर्य, महत्ता, आध्यात्मिक उत्कर्ष का वर्णन किया है। भारत भारती शीर्षक में कवि ने यह आशा व्यक्त की है कि वर्ण, जाती सम्प्रदाय आदि से मुक्त होकर भारत का प्रत्येक नागरिक अपने कर्त्तव्यपालन में तथा मातृभूमि के रक्षण में सदा

In Public domain. Digitization Muthulakshmi Research Academy

तत्पर रहे। लघुकाय कविता 'मातृदेश प्रीणयानुज' में कवि ने इसी भावना को सुदृढ किया है। 'शंखारव' में निदर्शना अलंकार के मध्यम से समाजवाद को उत्कृष्ट मानते हुए पूँजीवाद का तर्कपूर्ण ढंग से खण्डन किया है।

उषस्सूक्तम्, भारतमहिम्न स्तति, संस्कृत प्रशस्ति, तथा दीपशिखाप्रशस्तिः नामक कविताओं मे आज के सामाजिक चित्रण के साथ देश के प्रतिभाशाली नेताओं की महिमा का विभिन्न अलंकारों के माध्यम से वर्णन उपलब्ध होता है। आप्त लेख एक १७० श्लोकों में निबद्ध रचना हैं जो एक मित्र को सन्देश के रूप में लिखी गई है। इस लम्बी कविता को पढतें हुए सहसा क्षेमेन्द्र रचित देशोपदेश रचना का स्ममरण हो आता है। कवि ने श्रमिक वर्ग पर किये जा रहे उत्पीडन का बडा की मार्निक वर्णन किया है। इस तरह की विषय वस्तु संस्कृत कवियों के द्वारा उपेक्षित रही है। वर्ग संघर्ष और वर्ग विरोध की जगह वर्ग सहयोग एवं वर्ग बन्धुत्व में कवि ने अपनी आस्था व्यक्त की है। इस काव्य संग्रह में संग्रहीत अन्य कवितायें भी राष्ट्र एवं समाज के नवनिर्माण की योजनाओं से गुम्फित हैं। भारतीय संस्कृति के भास्वर पक्ष को उजागर करने में कवि ने अपनी अनूठी प्रतिभा का परिचय प्रचुर मात्रा में प्रस्तुत किया है। वस्तुतः भारत भारती काव्य संग्रह प्रतिपाद्य विषय की दृष्टि से उत्तम कोटि की रचना है।

आलोचकों ने इस काव्य संग्रह की चमत्कारित कृति के रूप में प्रशंसा की है। उनकी धारणा है कि उनकी यह कृति स्वगेश अभिमान एवं धर्म में अभिरति की वृद्धि में नितान्त उपदेय सिद्ध होगी। इनकी रचना में शब्द का सौष्ठव है, अर्थ का औचित्य है, अलंकारों का परिष्कार है तथा ध्वनि का गाम्भीर्य है। सात वर्ष की अल्प आयु में श्री विजयसारथि ने संस्कृत में अपनी रचना आरम्भ

In Public domain, Digitization Muthulakshmi Research Academy

की। तेलुगु कवियों के सम्मेलनों में भाग लेने वाले ये अकेले ही संस्कृत के कवि रहे। और कविता से श्रोतागणं को सम्मोहित किया। संस्कृत कविता की सरणि में 'सूक्त प्रक्रिय' का इन्होंने परिचालन किया। जो वस्तुतः वैदिक ऋषियों की परम्परा रही है। इनके सत्प्रयासों से यह धारणा मिथ्या सिद्ध हुई कि संस्कृत कविताओं के प्रतिपाद्य विषय केवल पुराण और इतिहास से ही सम्बन्धित हो सकते है। संस्कृत भाषा पर असाधारण अधिकार के आधार पर इन्होंने आधुनिक विषयों पर चयन करके उन पर सशक्त रचना प्रस्तुत की जिसका प्रतिफल भारत भारती काव्य संग्रह है।

In Public domain. Digitization Muthulakshmi Research Academy

SRIBHASHYAM VIJAYASARATHI

1. **Born** : 10th March, 1936, Chegurthi Village of Karimnagar Dist. Telangana
2. **Parentage**
   (a) Father : Narasimhacharya
   (b) Mother : Gopamamba
3. **Residence** : Karimnagar, Telangana, India
4. **Alma Matter** : (1) Sri Vishweshwara Sanskrit College, Warangal (OU)
   (2) Rashtreeya Sanskrit Vidya Peetha, Tirupathi
5. **Institutions** : Sri Vishweshwara Sanskrit College (UG & PG), Warangal (KU)
6. **Subject Specializations :**
   (1) Nyaya (2) Vyakarana (3) Sahithya
7. **Known for** : Sanskrit Literature
8. **Innovations / Contributions :**
   (a) Books :

1. Sarada Padakinkinkini
2. Shabari Paridevanam
3. Mandakini
4. Bharatha Bharathi
5. Rasakeli
6. Rochismati
7. Avahanam
8. Jyothishmathi
9. Udaharanani
10. Sangeetha Madhavam
11. Praveena Bharatham
12. Vishadalahari
13. Prasadalahari
14. Varivasya
15. Parivadini
16. Caronaam Moolatho Jahi
17. Chandra Shekara Prashasthi
18. Sanskrutha Rupakeshu Nandi Prasthavana
19. Srushti Darshanam
20. Purana Prashasthi
21. Nyava Vysheshikamulu - Sankhya Yogamulu
22. Pravalhikalu
23. Ekadashi

In Public domain. Digitization Muthulakshmi Research Academy

24. Sraddha Tanam
25. Chilukuru Balaji Suprabhatham
26. Bhadrakali Suprabhatham
27. Illanthakunta Ramachandra Suprabhatham
28. Sri Yagnavaraha Suprabhatham
29. Mettu Ramalingeshwara Suprabhatham
30. Chegurthi Venugopala Suprabhatham
31. Singapuram Srivenkateshwara Suprabhatham
32. Balusugonda Ramachandra Suprabhatham
33. Sri Maha Saraswathi Sthuthi
34. Vishwa Kutumbini
35. Manorama (Novel)
36. Shusheela (Novel)
37. Dambayogamu(Prahasanam)
38. Amara Sandesha (Drama)
39. Kavyadarsha Kathyayini
40. Vyavaharika Dharma Shastra - Vyavahara Kanda
41. Poorvothara Meemamsa
42. Sadrushya Moolalankaramulu
43. Kamayanam
44. Padmakshi Charana Charanam
45. Sri Ramodaharanam
46. Sri Venkateshwaroda-haranam
47. Kharam Prathi Bahiranga lekha
48. Dharmanishtam Bhavathu Rashtram
49. Karimngar Zilla Prashasthi

B) Editorial Works : Chaturveda Vishnu Swaahakaara, Sri Maha Laxmi Mahatmyam

C) Epistolary : Aptha Lekha, Bhatru lekha

D) Compilations : Prahelikalu

E) Comparative Study : Sanskruthaandhra Vasucharithra, Tulanatmaka Parisheelanam

In Public domain. Digitization Muthulakshmi Research Academy

9. Recognition/ Honours

A) National Level :

1. Padmashri for the year 2020 in the field of Literature and Education by Government of India.;
2. K.K. Birla Foundations accorded ***Vachaspathi Puraskar*** in Jaipur in 1997.;
3. Tilak Maharashtra Vidyapeeth awarded ***"Indira Bihary"*** gold medal award in Pune.
4. ***Mahamahopadhyaya*** by Rashtriya Sanskrit Vidhyapeeth, Tirupathi in 2018.

B) State Level :

1. Government of Telangana honoured the state highest literary award "Vishishta Sahithya Puraskaram" on 15th August, 2017.;
2. "Mahakavi" title of speaker of Andhra Pradesh Sri Ayyadevara Kaleshwara Rao.
3. Swarna Kankanam by the then Governor of Andhra pradesh Late Sri Krishnakanth.
4. Creative Sanskrit poet from Sahitya Parishad, Andhra Pradesh.;
5. Best Sanskrit scholar award from Telugu University, Hyderabad.
6. Best Sanskrit scholar award from Sanathana dharma Chari- table Trust (Sri Kandukuri Shivananda Murthy)
7. 'Yugakatha! title conferred by Tarka Vageesha Bhattacharya
8. Kavichakravathi title by Sripada Rao, Ex. Speaker AP leg- islative Assembly.
9. Sanskrita Kavi Samrat title by Folk Arts Academy, Karimnagar.
10. Sanskrita Pada Kavitha Panchaanana title by Literary & Cultural Organizations of Karimngar Dist.

*****

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

"युगकर्ता युगोद्धर्ता चक्रवर्ती युगस्य च।
सरस्वतीसुतोत्तंसः जीयाद् विजयसारथिः" ॥

तर्कवागीश भट्टाचार्यः

"The careful selection of words, the easy flow of the language.... That are found in every poem of Sri Vijaya Saradhi give a feeling to the reader that he is reading the poem of a great poet of the old or the medieval period who is perfect in the art of writing poetry with a thorough knowledge of the idiom of the language, unlike many of the modern Sanskrit poets who are unable to catch the idiom of this great ancient language and are often influenced by the regional language which the speak."

Dr. P. Sreerama Chandrudu
Prof.of. Sanskrit (Rtd.)Osmania University

कुसुमसुकुमारपदविन्यासपेशला भावगम्भीरा सर्वालङ्कारपरिकर्मिता "सुवृत्तदन्तुरेतरा उदार रीतिमेदुरा समिद्धबन्धबन्धुरा अनल्पकल्पनापरा रसोर्मिभिर्विकस्वरा" कविता नृत्यन्तीव मानसल्लोसमाकलयमाना कस्य वा सचेतसः प्रीतये न प्रभवति शुभतमगीतात्मकेति विदांकुर्वन्तु सुधियः ।

पण्डितराज – शास्त्ररत्नाकर –महामहोपाध्याय
के.एस्.कृष्णमूर्तिशास्त्री

इयञ्च अधुना प्राकाश्ययाना भारतभरती बहूनां सौन्दर्यभारभङ्गुराणां सहृदयहृदयपश्यतोहराणां भवद्दृश्यानां प्रसारणमातन्वाना विविधरमणीयनूतनवस्तुप्रदर्शनशालेव वैदुषीलोचनवैभवशालिनां चित्तमावर्जयति ।

मरिगण्टि श्रीरङ्गाचार्यः
श्री वेङ्कटेश्वरवेदान्तवर्धनीसंस्कृतमहाविद्यालयः, हैदराबाद्

ISBN:9789380171548

₹ 300/-